भारतनाथ श्री रतिनाथ (झा) शर्म महानुभावै र्यद्यपि पण्डितप्रवरैः परिविलोकनेन पावितमपि मुद्रणे कृतौ मुजफ्फरपुर राजकीय महा पाठशालाया मध्यापनस्य परवशतया मया कदाचिदिहत्यकृत्य वितत्यमान मानमत्वेन कदाचित्समीपशीघ्रता विनष्टीकृतत्वेन, कदाचिदधिपद्धति विधेःप्रातिकूल्या दाधारपत्रपतनेन, कदाचिदनवधानेन संशोधनकर्मेतां यथासमुचितं नेतुं नापारि । तथापि प्रकृति सुहृदः सदयहृदयाः सहृदयाः संशोधयन्त [illegible] सकृदपि दृष्टि दानेन मदीय श्रमद्रुमं सफलयिष्यन्तीत्याशास्यते, उपकृतिश्चोक्त महानुभावानां प्राजन्म न विस्मरिष्यते इत्यलम् ।


बालकृष्णमिश्रः



समर्प्पणम् !

तदेतन्नव्यकाव्यकुसुमं विविधविरुदावलीविराज मान मनोन्नत महाराजाधिराज लक्ष्मीश्वर सिंह (बहादुर जी. सी. आइ. ई.) कनिष्ठ धर्मपत्न्याः प्रतीत सुकृत कीर्ते श्री ५ लक्ष्मीश्वरी देव्याः पादयो र्मया समर्प्यते, प्रार्थ्यते च तदीय मङ्गल मनङ्गारातिरिति ।

बालकृष्णमिश्रस्य



॥ श्रीः ॥

श्रीगोविन्दचरितस्य प्रधान विषयाणां सूचीपत्रम्।

[illegible] दीपिकायां [illegible] [illegible] वा निरू-
पितानां [illegible] विषयाणां
सूचीपत्रम् ।

विषयाणांसङ्कलनेन संख्या १
एतेषु कतिपये विषया अनेके
स्थलेषुविभिन्नप्रकारेण प्रतिपा

श्रीः ।

[illegible] टीका । टिप्पणी प्रतिपादितानां ग्रन्थानां नामधेयानि ।

(व्याकरणेषु)

पाणिनिसूत्रम्	१
कात्यायनवार्त्तिकम्	२
महाभाष्यम्	३

(कोशेषु)

नामलिङ्गानुशासनम्	१
मेदिनी	२
विश्वप्रकाशः	३
हैमचन्द्राभिधानम्	४
शब्दकल्पद्रुमः	५
शब्दार्णवः	६
शब्दरत्नावली	७
[illegible]	८
अनेकार्थध्वनिमञ्जरी	९
एकाक्षरकोशः	१०

(छन्दस्सु)

पिङ्गलसूत्रम्	१
वृत्तरत्नाकरः	२
छन्दोमञ्जरी	३
वाणीभूषणम्	४
वृत्तरत्नाकरस्य नारायणीयव्याख्या	५
वृत्तदर्पणः	६

(कामशास्त्रेषु)

कामसूत्रभाष्यम्	१
रतिरहस्यम्	२

(अलङ्कारेषु)

काव्यप्रकाशः	१
साहित्यदर्पणः	२
रसगंगाधरः	३
दशरूपकम्	४
काव्यप्रदीपः	५
चन्द्रालोकः	६
कुवलयानन्दः	७
वामनसूत्रम्	८
वामनसूत्रवृत्तिः	९
अलङ्कारसर्वस्वम्	१०
साहित्यसारः	११
काव्यादर्शः	१२
काव्यादर्शविवृतिः	१३
काव्यप्रदीपोद्योतः	१४
रसगंगाधरमर्मप्रकाशिका	१५
शाकुन्तलार्थद्योतनिका	१६

(काव्येषु)

वाल्मीकीयरामायणम्	१
लक्ष्मीसहस्रम्	२

सङ्कलनेन ग्रन्थानां संख्या १०६

श्रीगणेशाय नमः ।

※ श्रीलक्ष्मीश्वरी चरितम् ※

⁓※ मङ्गलाचरणम् ※⁓

गुञ्जदलिमञ्जुवञ्जुल यमुनाकुञ्जे किमपि तिमिरपुञ्जम् ।
जयति समभासि ललितं हरिदम्बरशोभिचपलयाऽऽमिलितम्
॥ १ ॥

टीका ।

पदाम्भोजप्रान्तप्रणतहरिमाणिक्यमुकुट
स्फुटोद्यन्नखांशुप्रमुदितचकोराक्षियुगला ॥
श्रियं लावण्याब्धिस्मरविदितनिर्मन्थनभवां
दधाना श्रीराधा मम विविधबाधां तिरयतु ॥ १ ॥
नैषा दर्शनसाहित्यदर्पाल्लाख्या विधीयते ।
परन्तु कृष्णकृपामोदो गदाऽद्येनैव दीप्यते ॥ २ ॥
वितथोक्तिमयीभूतिः परेषां कीर्त्तिदर्पणे ।
नेह निक्षेपणीयेति प्रार्थना मात्सरे गणे ॥ ३ ॥

प्रारिप्सित समस्तार्था[१]घनेकार्थक काव्यविशेष वक्ष्यमाणलक्षण लक्ष्मी-श्वरीचरिताख्यामख्याताख्यायिका समाप्तिसपत्नसन्दिह्यमानान्तरायसन्तति शान्तिकामस्वान्तेनातन्यमानानि स्तवात्ममङ्गलानि स्वान्तेवासिना मनुशास

(१) आद्यमर्थपदं विभवस्य, द्वितीयञ्च प्रयोजनस्य बोधकम् । आदिना व्यवहारज्ञानादीनांपरिग्रहः तदुक्तं काव्यप्रकाशे "काव्यंयशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये,, इत्यादिना

वास(१)नात्मक स्थायिभाव नव[२]कान्यतम निरुक्तरतिगमकसुरतयोग्यता द्योतक तदीयकळविशेषाभिभावकत्वव्यञ्जकतयो-भयथामञ्जुतोपकारितया च गुञ्जदलित्व विशेषणस्य विवक्षितार्थ[३]वाधप्रयोजकानुपादानत्वे ननापुष्टार्थता । अतएव प्रकृतार्थोपपादकचमत्कारिव्यङ्ग्यकत्वानुमिति करणत्व सामान्यविशेषभावानालिङ्गित (४) प्रकृतार्थनिश्चयजनकज्ञानगोचरत्वरूपयोः परिकर(५)काव्यलिङ्गयो रर्थालङ्कारमात्रयोः "लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः। असत्पुरुषसेवेव दृष्टिर्विफलतां गतेत्यादावुत्प्रेक्षोपमयोरिव परस्परनैरपेक्ष्येण तिलतण्डुलन्यायात् संसृष्टिः"सैषा संसृष्टि रेतेषांभेदेन यदिहस्थिति,, रितिकाव्यप्रकाशोक्तेः । यद्यपि गुञ्जदलित्वमेवाभिव्यञ्जयितुं प्रभवति मञ्जुतां, तथापीतरथापि तत्प्रत्यायनाय मञ्जुपदोपादानम् । वञ्जुलकुञ्जरयातिसान्द्रतया परदर्शनायोग्यत्वं ध्वन्यते तेनच रहःकेलिक्षमत्वम् । अत्रादिमावाच्यार्थमूला पराच व्यङ्ग्यार्थमूला व्यञ्जनाबोध्या " सर्वेषांप्रायशोऽर्थानां व्यञ्जकत्वमपीष्यत " इति दर्पणाभिधानात् । यमुनापदप्रतिपादित एव व्यक्ति(६)वृत्तिबलेन वाच्यार्थ

---

१ संस्कारः पुनरयं निश्चयस्यैवेच्छाया अपि संस्कारजनकत्वम् तदवच्छेदके विशेष्यभागस्यानिवेशात् ।

२ रतिरुत्साहस्शोको विस्मयोहासो भय जुगुप्सा क्रोध निर्वेद इति ।

३ अत्रार्थस्य वाच्यलक्ष्यव्यङ्ग्य साधारणम् ।

४ अनुमानार्थापत्त्यन्यतरसाधारणाया नालिङ्गितान्तविशेषणम् । न च पञ्चम्यादिप्रतिपादितहेतुत्वे व्यज्यमानहेतुत्वविरहिण्यसुन्दरेऽतिव्याप्ति व्याप्तिस्तादृशगोचरत्वेन शब्दाबोधितत्वस्य निवेश्यत्वात् ।

५ न चापुष्टार्थत्वाभावेन शक्यते परिकरस्थिरतार्पयितुं, यमकादावपुष्टार्थताया दोषत्वविरहेण साभिप्राय विशेषणे "वनगताऽऽयताभिमहिद्रेत्यादौ तदुपगमस्यावश्यकत्वात् ।

६ 'व्याप्ति' व्यञ्जना ।

प्रवाहतादात्म्यमतिक्रोडीकृते तदीयतीरे(१)प्रतिपिपादयिषितस्य शैत्यात्म प्रयोजनस्यात्यन्ततिरस्कृतवाच्यध्वनितया तेनच सौगतश्रमापनोदनयोग्यता, तयापि च रहःकेलिक्षमत्व मर्थशक्तिमूलक संलक्ष्य क्रम(२)तयाव्यज्यते, पदेनसम मन्वय व्यतिरेकयोरभावात् । एतच्च स्थायिभावाङ्गतया गुणीभूतं नीरक्षीरन्यायेन ध्वनिसङ्कीर्णतामाश्रयति "संकरेण त्रिरूपेण संसृष्ट्या चैक रूपया वेदखाब्धिवियच्चन्द्रा,, इतिध्वनिभेदप्रकरणे प्रकाशाभिधानात् । किमपीत्यनेन प्रसिद्धतमः पुञ्जापेक्षया व्यतिरेकालङ्कारो बोध्यते, कुञ्जगतत्व साधारणधर्मसद्भावेन शाब्दत्वार्थत्वयोरभावेऽप्यालङ्कारिकाभ्युपगतातिरिक्तपदार्थत्वस्य सादृश्यस्य(३) "कतिपयदिवसविलासं नित्य सुखासङ्गमङ्गलसवित्री । खर्वयति स्ववासं गीर्वाणधुनीतटस्थितिर्नितरामिति रसगङ्गाधरोक्ते व्यतिरेकोदाहरणइवेहापिव्यङ्गचत्वापर्यायाक्षिप्तत्व सत्त्वात् । तिमिरपुञ्जमित्यत्र चपलयेत्यत्र चानुग्राहकस्यनिगरणान्तरस्याभावान्निरवयवा रूपकातिशयोक्तिस्सङ्कीर्यते पुराभिहिताभ्यामलङ्काराभ्याम्, साच विषयिवाचकपदज्ञानमात्रकरणकं तदीयवाच्यतावच्छेदकरूपेण विषयस्य बोधनम् । जयतीत्यनेन वर्तमानकालिकोत्कर्षाभिधानात् तत्प्रकारकज्ञानानुकूलस्यैतस्य स्तुतिरूपतया मङ्गलत्वमवसेयम् । ननु गुरुकार्यारम्भे प्रणतिरवश्यं दृश्यते प्रेक्षावताम् अभिहितं च श्रीधराचार्यैः प्रशस्तपादभाष्यविवरणे न्यायकन्दल्यां "नहिकश्चिदपरः प्रेक्षावान म्लेच्छोऽपि तावत्कार्ये प्रवर्तते यावदिष्टान न नमस्यतीति, तथा च स्तुतिमात्रमाचरन्नेपकविः

---

(१) यद्वा शक्यतावच्छेदकरूपेणैवलक्ष्यार्थभानं तावताऽपि गङ्गातीरेघोषइतिप्रयोक्तव्ये गङ्गायाघोष इति प्रयोगप्रयोजन ख्यातस्याति ।

विज्ञेयपौर्वापर्येण ।

कथमिव नवाच्योभवेदितिचेत् । न, जयत्यर्थेनैव वक्तृविषयवैलक्षण्यसहकारेण भगवद्विषयकप्रणतेस्सवासना(१)नामभिव्यञ्जनात्, अतएव जयत्विति नाभ्यधायि, तथासति विधिनोत्कर्षस्यानिष्पन्नत्वध्वननेन नमस्कारद्योतकत्वं नोपपद्येत । इयमे(२)वार्थी व्यञ्जना यदाह मम्मटः "वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम् योऽर्थस्यान्यार्थधीहेतु र्व्यापारोव्यक्तिरेवसा,, इति । अनयैवदिशाऽग्रेपि समाकलनीयम् । श्रीकृष्णविषयिणीरति र्देवावलम्बनतया भावरूपा पुरोदितेन व्यतिरेकालङ्कारेण सम्भोगशृङ्गा(३)रस्य च ध्वनिना जयत्यर्थाभिव्यज्यमानेन नमस्कारेण चानुप्राणिता कवितात्पर्यविषयीभूताऽसंलक्ष्य क्रमतया पण्डितराजानुमतया संलक्ष्यक्रमतयावा ध्वन्यते, सचायमष्टविधेभ्यो(४)गुणीभूतव्यङ्ग्येभ्योव्यतिरिच्यमानोऽप्रधानीभूतशब्दार्थालङ्कारोवाच्यातिशयीतिपारिभाष्य ध्वन्या(५)त्मकतयैतदुत्तमंकाव्यम् "इदमुत्तममतिशयिनि व्यङ्ग्येवाच्याद्ध्वनिर्बुधैः कथितः" इति प्रकाशनिरुक्तेः । एतेन प्रधानव्यङ्ग्यस्यातिशयि विच्छित्तिविशेषाधायकत्वेन तदभावस्य मध्यमकाव्यतायाः प्रयोजकस्य, कवितात्पर्यगोचरतया च तदनाश्रितव्यङ्ग्यकत्वात्मकस्याधमकाव्यतायाः प्रयोजकस्य

(१) नवनवोन्मेषशालिनी प्रज्ञा प्रतिभा सैव वासनेत्युच्यते, तत्सद्भावएव वक्तृवैशिष्ट्यादिना भवति व्यङ्ग्यस्यप्रतीतिः । अतएव न शाब्दिकाना रसप्रतीतिः । उक्तञ्च "सवासनानां नाट्यादौ रसस्यानुभवोभवेत् । निर्वासनास्तुरङ्गान्तर्वेश्मकुड्याश्म सन्निभा,, इति ।

(२) एवकारोऽप्यर्थे ।

(३) सच चित्तवृत्तिविशेषसंयोगकालशृङ्गाररति ।

(४) असुन्दराऽतिगूढपराङ्गकाक्वाक्षिप्तवाच्यसिद्ध्यङ्गास्फुटसन्दिग्धतुल्यप्राधान्यरूपेभ्य ।

[५] तथाहि द्विविधोध्वनि । तत्रैकोव्यङ्ग्यप्रधानो नाम । परश्चोत्तमकाव्यतानुकूलवाच्यातिशायि-व्यङ्ग्यविशेषात्मेति ।

विरहान्तयोः प्रसङ्गः । इहापि ध्वनिसङ्करोरसस्याङ्गतया रसवदलङ्कारश्च । "रसभावौ तदाभासौ भावस्य प्रशमस्तथा । गुणीभूतत्वमायान्ति यदालङ्कृतयस्तदा । रसवत्प्रेयऊर्जस्वि समाहितमितिक्रमादितिवचनात्" । भावस्त्वं विभावादिव्यज्यमाननिर्वेदाद्यन्यतमत्वं तच्च "निर्वेदग्लानिशङ्काश्रमधृतिजड़ताहर्षदैन्यौग्र्यचिन्तास्त्रासेर्ष्यामर्षगर्वास्स्मृतिमरणमदास्सुप्त निद्राविबोधाः । व्रीड़ापस्मारमोहास्समतिरलसतावेगतर्कावहित्था व्याध्युन्मादौ विषादोत्सुकचपलयुतास्त्रिंशदेते त्रयश्चे,,ति दशरूपके प्रतिपादितम् एतदुपलक्षणं गुरुदेवनृपपुत्रादि विषयाणां रतीनाम् एतेन पुत्राद्यालम्बनं वात्सल्याभिधं रसान्तरमिति परास्तम् । यदाहुः "रतिर्देवादिविषया व्यभिचारी तथाञ्जित ,, इति । तदाभासश्चानुचितविभावालम्बनः । 'प्रशमो, नाशः ॥ पुरोदीरितनियताकाङ्क्षया विशेषणत्रितययोजने "जयतीत्यन्तेन वाक्यपरिसमाप्तौ पुनस्तदवयवाभिहिते विशेषणान्वये समाप्तपुनरात्तताप्रसक्ति,, रित्याक्षेपोनिरस्तः,अनियताकाङ्क्षयैव हि तदन्वये भवति तदापादनं, नियताकाङ्क्षाराहित्यस्य तत्र दूषकता बीजत्वात् । अतएव "प्रागप्राप्त निशुम्भशाम्भवधनुर्द्वेधाविधाविर्भवत्क्रोधप्रेरित भीमभार्गवभुजस्तम्भापविद्धः क्षणात् । उज्ज्वालः परशुर्भवत्वशिथिलस्त्वत्कण्ठपीठातिथि र्येनानेन जगत्सु खण्डपरशुर्देवोहरः ख्याप्यत ,, इत्यत्र नोक्तदोषानुवृत्तिरिति प्रतिपादितं काव्यप्रदीपे । समभासिता च, तस्यैव भासा विश्वमिदं विभातीति श्रुते(क०मु०)रितरेषां जड़त्वेन(१)परिच्छिन्नत्वेन(२)तथात्वायोगाच्च । एव

---

(१) अज्ञानत्वेनानात्मत्वेन वा ।

(२) स्वसमानसत्ताकात्यन्ताभावप्रतियोगित्वेन तादृशान्योन्याभावप्रतियोगित्वेन, ध्वंसप्रतियोगित्वेन चेत्यर्थः । वस्तुतआत्मावृत्तित्वविशिष्टप्रतियोगितासम्बन्धेनात्यन्ताभावेन भेदेन वेति गौडब्रह्मानन्दकृता पार्मद्वैतसिद्धिव्याख्यायांद्रष्टव्यम् ॥

ञ्चन शब्दप्रमाणालङ्कारः। णिनिप्रत्ययेनाभिधीयमानेन शीलेनशाश्वतिक भासनयोग्यत्वं व्यज्यते। एतेनासाधारणधर्माभिधानेन ब्रह्मतादात्म्यं, ललितत्वेन च कार्येणानन्दरूपत्वं तत्साधकत्वं वा जयत्यर्थसाधनं गम्यते। ललितपदं शोभनं ब्रूतइतिवा। अथवा समेत्यादेः समं, सदृशगुटिका कलितं शोभनं वा 'भासि, दीप्तिमत्। तुल्येन शोभनेन वा भासेनाश्रीच माणं वा 'ललितं, हारविशेषोयस्येत्यर्थः। नचान्तिमे पक्षे "न कर्मधारयान्मत्वर्थीय,, इत्यनुशासनविरोधः भासोस्त्यस्मिन्नितिव्युत्पत्तेरेवोक्तार्थबोधायाश्रयणीयत्वादितिवाच्य, 'मत्तुव्वत, इतिमहाभाष्यनिर्देशात् महाकवीनां तादृशप्रयोगबाहुल्याच्च निरुक्तानुशासनं हि भ्रमविषयत्वेनांशतःकल्पनीयम्। वस्तुतस्तु समत्वं भासिपदार्थस्य भासविशिष्टस्य विशेषणमेवश्च रूपविशिष्टोघटोऽनित्य इत्यत्र वेदान्तपरिभाषोदाहृतेऽनित्यत्वस्य रूप इव प्रकृतेऽपि भासेऽपि धर्मितावच्छेदके विशिष्टवैशिष्ट्यबोधमर्यादया समत्वस्यान्वयेनोक्तार्थलाभोऽनपवादएव। ननु शब्दाश्रयो गगनं नित्यमित्यादौ शब्देऽपि नित्यत्वस्य तुल्यन्यायादन्वयः प्रसज्येत, यद्विशिष्टे यद्भासते तत्रासतिबाधके तदन्वयस्य नियतत्वादिति। एतैरशेषैरपि पक्षैर्जयत्यर्थसाधनैर्व्यतिरेकाङ्ग काव्यलिङ्गालङ्कारै रतिः प्रतीयते। "ललितं हारभेदेस्यादीप्सितेऽपि चे,, तिविश्वप्रकाशः। किञ्च 'समैः, सकलैर्भासिभि 'र्ललित, मीप्सित मितिवाऽर्थः सुभगाअपीदमीयदीप्त्यै स्पृहयन्ति, प्रयोजनभूतेनच तेन निरतिशयं रामणीयकं तेनचोत्कर्षसाधनेन रतिर्ध्वन्यते। हरिद्वसनपरिधानेन भवति शोभा गौराङ्गनानामिति तच्छोभित्वं प्रकृतेनानुपपन्नम्। हरिदम्बरशोभीत्यनेनावसीयमानं प्रसिद्धचपलाविसदृशत्वमुपजीवति प्रधानव्यतिरेक इत्यनयोरङ्गाङ्गिभावसङ्करः। यद्वा हरिंचति खण्डयति हरिदस्तं हरेरिन्द्रस्य काकियाशी-

विषस्यवा खण्डकं दर्पविनाशकं, गोवर्धनाभिधमहीध्रसमुद्धारणे संवर्तसंवर्तप्रतिमधाराधरनिकरसर्वतो–मुखासारतो व्रजरक्षणात् पारिजातपादपाहरणात् प्रधर्षणादन्यत्र प्रेषणाच्च । दृश्यन्त उत्कर्षापहारकेऽपि खण्डन पदस्य प्रयुक्तयः, एतच्च परिपुष्णाति पुरोदीरिता मुत्कृष्टताम् " हरिरिन्द्रो हरिस्सर्प " इत्यनेकार्थध्वनिमञ्जरी । 'वरशोभिन्या, श्रेष्ठया कुंकुमेनजनितयावा, 'शोभया, कान्त्या । 'वरस्य, वरप्रदानस्य 'शोभया, समीहया । स्वोपासकेषु वा श्रितयेत्यर्थः । प्रकृष्टकान्तिमत्या कुङ्कुमानुलेपन विराजितया उपासकेषु साकाङ्क्षयेतयावत् । अन्तिमे सदयत्वं व्यङ्ग्यम् ''वरोऽभीष्टे देवतादेश्श्रेष्ठे काश्मीरजेमत,, इति विश्वः । अत्र लोकोत्तर तिमिरपुञ्जत्वेन रूपेण भगवतः प्रतिपादने विशेषणाना मानुगुण्यं वेदितव्यम् । अथवा वञ्जुलस्याशोकस्य निरुक्तकुञ्जे तिमिरपुञ्जं तत्त्वेनाध्यवसित कालीमूर्तिः वृन्दावनाधिष्ठातृ देवता, तस्याश्च चिच्छक्तिरूपत्वेन समभासित्व दलिन्वञ्च । हरिदम्बरशोभि, दिगम्बरशोभि । ''बद्धकाञ्चीं दिगंशुका,, मिति स्वतन्त्रतन्त्रे । 'चपलया, तत्त्वेनाध्यवसितया तत्परिचारिकया देव्या, 'मिलितं' सेवितम् । 'चपलया, विभूषया वा 'सर्वालंकारयुक्तां च मुण्डमाला विभूषिता, मितिनिर्दिष्टत्वात् । यद्वा कृष्णरूपा काली । हरिदम्बरेत्यादेः पुरोदीरित एवार्थः, कृष्णस्य काल्यात्मतया [illegible] वर्ण्यम् । [illegible] पूर्ववद्योजनीयमिति ॥ अनुप्रासानुप्राणितः [illegible] [illegible] वृत्तिर्[illegible] [illegible] प्रतिकूलवर्ण[illegible] [illegible] वृत्ति[illegible] [illegible] [illegible] संसृष्टिः । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।

[illegible]

मानन्दो भवति ,, इतिश्रुतेः, रत्यादि स्थायिभावावच्छिन्नाया विभावाद्या
ऽलन विनिवृत्ताहृतेस्स्वप्रकाशानन्द चेतनाशक्ते रसात्मिकायाः परम्परयो
पकारकत्वे सति व्यञ्जनवर्णसाम्यं वा । एतन्मतेऽनुप्राससमाख्याऽपि साधु
सङ्गच्छते । नच रसस्य तादृशचैतन्यरूपत्वे रस उत्पद्यते नश्यतीत्यादि
प्रतीते नवधा तद्विभागस्य चानुपपत्तिः, तस्य ब्रह्मात्मकत्वेन नित्यत्वादे
कत्वाच्चेति वाच्यं तदवच्छेदकरत्यादीनामुत्पादविनाशशालित्वेनैव तत्र
प्रतीतेः स्वाश्रयावच्छिन्नत्व आख्यातस्य लक्षणाया उपगमात् । नवधा-
विभागस्यापि रत्यादिस्थायिभावोपाधिकत्वात जीवेश्वरब्रह्मभेदेन त्रिधा
चैतन्य विभागवत् प्रतिपादितमेतद्विस्तरेण रसगङ्गाधरे ।

वृत्त्यनुप्रासत्वञ्च वर्णविशिष्टवर्णत्वं, वै० स्ववृत्तिव्यञ्जनत्व विशिष्टजा-
तिमत्त्व स्वाव्यवहितपूर्ववर्तितावच्छेदक निरुक्त जातिमद्वर्णाव्यवहितोत्तरत्व
स्वाव्यवहित पूर्व स्वरसजातीय स्वराव्यवहितोत्तरत्व समानाधिकरण स्वा
व्यवहितोत्तरस्वरसजातीयस्वराव्यवहित पूर्वत्व संसर्गावच्छिन्न स्वनिष्ठाव-
च्छेदकताक प्रतियोगिताकभेदवत्त्व स्वविशिष्ट वर्ण विशिष्टत्वै तत्सम्बन्ध-
चतुष्टयावच्छिन्न स्वनिष्ठ प्रकारतानिरूपित प्रमीयविशेष्यतावत्त्व स्ववि-
शिष्टभेदवत्त्वान्यतरसम्बन्धेन ।
प्र० वै० स्वसामानाधिकरण्य स्वसमानाधिकरणभेद प्रतियोगितावच्छेदक-
त्वाभ्याम् । स्वाव्यवहितपूर्ववर्तित्वं च स्वविशिष्टत्वं वै० स्वानुकूलकृतिसम-
वायिसमवेतकृतिप्रयोज्यत्व स्वविशिष्टक्षणोत्पत्तिकत्वाभ्याम् । वै० स्वप्राग
भावाधिकरणत्व स्वविशिष्टव्यञ्जनप्रागभावाधिकरणत्वसम्बन्धावच्छिन्न
स्वावच्छिन्नभेदवत्त्वाभ्याम् । वै० स्वघटितघटकत्व स्वप्रागभावाधिकरणत्वा
भ्याम् । अव्यवहितोत्तरत्वमपि स्वप्रागभावस्थाने स्वक्षणध्वंसं व्यञ्जन-
स्थाने स्वरं निवेश्य निर्वाच्यम् । एषा च परिष्कृतिर्यथायथं कार्या । द्वि.है.

विपस्यवा खण्डकं दर्पविनाशकं, गोवर्धनाभिधमहीध्रसमुद्धारणे संवर्तसंवर्तप्रतिमधाराधरनिकरसर्वतो–मुखासारतो व्रजरक्षणात् पारिजातपादपाहरणात् प्रधर्षणादन्यत्र प्रेषणाच्च । दृश्यन्त उत्कर्षापहारेऽपि खण्डन पदस्य प्रयुक्तयः, एतच्च परिपुष्णाति पुरोदीरिता मुत्कृष्टता "हरिरिन्द्रो हरिस्सर्पे" इत्यनेकार्थध्वनिमञ्जरी । 'वरशोभिन्या, श्रेष्ठकुंकुमेनजनितयावा, 'शोभया, कान्त्या । 'वरस्य, वरप्रदानस्य 'शोभया, समीहया । स्वोपासकेषु वा श्रितयेत्यर्थः । प्रकृष्टकान्तिमत्या कुङ्कुमानुलेपनविराजितया उपासकेषु साकाङ्क्षयेतियावत् । अन्तिमे सदयत्वं व्यङ्ग्यम् । "वरोऽभीष्टे देवतादेश्श्रेष्ठे काश्मीरजेप्रत,, इति विश्वः । अत्र लोकोत्तर तिमिरपुञ्जत्वेन रूपेण भगवतः प्रतिपादने विशेषणाना मानुगुण्यं वेदितव्यम् ॥ अथवा वञ्जुलस्याशोकस्य निरुक्तकुञ्जे तिमिरपुञ्जं तत्त्वेनाध्यवसिता कालीमूर्तिः वृन्दावनाधिष्ठातृ देवता,तस्याश्च चिच्छक्तिरूपत्वेन समभासितत्वं लक्षितत्वञ्च । हरिदम्बरशोभि, दिगम्बरशोभि । "बद्धकाञ्ची दिगंशुका,, मिति स्वतन्त्रतन्त्रे । 'चपलया, तत्वेनाध्यवसितया तत्परिचारिकया देव्या, 'मिलितं' सेवितम् । 'चपलया, विभूषया वा 'सर्वालंकारयुक्तां च मुण्डमाला विभूषिता, मितितच्चिन्तनात् । यद्वा कृष्णरूपा काली । हरिदम्बरेत्यादेः पुरोदीरित एवार्थः,कृष्णस्य कालीरूपता रामस्यच तारिणीरूपतेत्यागमस्य रहस्यम् । एतत्पक्षेऽप्यन्यत्सर्वं पूर्ववद्बोध्यमिति ॥ अनुप्रासदूषणैः प्रसिद्धि वैधुर्य वैकल्य वृत्तिविरोधैः ख्यातविरुद्धापुष्टार्थ प्रतिकूलवर्णत्वानतिरिच्यमानैरहिताभ्यां वृत्तिश्रुत्यनुप्रासाभ्यां परार्धावस्थितेनान्त्यानुप्रासेनतादृशेन शब्दालङ्कारैः श्लेषाद्यर्थालङ्काराणां संसृष्टिः । वृत्त्यनुप्रासेन श्रुत्यनुप्रासस्य साहचर्यादेकाश्रयानुप्रवेशः सर्वत्र तयोरन्त्यानुप्रासेन साकं संकरः । अनुप्रासत्रयञ्च छेकवृत्त्याद्यन्यतमत्वं, "रसोवै सः रसं ह्येवायं लब्ध्वा

आनन्दो भवति ,, इतिश्रुतेः, रत्यादि स्थायिभावावच्छिन्नाया विभावाद्या कलन विनिवृत्तावृतेस्स्वप्रकाशानन्द चेतनाशक्ते रसात्मिकायाः परम्परयो पकारकत्वे सति व्यञ्जनवर्णसाम्यं वा । एतन्मतेऽनुप्रासमाख्याऽपि साधु सङ्गच्छते । नच रसस्य तादृशचैतन्यरूपत्वे रस उत्पद्यते नश्यतीत्यादि प्रतीते र्नवधा तद्विभागस्य चानुपपत्तिः, तस्य ब्रह्मात्मकत्वेन नित्यत्वादे कत्वाच्चेति वाच्यं तदवच्छेदकरत्यादीनामुत्पादविनाशशालित्वेनैव तत्र प्रतीतेः स्वाश्रयावच्छिन्नत्व आख्यातस्य लक्षणाया उपगमात् । नवधा-विभागस्यापि रत्यादिस्थायिभावोपाधिकत्वात जीवेश्वरब्रह्मभेदेन त्रिधा चैतन्य विभागवत् प्रतिपादितमेतद्विस्तरेण रसगङ्गाधरे ।

वृत्त्यनुप्रासत्वञ्च वर्णविशिष्टवर्णत्वं, वै० स्ववृत्तिव्यञ्जनत्व विशिष्टजा-तिमत्त्व स्वाव्यवहितपूर्ववर्तितावच्छेदक निरुक्त जातिमद्वर्णाव्यवहितोत्तरत्व स्वाव्यवहित पूर्व स्वरसजातीय स्वराव्यवहितोत्तरत्व समानाधिकरण स्वा व्यवहितोत्तरस्वरसजातीयस्वराव्यवहित पूर्वत्व संसर्गावच्छिन्न स्वनिष्ठाव-च्छेदकताक प्रतियोगिताकभेदवत्त्व स्वविशिष्ट वर्ण विशिष्टत्वै तत्सम्बन्ध-चतुष्टयावच्छिन्न स्वनिष्ठ प्रकारतानिरूपित प्रमीयविशेष्यतावत्त्व स्ववि-शिष्टभेदवत्त्वान्यतरसम्बन्धेन ।

प्र० वै० स्वसामानाधिकरण्य स्वसमानाधिकरणभेद प्रतियोगितावच्छेदक-त्वाभ्याम् । स्वाव्यवहितपूर्ववर्तित्वं च स्वविशिष्टत्वं वै० स्वानुकूलकृतिसम-वायिसमवेतकृतिप्रयोज्यत्व स्वविशिष्टक्षणोत्पत्तिकत्वाभ्याम् । वै० स्वप्राग भावाधिकरणत्व स्वविशिष्टव्यञ्जनप्रागभावाधिकरणत्वसम्बन्धावच्छिन्न स्वावच्छिन्नभेदवत्त्वाभ्याम् । वै० स्वघटितघटकत्व स्वप्रागभावाधिकरणत्वा भ्याम् । अव्यवहितोत्तरत्वमपि स्वप्रागभावस्थाने स्वक्षणध्वंसं व्यञ्जन-स्थाने स्वरं निवेश्य निर्वाच्यम् । एषा च परिष्कृतिर्यथायथं कार्या । द्वि.तै.

पूर्वोक्तसंसर्गत्रयेण । तृ. वै. स्वभिन्नत्व. स्वघटितपादघटकत्वाभ्याम् च. वै. निरुक्तसंसर्ग युगलावच्छिन्न स्वावच्छिन्न भेदवद्वृत्तित्व. स्ववृ व्यञ्जनत्व विशिष्ट जातिसामानाधिकरण्य स्वाव्यवहित पूर्ववर्तितावच्छे दकव्यञ्जनत्वविशिष्टजातिमद्वर्णाव्यवहितोत्तरत्वसम्बन्धावच्छिन्नस्वावच्छि न्न प्रतियोगिताकत्वैः । इह च वैशिष्ट्ययुगलं पूर्वोक्ताभ्यामेव सम्‍न्धाभ्यां प्रवेश्यम् । प्रकारतावच्छेदकेषु संसर्गेषु तृतीयस्य निवेशाद्वृ त्त्यनुप्रासयमकयोस्तुरीयस्य निवेशाच्छेकानुप्रासस्य व्यावृत्तिः । अत स्वभिन्नत्वमपि तत्र निवेशितम् । अन्यतरत्र द्वितीयसंसर्ग विवक्षणादेक र्णेन वृत्त्यनुप्रासे ऽव्यवहितपूर्वत्वोत्तरत्वयोस्तथापरिष्करणात् स्वरेणा रिते ऽनन्तरिते च स्थलविशेषे तत्र नानुपपत्तिः । इतरेषां फलं स्पष्टम मिति न तत्प्रदर्शितम् । अधिकं स्वयमेव सूक्ष्मबुद्धिभिरालोचनीयमित्ये षा सरणिः ॥ श्रुत्यनुप्रासत्वं च हलवयववर्णविशिष्ट तादृशवर्णत्वं, वै.स्व भिन्नत्व स्वजनक पवनाभिघातानुयोगि कण्ठादिस्थानानुयोगिक पवना भिघातजन्यत्वाभ्याम् । विभिन्नसमानोच्चारणस्थानकै मकार नकारादि भिर्घटित निरुक्तालंकारानभ्युपगमेऽतादृश स्थानानुयोगिक पवनाभि घाताजन्यत्वमपि तृतीयसंसर्गतया निवेश्यम् ॥ अन्त्यानुप्रासत्वं च पदवि शिष्टपदत्वं, वै० स्वभिन्नत्वसहचरित स्वविशिष्टव्यञ्जनविशिष्ट व्यञ्ज विशिष्टत्व. स्वघटितपादविशिष्ट[१]पादघटकत्वान्यतरसंसर्गेण । प्र. वै. स्व घटक व्यञ्जनभागभावानधिकरणत्व स्वघटकत्वाभ्याम् । द्वि.वै. स्ववृत्ति व्यञ्जनत्व व्याप्यजातिमत्त्व. स्वाव्यवहितपूर्ववर्तितावच्छेदक स्वरत्वावा न्तरजातिमद्वर्णाव्यवहितोत्तरत्व. स्वाव्यवहितपूर्ववर्तितानवच्छेदक व्यञ्जन त्वव्याप्यजात्यवच्छिन्नाव्यवहितोत्तरत्वाभाववत्त्व. स्वाव्यवहितोत्तर स्व

(१) ११ वै. व्यञ्जनवैशिष्ट्य निवार्यतयानवेक्ष्यम् ॥

विशिष्ट स्वराव्यवहितपूर्वत्वैः । वै. स्ववृत्ति स्वरत्वव्याप्यजातिमत्त्व. स्ववृत्तिह्रस्वत्व दीर्घत्वान्यतरवत्त्व. स्ववृत्तित्वाभाववद्धर्माभाववत्त्वैः । वृत्तित्वाभावप्रतियोगितयोरवच्छेदकसम्बन्धश्च स्वावच्छिन्नाव्यवहितोत्तरत्वम् । तृ. वै. स्वघटितत्व स्ववृत्तित्वाभ्याम् । वृ. प्रथमवैशिष्ट्यघटकसंसर्गाभ्याम् । सर्वं चेदं सहृदय हृदयावर्जकत्वेन विशेषणीयम् ॥ चेतोद्रवमयाह्लादव्यञ्जकानां मध्यवृत्तिमुपेयुषां टवर्गभिन्नानां स्ववर्गान्त्यवर्णाक्रान्त मूर्ध्नां वर्णानां रचनया सम्भोगशृङ्गारोचितं माधुर्यं गुणः श्रुतिमात्रेणान्वयस्यावगम्यमानतया प्रसादोऽपि । गुणत्वं च रसस्योत्कर्षकत्वे सति तदव्यभिचारि स्थितित्वं, रसपदं च रस्यत इति योगेन भावादीनामपि सङ्ग्राहकम् । युक्तिश्चात्र लक्षणम् कुंजगतत्वसमभासित्वाद्यन्वयेन तमः पुंज विशेषत्वस्य सिद्धेः । तदुक्तं चन्द्रालोके "युक्तिर्विशेषसिद्धिश्चेद्विचित्रार्थान्तरान्वयात्,, इति ॥ लाटी रीतिः" द्वित्रिपदा पांचाली लाटीया पञ्च सप्त वा यावत्, शब्दाःसमासवन्तो, भवति यथाशक्ति गौडीया,, इत्यभिधानात् ॥ गीतिकावृत्तम् "आर्या प्रथमार्धसमं यस्या अपरार्धमाह तां गीतिम्,, इति केदारभट्ट भाषितलक्षणात् । प्रकृतभावानुकूलत्वेन नात्र हतवृत्तता शङ्कितुं शक्या । अत्रैतन्मङ्गलश्लोकस्यार्यागीतिवृत्तानाक्षेपकत्वेऽपि न क्षतिः, नान्द्यादावेव तन्नियमात् कथंचित्प्रकृतेऽपि सम्भवाच्च । इहादौ भगणः ऽ।। "भादिगुरुः,, इतिलक्षणात् "भेन्दुर्यशोनिर्मलम्,, इतितत्फलश्रुतेर्नात्र गण दोषः । तस्य च रेवतीनक्षत्रं, गुरुर्ग्रहः, देवता जातिः, शुक्लो वर्णः, प्रभावती पुरी, शुभं फलम्, ॐ भं भगणायनमः इतिमन्त्रः, इति सर्वं चतुरस्रमिति संक्षेपः ॥ १ ॥

चेतोवसूनि व्रजमानिनीनां मामोषितुं सद्वलिशालिनं॥
वेणुं शयेसन्धिमिवादधानं मान्यं युवानं जगतां नमामः॥

चेतोवसूनीति । समीचीनाभिस्त्रिवलिभिरेववलि [illegible]
(१) परहारकत्वाच्च, शोभिनीनां, श्लेषनिबन्धनतयोपमेयतावच्छेदक
स्कारेणोपमेये शब्दान्निश्चीयमानस्योपमानतादात्म्यस्य रूपकरूपत्वे(२
तद्विशेषस्य परस्परसापेक्षरूपकसमुदायात्मकस्य सावयवस्य विरहात् मा
त्मकत्वायोगाच्च केवलनिरवयवरूपकस्य सङ्करः । अतएव व्रजाभिध
देशस्य, न तु कस्य च नैकग्रामस्य । 'मानिनीनां, रामणीयक मुखानां
विषयाभिमानवतीनाम् । न तु मानिन्याः । मानसान्येव धनानि चोर
यितुम् । सद्वलिशालिनीनामित्यनेन कार्यकारणभावविधया सौन्दर्य
पूर्णतारुण्यं, तादृशीनां वसुचौर्येऽतिदुष्करत्वं, तत्र प्रवर्तनेन यूनि प्रवीणत्वं
च ध्वन्यते । चेतोहरणेन च व्रजमानिनीषु श्रीकृष्णविषयिणी प्रीतिः ।
अभिमाने सौन्दर्यादिव्यङ्ग्यद्वारा सद्वलिशालित्वस्योपयोगितया ऽनपेक्ष
णीयव्यङ्ग्य व्यापारस्य नैयायिकाभ्युपगतलिङ्गव्यावर्तकेन काव्यविशेषणे
नोपेतस्य काव्यलिङ्गस्याप्रसक्त्या पुरोक्तीरितश्लेषभित्तिक रूपकानुमाणि
ततया सङ्कीर्णः परिकरालङ्कारः । वक्रवद्भिराश्रितत्वस्य "मदीयं धनं न
केनाप्यपहर्तुं शक्यम्" इत्याद्यभिमाने साक्षादेव हेतुतया तथाभूतं काव्यलि
ङ्गं वा । चेतस्तेयस्यासम्भवितया तत्र धनतादात्म्यारोपस्य प्रकृतार्थोप
योगितया "परपेत्याम पुत्रस्य श्रावं श्रावं वचस्सुधाम् । अभिमन्युसु-
तो राजा परां मुदमवाप्तवान्" इतिरसगङ्गाधरोक्तोदाहरणवत् समासगः प-

(१) सादृश्य [illegible] रूपकत्वम् । अतएव "मुखं मनोरमा रामा" इत्यादौ [illegible] प्रसक्तिः ।
(२) [illegible] इति सार्वत्रिक [illegible] । शब्दादि [illegible] इत्यादौ [illegible] । [illegible]

-रेणामालङ्कारः । आरोपस्य प्रकृतवाक्यार्थानुकूलतायां परिणामः, तत-प्रात्वे च रूपकमित्यनयोर्विशेषः । चौर्यसाधनमनतिदीर्घाकृतिरस्त्रविभेद सिसहेति मैथिलभाषया विश्रुतस्सन्धिः तमिव वंशीं करे धारयन्तम् "शेते सर्वमस्मिन्निति शयो हस्तः,, प्रायेण कार्यमात्रस्य कराधीनत्वात्,, इति शब्दकल्पद्रुमः । सन्धेर्वेणुतया सम्भावनाया इव शब्द प्रतिपाद्यमानाया स्सद्भावात्प्रकारविशेष्ययो स्स्वपदाभिधेयतयोक्तविषया वाच्या वस्तूत्प्रेक्षा(१)लङ्कारः तयोरनेकत्वात् । सन्देहे कोटियुगलस्य साम्यमिह तु तत्रैकत्र कोटौ निर्णीत प्रायत्व मितिविवेकः । एवं भूतमपि 'जगता मखिल भुवनानाम् न तु जगतः । मान्यम् । अपेर्विरोधमभिद्धतोऽनुवृत्त्या "आभासत्वे विरोधस्य विरोधाभास इष्यते,, इति कुवलयानन्देऽप्पय्यदीक्षित विहितलक्षणस्य विरोधाभासालङ्कारस्य ध्वनिः । केचित्तु अपेरनभिधानेऽपि विरोधालङ्कारमेवाङ्गीकुर्वन्ति, तन्मते प्रकृते निरुक्तालङ्कारएवेति विभावनीयं साहित्यरसिकैः । युवानं न तु बालं स्थविरं वा, तेन सद्बलिशालिनीनां धनाहरणस्यासम्भवात् । जगतां मान्यत्वेन कार्येण भुवननिवहवर्ति जनसमुदायनिष्ठा श्रीकृष्णविषयिणीरतिर्भावात्मिका, व्रजमानिनीषु वर्तमाना तादृशीरतिश्शृङ्गाररसस्थायिभावरूपा व्यज्यमाना नमाम इत्यनेन द्योत्यमानायां कविगतायां रतौ भावेऽङ्गभावमाश्रयत इति प्रेयोऽलङ्कार रसवदलंकारयोस्संसृष्टिः । उदितरीत्या पारिभाष्य भावध्वनिः, तेनैतद्-प्यारोहुमर्हत्युत्तमकाव्यस्य पदवीम् । शब्दालंकारध्वनि संकराश्च विस्तर-भयेनाप्रपञ्चिता दर्शितदिशा सर्वत्र स्वयमूहनीया मर्नीषिभिः । प्रसादोगुणः "शैथिल्यं प्रसादः,, इति वामनसूत्रस्य (१ अधि. १ अध्याय. ६ सं.)

(१) [illegible] । [illegible] ।

चेतोवमुनि व्रजमानिनीना मानोभिनं महलिशालिनीनाः
वेणुं शयेसन्धिपगिनादभानं मान्यं गुरुनं जगतांनमामः

चेतोवरुनीति । मानीनांनामिमिरानिनिवनिनिन
(१) परहारकत्वाज्ञ, शोभिनीना, उक्तेपानिन्वननगांपभेयनाक्लेत स्कारेणोपमेये शब्दान्निर्गगमानस्योपमानतादात्म्यस्य रूपकत्वे तद्विशेषस्य परस्परसापेक्षरूपकसमुदायात्मकस्य मानयवस्य विशान स्मकत्वायोगाच्च केवलनिरवयवरूपकस्य सङ्करः । अतएव व्रजामि देशस्य, नतु कस्य च नैकग्रामस्य । 'मानिनीनां, गमणीयक नमुख विषयाभिमानवर्तीनाम् । नतु पानिन्याः । मानमान्येव धनानि यितुम् । सद्गलिशालिनीनामित्यनेन कार्यकारणभावविषया सौन्द पूर्णतारुण्यं, तादृशीनां वपुचौर्येऽतिदुष्करत्वं. तत्र प्रवर्तनेन युनि मर्वांश च ध्वन्यते । चेतोहरणेन च व्रजमानिनीषु श्रीकृष्णविषयिणी प्रीतिः अभिमाने सौन्दर्यादिव्यङ्ग्यद्वारा सद्गलिशालित्वस्योपयोगितया ऽनपे णीयव्यङ्ग्य व्यापारस्य नैयायिकाभ्युपगतलिङ्गव्यावर्तकेन काव्यविशेष नोपेतस्य काव्यलिङ्गस्याप्रसक्त्या पुरोदारितश्लेपभित्तिक रूपकानुमा ततया सङ्कीर्णः परिकरालङ्कारः । बलवद्भिराश्रितत्वस्य "मदीयं धनं केनाप्यपहर्तुंशक्यम्,, इत्याद्यभिमाने साक्षादेव हेतुतया तथाभूतं काव्यलि ङ्गं वा । चेतस्स्तेयस्यासम्भवितया तत्र धनतादात्म्यारोपस्य प्रकृतार्थोप योगितया "महर्षेर्व्यास पुत्रस्य श्रावं श्रावं वचस्सुधाम् । अभिमन्युसु- तोराजा परां मुदमवाप्तवान्,, इतिरसगङ्गाधरोक्तोदाहरणइव समासगः प-

(१) सादृश्य निमित्तकस्यैव तादात्म्यस्य रूपकत्वम् । अतएव "मुख मनोरमा रामा,, इत्यादौ नाति प्रसक्ति. ।

(२) पुरस्कारेणेत्यनेनापह्नुतिभ्रान्तिमदतिशयोक्ति निदर्शनालङ्काराणां व्युदासः । शब्दादि त्यनेन प्रात्यक्षिकाहार्य गोचरतादात्म्यस्य "मुखमिदचन्द्र,, इत्यादौ प्रत्यादेशः । निश्ची यमानस्येत्येतेनोत्प्रेक्षाया निरासः.

रिणामालङ्कारः । आरोपस्य प्रकृतकार्यानुकूलतायां परिणामः, तदन्यत्वे च रूपकमित्यनयोर्विशेषः । चौर्यमाप्तमतनिर्वाणाक्रान्तिरन्ध्रविशेष सिमहेति पौर्थिवापरा विश्रुतरमणिः नयिव वैर्गो हरे साम्यन्तम् "ज्ञेते सर्वस्मिन्नतिशयो हस्तः, प्रायेण कार्यमात्रस्य कारणाधीनत्वात्" इति शब्दकल्पद्रुमः । सन्धेर्वेणुतया सम्भावनाया इव शब्द प्रतिपाद्यमानाया स्वरूपावात्मकारविशेष्ययो रूपपदाभिधेयतयोक्तविषया वाच्या वस्तूत्प्रेक्षा(१)लङ्कारः तयोरनेकत्वात् । सन्देहे कोटिद्वयस्य साम्यमिह तु सन्देह कोटौ निर्णीत साम्यत्व मिति विवेकः । एवं भुवनानि 'जगता' इत्यत्र भुवनानाम् न तु जगतः । साम्यम् । अपेक्षितम् [illegible] "आभासत्वे विरोधस्य विरोधाभास इष्यते" इति [illegible] विहितलक्षणस्य विरोधाभासालङ्कारस्य ध्वनिः । केचित्तु [illegible] ऽपि विरोधालङ्कारमेवाङ्गीकुर्वन्ति, तन्मते अत्र निरस्तालङ्कारत्वेन विभावनीयं साहित्यरसिकैः । शुद्धानां नाम [illegible] तेन सद्धर्मचारि णीनां धनाहरणस्यासम्भवात् । जगतां [illegible] जनसमुदायनिष्ठा [illegible] तादृशी रतिः शृङ्गाररसस्याभिव्यञ्जिका [illegible] [illegible] इति [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] "[illegible] प्रकारः" इति [illegible]

---

(१) [illegible]

[illegible]

चेतोवसूनि व्रजमानिनीनामामोषितुं सद्वलिशालि[illegible]
वेणुं शयेसन्धिमिवादधानं मान्यं युवानं जगतां नमाम[illegible]

चेतोवसूनीति । समीचीनाभिस्त्रिवलिभिरेववलिनि[illegible] (१) परहारकत्वाच्च, शोभिनीनां, श्लेषनिबन्धनतयोपमेयतावच्छेदक[illegible]स्कारेणोपमेये शब्दान्निश्चीयमानस्योपमानतादात्म्यस्य रूपकरूपत्वे[illegible] तद्विशेषस्य परस्परसापेक्षरूपकसमुदायात्मकस्य सावयवस्य विरहात् सा[illegible]त्मकत्वायोगाच्च केवलनिरवयवरूपकस्य सङ्करः । अतएव व्रजाभिध[illegible] देशस्य, ननु कस्य च नैकग्रामस्य । 'मानिनीनां, रामणीयक[illegible] विषयाभिमानवतीनाम् । ननु मानिन्याः । मानसान्येव धनानि [illegible] यितुम् । सद्वलिशालिनीनामित्यनेन कार्यकारणभावविधया सौन्द[illegible] पूर्णतारुण्यं, तादृशीनां वसुचौर्येऽतिदुष्करत्वं. तत्र प्रवर्तनेन युनि सर्वाग[illegible] च ध्वन्यते । चेतोहरणेन च व्रजमानिनीनां श्रीकृष्णविषयिणी प्रीतिः अभिमाने सौन्दर्यादिव्यङ्ग्यद्वारा सद्वलिशालित्वस्योपयोगितया ऽनपे[illegible]णीयव्यङ्ग्य [illegible] नैयायिकाभ्युपगतलिङ्गव्यावर्तकेन काव्यविशे[illegible]नोपेतस्य काव्यलिङ्गस्यापन्नतया पूर्वोक्तश्लेषमिश्रित रूपकानुप्रा[illegible]ततया सङ्कीर्णः परिकराङ्कुरः । वक्रवलिशालित्वस्य "सर्वाङ्गं मनं [illegible] [illegible]" इत्यादिप्रतिपादने [illegible] हेतुतया [illegible] काव्य[illegible] [illegible] । [illegible] [illegible] [illegible] "[illegible]" [illegible] [illegible]

[illegible]

'रेणामालङ्कारः। आरोपस्य प्रकृतवाक्यार्थानुकूलतायां परिणामः, अत-थात्वे च रूपकमित्यनयोर्विशेषः। चौर्यमाधनमनतिदीर्घाकृतिरस्त्रविभेद सिंसहेति मैथिलभाषया विश्रुतस्सन्धिः तमिव वंशीं करे धारयन्तम् "शेते सर्वमस्मिन्ननितिशयो हस्तः,, प्रायेण कार्यमात्रस्य कराधीनत्वात्,, इति शब्दकल्पद्रुमः। सन्धेर्वेणुतया सम्भावनाया इव शब्द प्रतिपाद्यमानाया स्सद्भावात्मकारविशेष्ययो स्स्वपदाभिधेयतयोक्तविषया वाच्या वस्तूत्प्रेक्षा(१)लङ्कारः तयोरनेकत्वात्। सन्देहे कोटियुगलस्य साम्यमिह तु तत्रैकत्र कोटौ निर्णीत प्रायत्व मितिविवेकः। एवं भूतमपि 'जगता मखिल भुवनानाम् न तु जगतः। मान्यम्। अपेर्विरोधमभिदधतोऽनुक्त्या "आभासत्वे विरोधस्य विरोधाभासऽष्यत,, इति कुवलयानन्देऽप्पय्यदीक्षित विहितलक्षणस्य विरोधाभासालङ्कारस्य ध्वनिः। केचित्तु अपेरनभिधाने ऽपि विरोधालङ्कारमेवाङ्गीकुर्वन्ति, तन्मते प्रकृते निरुक्तालङ्कारएवेति विभावनीयं साहित्यरसिकैः। युवानं नतु बालं स्थविरं वा, तेन सद्वलिशालिनीनां धनाहरणस्यासम्भवात्। जगतां मान्यत्वेन कार्येण भुवननिवहवर्ति जनसमुदायनिष्ठा श्रीकृष्णविषयिणीरतिर्भावात्मिका, व्रजमानिनीषु वर्तमाना तादृशीरतिश्शृङ्गाररसस्थायिभावरूपा व्यज्यमाना नमाम इत्यनेन द्योत्यमानायां कविगतायां रतौ भावेऽङ्गभावमाश्रयत इति प्रेयोऽलङ्कार रसवदलंकारयोस्संसृष्टिः। उदितरीत्या पारिभाष्य भावध्वनिः, तेनैतदप्यारोढुमर्हत्युत्तमकाव्यस्य पदवीम्। शब्दालंकारध्वनि संकराश्च विस्तरभयेनाप्रपञ्चिता दर्शितदिशा सर्वत्र स्वयमूहनीया मनीषिभिः। प्रसादोगुणः "शैथिल्यं प्रसादः,, इति वामनसूत्रस्य (३ अधि. १ माध्याय. ६ सं.)

(१) साच स्वतस्सिद्धे विषयेऽसम्भावितया ज्ञातस्य सादृश्यहेतुका तादात्म्य सम्भावना। एषा चोत्कटकोटिकसन्देहः। उत्कटत्वञ्च विषयताविशेष सम्भावयामीति प्रतीतिसाक्षिकः।

चेतोवसूनि व्रजमानिनीनां मातोषितुं सद्गुलिशालिनीनाम्।
वेणुं श्रयेसन्धिमिवादधानं मान्यं युवानं जगतां नमामः॥

चेतोवसूनीति । समीचीनाभिन्निवलिभिरेनवलिभिःशब्दभाः (१) परहारकत्वाच्च, शोभिनीनां, श्लेषनिबन्धनतयोपमेयतावच्छेदक स्कारेणोपमेये शब्दान्निर्धीयमानस्योपमानतादात्म्यस्य रूपकरूपत्वे(२) तद्विशेषस्य परस्परसापेक्षरूपकसमुदायात्मकस्य सावयवस्य विरहात् माः त्मकत्वायोगाच्च केवलनिरवयवरूपकस्य सङ्करः । अतएव व्रजाभिध देशस्य, नतु कस्य च नैकग्रामस्य । 'मानिनीनां, रामणीयक गुणानां विषयाभिमानवतीनाम् । ननु मानिन्याः । मानसान्येव धनानि चोर यितुम् । सद्गुलिशालिनीनामित्यनेन कार्यकारणभावविषया सौन्दर्य पूर्णतारुण्यं, तादृशीनां वसुचौर्येऽतिदुष्करत्वं, तत्र प्रवर्तनेन यूनि प्रवीणत्वं च ध्वन्यते । चेतोहरणेन च व्रजमानिनीषु श्रीकृष्णविषयिणी प्रीतिः । अभिमाने सौन्दर्यादिव्यङ्ग्यद्वारा सद्गुलिशालित्वस्योपयोगितया ऽनपेक्ष णीयव्यङ्ग्य व्यापारस्य नैयायिकाभ्युपगतलिङ्गव्यावर्तकेन काव्यविशेषणे नोपेतस्य काव्यलिङ्गस्याप्रसक्त्या पुरोदीरितश्लेषभित्तिक रूपकानुप्राणि ततया सङ्कीर्णः परिकरालङ्कारः । वलवद्विरथितत्वस्य "मदीयं धनं न केनाप्यपहर्तुंशक्यम्,, इत्याद्यभिमाने साक्षादेव हेतुतया तथाभूतं काव्यलि ङ्गं वा । चेतस्स्तेयस्यासम्भवितया तत्र धनतादात्म्यारोपस्य प्रकृतार्थोप योगितया "महर्षेर्व्यास पुत्रस्य श्रावं श्रावं वचस्सुधाम् । अभिमन्युसु- तोराजा परां मुदमवाप्तवान्,, इतिरसगङ्गाधरोक्तोदाहरणइव समासगः प-

(१) सादृश्य निमित्तकस्यैव तादात्म्यस्य रूपकत्वम् । अतएव "मुख मनोरमा रामा,, इत्यादौ नाति प्रसक्ति ।

(२) पुरस्कारेणेत्यन्तेनापह्नुतिभ्रान्तिमदति शयोक्ति निदर्शनालङ्काराणा व्युदासः । शब्दादि त्यनेन श्रात्यक्षिकाहार्य गोचरतादात्म्यस्य " मुखमिदमब्ज ,, इत्यादौ प्रत्यादेशः । निर्धी यमानस्येत्येतेनोत्प्रेक्षाया निरास

रिणामालङ्कारः । आरोपस्य प्रकृतवाक्यार्थानुकूलतायां परिणामः, अतथात्वे च रूपकमित्यनयोर्विशेषः । चौर्यसाधनमनतिदीर्घाकृतिरस्त्रविशेषः सिंसहेति मैथिलभाषया विश्रुतस्सन्धिः तमिव वंशीं करे धारयन्तम् "शेते सर्वमस्मिन्निति शयो हस्तः,, प्रायेण कार्यमात्रस्य कराधीनत्वात्,, इति शब्दकल्पद्रुमः । सन्धेर्वेणुतया सम्भावनाया इव शब्द प्रतिपाद्यमानाया स्सद्भावात्प्रकारविशेष्ययो स्स्वपदाभिधेयतयोक्तविषया वाच्या वस्तूत्प्रेक्षा (१)लङ्कारः तयोरनेकत्वात् । सन्देहे कोटियुगलस्य साम्यमिह तु तत्रैकत्र कोटौ निर्णीत प्रायत्व मितिविवेकः । एवं भूतमपि 'जगता मखिल भुवनानाम् न तु जगतः । मान्यम् । अपेर्विरोधमभिदधतोऽनुक्त्या "आभासत्वे विरोधस्य विरोधाभासइष्यत,, इति कुवलयानन्देऽप्पय्यदीक्षित विहितलक्षणस्य विरोधाभासालङ्कारस्य ध्वनिः । केचित्तु अपेरनभिधानेऽपि विरोधालङ्कारमेवाङ्गीकुर्वन्ति, तन्मते प्रकृते निरुक्तालङ्कारएवेति विभावनीयं साहित्यरसिकैः। युवानं ननु बालं स्थविरं वा, तेन सद्वलिशालिनीनां धनाहरणस्यासम्भवात् । जगतां मान्यत्वेन कार्येण भुवननिवहवर्ति जनसमुदायनिष्ठा श्रीकृष्णविषयिणीरतिर्भावात्मिका, व्रजमानिनीषु वर्तमाना तादृशीरतिश्शृङ्गाररसस्थायिभावरूपा व्यज्यमाना नमाम इत्यनेन द्योत्यमानायां कविगतायां रतौ भावेऽङ्गभावमाश्रयत इति प्रेयोऽलङ्कार रसवदलंकारयोस्संसृष्टिः । उदितरीत्या पारिभाष्य भावध्वनिः, तेनैतदप्यारोढुमर्हत्युत्तमकाव्यस्य पदवीम् । शब्दालंकारध्वनि संकराश्च विस्तरभयेनाप्रपञ्चिता दर्शितदिशा सर्वत्र स्वयमूहनीया मनीषिभिः । प्रसादोगुणः "शैथिल्यं प्रसादः,, इति वामनसूत्रस्य (३ अधि. १ साध्याय. ६ सं.)

---

(१) सा च स्वसिद्धे विषयेऽसम्भावितया ज्ञातस्य सादृश्यहेतुका तादात्म्य सम्भावना । एषा चोत्कटकोटिकसन्देहः । उत्कटत्वञ्च विषयताविशेषः सम्भावयामीति प्रतीतिसाक्षिकः ।

"बन्धस्य शैथिल्यं शिथिलत्वं प्रसादः ,, इति वृत्तिस्वरसात । वैदर्भी रीतिः " असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी ,, इति प्रतिपादनात् । रीतौ वैदर्भ्यादि समाख्या च विदर्भगौडपाञ्चालेषु देशेषु तत्रत्यैः कविभिर्यथास्वरूपमुपलब्धत्वात् " विदर्भादिषु दृष्टत्वात्तत्समाख्या ,, इति हि वामन सूत्रम् (१ मे.अधि. २ याध्याये १० मम्) । इन्द्रवज्रावृत्तं " स्यादिन्द्र वज्रायदितौ जगौग,, इतिलक्षणादिति ॥ २ ॥

नवीन विलसत्प्रभश्रितबलाक कादम्बिनी
विडम्बन सितोरग सगति दीप्त देहद्युतिः ।
पिशङ्ग फणि सङ्गिनी शिरसि यौवनोद्भासिनी
मनागपि मदन्तरे स्फुरतु धूर्जटेः कामिनी ॥ ३ ॥

नवीनेति । वृष्टि प्राक्कालिकया विलसत्प्रकृष्टकान्तेः उपसर्गस्य वाचकत्वेन(१)प्रकृष्टत्वस्य विशेषे हेतुतया काव्यलिङ्गम् । बकपङ्क्तिश्रितायाः, न तु केवलाया, अतएव रसगङ्गाधरोक्ते "वामाकल्पित वामाङ्गो भासते भाल लोचनः । शम्प(२)या सम्परिष्वक्तो जीमूत इव शारद " इत्यत्रैव प्रतिबिम्बोपादान विरहकृता नोपपायां न्यूनपदता । जलदमालाया अनुकरण कृता धवला- हि माल्येन दीप्ता देह द्युतिर्यस्या इत्यर्थः । अत्र स्वतस्सिद्धेन वस्तुनोपमालङ्कारोऽस्ति स्फुटतया बोध्यते, सा च यथोक्तकाद- [illegible] । निरूपिता । तादृशेन चालङ्कारेण सपदि तापशान्ति कारित्वं

१) उपसर्गस्य वाचकत्व ख्याविशिष्ट घटादेर्घटपदार्थत्व प्रत्याख्यानयुक्तिभिर्व्यवस्थापनीयम् ।

श्यामल शालित्वञ्च भावपोषकं व्यज्यते । "खर्वमूर्त्तिं नीलवर्णाम्" इत्येक जटाध्यान प्रस्तावे तारा पारिजातवचनात् । न च तयोर्धर्मस्याहिमाल्य व लाकात्मकस्य पार्थक्यात्साधारणत्वाभावेन कथङ्कारमुदितालङ्कारो गम्ये तेति, वाच्यं, "कोमलातप शोणाभ्र सन्ध्याकाल सहोदरः । कषाय वसनोया ति कुङ्कुमालेपनो यतिः" इत्यादाविव प्रकृतेऽपि निरुक्तधर्मयोर्विम्वप्रति विम्वभावस्य भेदनिश्चयेऽपीच्छयैकत्वेनारोप रूपस्य सत्तया "साधारण धर्मस्य क्वचिदनुगामितयैक्य रूपेण निर्देशः विम्व प्रतिविम्वभावो वा दृष्टान्त वत्,, इत्यलङ्कारसर्वस्वकारोक्तेस्स्वसाजात्य स्वतादात्म्य स्वाभेद विषयकाहार्य्य ज्ञानगोचरत्वान्यतम सम्बन्धेनोपमानगतधर्म विशिष्टधर्म्मवत्त्व स्योपमानसाधारण धर्म्मवत्त्व परिष्कृतस्योपमेये सद्भावात् । न च स्ववृत्ति धर्मवत्व स्ववृत्ति धर्मसदृश धर्मवत्त्वान्यतरेणोपमानविशिष्टत्वस्यैवोपमाप्रयोज कत्वमास्तां कृतं क्लिष्टकल्पनयोदीरितयेति साम्प्रतं, सादृश्यस्य निमित्त सव्यपेक्षत्वेन तत्प्रवेशेऽनवस्थानात् साधारणधर्मेणोपमानोपमेययोस्तादात्म्य प्रतीति कृतस्यैव चारुत्वस्योपमायामिष्टत्वेनान्तरेण धर्मयोरभेदाध्यवसायं तदुपपादनासम्भवात् । नचैव मप्युपमानोपमेय वृत्ति धर्मस्य साधारणत्वेन तदनुपपत्तिर्निरुक्तान्यतम सम्बन्धेन धर्मविशिष्टधर्म्मस्य तथा त्वादित्यलमलङ्कार मीमांसयेति । देव्यास्सिता हि माल्यवत्त्वञ्च "स्फुरन्तीं लसच्छ्वेत नागेन्द्रहाराम्" इति ब्रह्मसंहिता प्रमाणयति । पिशंगेति । शिरसि पीतेन फणिना संगता, नतु साधारणेन भुजंगमेन । अयमेव चाक्षोभ्य ऋषिः, तथा चैकजटा प्रकरणे नील तन्त्रे "मौलावक्षोभ्यभूषिताम्,, इति । यौवनोद्भासिनीति णिनिप्रत्ययेन शीलप्रतिपादकेन यौवने सार्वकालिकत्वम वतातुभासस्य शरीरमात्रे मातुमशक्तत्वेनोद्गमनात्तदतिशयोव्यज्यते । ईषदपि तादृशी, "धूर्जटेः,, धुरन्त्रैलोक्यचिन्ताया 'जटिः'

संघातो यत्र, तस्य कामिनी, एतेन देव्यामपि त्रैलोक्य चिन्ता समुदयो द्योत्यते "स्त्रीणां हि साहचर्य्याच्चेतांसि भवन्ति भर्त्तृ सदृशानि । मधुरापि मूर्च्छयते विष विटपि समाश्रिता वल्ली,, इति अर्थान्तरन्यासालङ्कार प्रकरणेऽभिधानात् । ईषदपि स्फुरणस्य विधिना प्रार्थनयेष्ट दातृत्वं, धूर्जटेः कामिनीत्यनेन शिव विषयिणी रतिस्तत्राभिव्यज्यते । अन्य कामिन्यपेक्षया वैधर्म्य प्रतिपादनेन व्यतिरेकालङ्कारः । पुराविहित व्यङ्ग्यार्थैरूप जीवितस्य तादृश कामिनी विषयक रत्यात्मभावस्य प्राधान्येन ध्वननात् भावध्वनिः तेन चोत्तमकाव्यता । रसस्य प्रधान व्यङ्ग्यभावाङ्गतया रसवदलंकारः । ओजोमाधुर्यञ्चगुणः "गाढ़बन्धत्वमोज,, इति वामनसूत्रात् (३ अधि १ अ० सू० ५) पूर्व्वार्द्धे गौडी तृतीय पादार्द्धे पाञ्चाली ततश्च वैदर्भी रीतिः असमासातुरी योर्द्ध समासा च यथेप्सितम् । तदेकान्त समासा च विज्ञेया सा यथा क्रममिति गुणरत्ने साहित्यसारे तासां लक्षणात् ॥ वस्तुतस्तु "प्रधानेन व्यपदेशाभवन्ति,, इतिन्यायाद्गौड़ी रीतिः पादद्वयविषयकतया व्यपदेष्टुमुचिता इतररीत्यपेक्षया व्यापकत्वेन प्राधान्यादिति ॥ पृथ्वी वृत्तम् एतस्य पादेषु (।ऽ।।।ऽ।ऽ।।।ऽ।ऽऽ।ऽ) एवं क्रमेण लघुगुरुवर्णाना मुचितानां न्यासादिति ॥ ३ ॥

मुनि प्रमदनं शमोद्दीपनं वा सुधाकरम् ।
वीजं कवीनां वंशस्य प्राचेतसमुपास्महे ॥४॥

लक्ष्मीश्वरीचरिताख्या माख्यायिकां चिकीर्षुः कविस्तदङ्गतयाऽन्य कविवृत्तेषु वर्णनीयेषु प्रथमकवित्वेन वाल्मीकिमेवादौ वर्णयति मुनिप्रमदन मित्यादिना । आख्यायिकालक्षणं दर्पणे यथा "आख्यायिकाकथावत्स्या ... अस्यामन्यकवीनाञ्चवृत्तं पद्यं क्वचित् क्वचित् ।

कथांशानां व्यवच्छेद आश्वास इति कथ्यते। आर्यावक्त्रापवक्त्राणां छन्दसा येनकेनचित्। अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम्,, इति। कथालक्षणमपि तत्रैव "कथायांसरसं वस्तु गद्यैरेव विनिर्मितम् आदौपद्ये नेमस्कारः खलादेर्वृत्तकीर्तनम्, इति। आदिनाऽऽदिना चरित्रस्य द्वितीयेन सज्जनस्य परिग्रहः। आश्वासेत्युपलक्षणं लम्भोच्छ्वासोल्लासाभिधानानाम्। वक्त्रलक्षणं वृत्तरत्नाकरे "वक्त्रं नाद्यान्नसौस्यातामब्धेर्योऽनुष्टुभि ख्यातम्,,इति(१)। अपरवक्त्रलक्षणं काव्यादर्शविवृतौ"अयुजिननरलागुरुस्समे तदपरवक्त्रमिदं नजौजरौ,,[२]वैतालीयं पुष्पिताग्राञ्चेच्छन्त्यपरवक्त्रकम्,, इति। वैतालीयपुष्पिताग्रयोर्लक्षणं छन्दोमञ्जर्यां "षड्विषमेऽष्टौ समेकला स्ताश्चसमेस्युर्नो निरन्तराः। नसमात्र पराश्रिताकला(३)वैतालीयेऽन्तेरलौगुरुः। "अयुजिनयुगरेफतोयकारो युजिनुनजौ जरगाश्चपुष्पिताग्रा,, इति। केचित्तु पुष्पिताग्राभिधं छन्दऔपच्छन्दसिकमेवमन्वते, तदेतद्वृत्तरत्नाकरस्यनारायणीयव्याख्यायां प्रतिपादितन्निरस्तरेण। यत्तु "वृत्तमाख्यायतेयस्यां नायकेनस्वचेष्टितम्,, इतिवचसा ऽऽख्यायिकानिरूपण प्रकरणेयन नायक एवाख्यायिका मभिदध्या दित्युक्तं, तदयुक्तम्, "अपित्वनियमोदृष्ट स्तत्राप्यन्यै रुदीरणाद्,, इत्यार्यदण्ड्याचार्यवचन प्रामाण्यात्। एतेनात्रेतिवृत्तस्य नायका नुपनिबद्धत्वेपि नक्षतिर्लक्षणस्य। अत्र महाराज लक्ष्मीश्वर सिंहो नायकः, नायिकाच तदीयमहिषी लक्ष्मीश्वरी देवी। तच्चरित्रमितिवृत्तम्। अङ्गतया तयोः पुर्वजानामपि चरित मुपन्यस्तं व्यञ्जनया

---

१) आद्यादयराभसगणौनस्यातांतुरीयाश्रयगण स्यात्, तदतिरिक्तावर्णाश्चपादनिर्दिष्टा। स्युस्तर्हि अष्टाक्षरपादकेच्छन्दसि वक्त्र नामतद्भवति।

(२) विषमेपादे क्रमेण नगणौरगणोलघुर्गुरुश्च, समपादेनजजरगणा स्तदेतदपरवक्त्रम्।

(३) 'समा, द्वितीयाप्रभृति कला पराश्रिता न कार्या।

तयोरेव प्रशस्ततां बोधय द्रति कविमाश्रितां परिपुष्णाति, सोऽय मर्थशक्तिमूलकोऽसंलक्ष्यक्रमः प्रबन्धेध्वनि र्भावस्य । उक्तेचचरित्रे क्वचित् शृङ्गारस्य, क्वचित् वीरस्य, क्वचित् करुणायाः क्वचित् अद्भुतस्य, क्वचित् भयानकस्य क्वचित् शान्तस्य व्यञ्जकतया रसपदेनभावस्यापिग्रहणादन्ततस्तद्व्यञ्जकत्वेन सरसत्वोपपत्त्याऽऽख्यायिकालक्षणावयवसङ्गतिः, इतराण्यपि विशेषणानि स्फुटतया स्वयमेव समन्वेयानि ॥ वासुमाकर मिति वाशब्द स्सादृश्यमभिधत्ते श्रौतोपमालङ्कारविचारे "यथेववादिशब्दानाम्,, इति प्रदीपेदर्शनात् । सुमाकरं वसन्तमिव मुनीनां प्रहर्षावह महङ्कारकारणंवा, अनेनैवरूपयोऽभिमन्यन्त इति सर्वेभ्यस्तेभ्यउत्कर्षोभावाङ्गतया व्यज्यते, "प्रमदस्सम्मदे मत्त,, इतिविश्वः । परत्र मुनीनां तदाख्यविटपिनां प्रमदनं विकाशकं, प्रमदस्य चेतन धर्मतया बाधेन विकाशे जहत्स्वार्थलक्षणायां वाच्यार्थस्यात्यन्ततिरस्कृततया तदतिशयो ध्वन्यते, भवतिच वसन्ते मुनिवृक्षेषु प्रसूनोद्गमः "मुनीनामप्युत्कलिकाकरे,, इति वातवदत्तायांतस्यवर्णनात् । विपिनशोभाभिवर्धनेन तत्रवासिनांतेषां हर्षप्रदमितित्वा ॥ 'रामस्य, रामचरित्स्योद्दीपनं रामायणाभिध महाकाव्यविरचनात्मकाशकं, 'रामेण, रामेतिनाम्ना उद्दीप्यत उद्दीपनं "कृत्यल्युटोबहुलम्,, इति भगवतः पाणिने रनुशासनात्, विराजमानंवा, मरापिंदेशितेन रामनामजपेनैव महर्षित्व मसौलेभ इति पौराणिकीकथाऽत्र विज्ञेया । यद्वा रामस्य मनोज्ञस्य गङ्गावतरण विश्वामित्रवृत्त तु विलसितादे रुद्दीपनं वर्णयिताम् । अन्यत्र रामाणां रमणीनां कामाभिवर्धनम् । रामंप्रकृत्य "रामवेचासितश्वेतमनोज्ञेषु,,इति "रामाऽङ्गना,, इति विश्वप्रकाशः । इयंच श्रौती पूर्णोपमा अङ्गानां चतुर्णा मुपादानात् । एतस्याश्च श्लेषमूलकत्वं स्फुटम् । काव्यादर्शकृन्मतेतु शब्दपरिवृत्त्यसहत्वेन शब्दश्लेष निमित्त

कतया श्लेषोपमाया अप्रसक्तत्वेनेयं समानोपमा, तल्लक्षणोदाहरणे यथातत्रैव "सरूपशब्दवाच्यत्वा त्सा समानोपमा यथा। बालेवोद्यानमालेयं शालकानन शोभिनी,, इति॥ अत्रच प्रतिपाद्यतोपरागेण शब्दस्यैव साधारणधर्मत्वंबोध्यम् (१७४) पृ०रसगङ्गाधरे तत्प्रतिपादनात्। नच विद्यमानस्य शाब्दबोधावलम्बनस्यैव तथात्वेनशब्दस्य स्वजन्येशाब्दाभिधे ज्ञानेऽभासमानतया नोदितधर्मता सम्भवतीति साम्प्रतं, वैयञ्जनिकबोधेन विषयीकृतस्य शब्दस्य क्वचित्तादात्म्येन क्वचिद्वाच्यतया पदार्थांशे शाब्दबोध विषयत्वस्यालंकारिकै रुपगमात्, नहिन्यायनयइवेहापिशाब्दबोधप्रणाली, नवाविद्यमानस्य साधारणधर्मस्याभिधेयतैवेतिनियमः एवंसति नकाप्यनुपपत्तिः, अतएव "उदेति सविताताम्र स्ताम्रएवास्तमेतिच। सम्पत्तौच विपत्तौच महता मेकरूपता,, इत्यादौ प्रस्तुतस्य विशेषस्य सामान्येन समर्थनात्मके ऽर्थान्तरन्यासे नकथितपदत्वस्य दोषता प्रसक्तिः, नवा "दयातितिक्षासत्यञ्च युक्तं त्यक्तु नतुत्वया। अपवर्ग व्यञ्जनानि कथंस्यु र्भीमभूमिपे,, इत्यादौ भीमनामधेयेभूमीपतौ व्यङ्ग्येन भीमभूमिप पदेन तदात्मतयाश्रुते तथाविधेन पवर्गघटकव्यञ्जनेन तदात्मतयाश्रुतानां दयातितिक्षादीना मसम्भवस्य कथंस्यु रित्यनेन प्रतिपन्नस्य वाच्यार्थस्योपपादकतयोक्तयो श्शब्दात्मार्थयोर्गुणीभूतव्यङ्ग्यत्वानुपपत्तिरिति॥ कवीनां, लोकोत्तरवर्णनानिपुणानां, वंशएव कुलमेववंशो, वेणुः 'दीर्घत्वात् तस्य 'बीजम्, अङ्कुरकारणं, श्लेषनिमित्तकसमर्थ्यसमर्थक भावोपेतारोपयुगललक्षणकमलङ्कारः श्लिष्टपरम्परितरूपकम्। कविकुलकारण मिति वा, कविकुलस्य तत्त्वात्मक मिति वा। "बीजं रेतसि तत्त्वेच हेतावङ्कुर कारणे,, इति विश्वः। प्रचेतसो मनुसाधारणमुनेरपत्यं प्राचेतसं वाल्मीकि मुपास्महे। भावध्वनिः॥ ४॥

यद्गद्यबन्धकलनं किलसन्तनोति
काव्ये कृतौ कुशलतातिशयं सुबन्धुः ।
शक्तिस्फुरत्कविनतालि सुबन्धुराङ्घ्रि-
पङ्केरुहोऽजयदयं नितरां सुबन्धुः ॥ ५ ॥

" बाणोच्छिष्टं जगत्सर्वम् ,, इति प्रतीततमा युक्तरूपोक्तिर्बाणस्यैव प्र कवेः प्रतिपादयति सर्वतः प्रधानतां, पर मनेनापि हर्षचरिते " कवीनाम गलद्दर्पोनूनंवासवदत्तया, शक्त्येव पाण्डुपुत्राणां गतयाकर्णगोचरम्,,इत्यभि धानात् तदीयच्छायाया निज कादम्बिनीविरचने समुपादानात् तत्तथा नामलङ्कार निबन्धेषु निदर्शनदर्शनाच्च कविकुलकैरवकलाकरं महाकवि मारभ्यमाणे—तद्गद्यकाव्यमुचितस्तवंतन्निर्मातृषुप्रधानतममुदञ्चन्या यात्सुबन्धुं कीर्तयति यद्गद्यबन्धेत्यादिना , यदीय वासवदत्ताभिधा गद्यकाव्यस्य 'कलनं, सामान्य दर्शनं किलेतिनिश्चये, काव्यनिर्माणे निपु तरतां सम्यक् विस्तारयति न तु केवलं करोति, यस्यकलनमपि कुशलता तिशयं सन्तनोति किमुत तत्समाकलन मित्यर्थस्य प्रतीयमानतया दण्डा पुपिकयाऽर्थान्तरापतनात्मिकाया अर्थापत्त्यलङ्कृतेर्ध्वनिः । सुबन्धुः शोभनो ऽशयेनवा बन्धुस्तत्कृत्यकरणात्कवीनां श्रवणादिनानन्दनत्वेन परेषामर्पा सुबन्धुनाम्नि योगरूढत्वं व्यङ्ग्य मभिधयेवावयववृत्त्यापि तत्कविप्रत्या कत्वात् । 'शक्त्या, "नरत्वं दुर्लभंलोके विद्या तत्र सुदुर्लभा, कवित दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा,, इत्याग्नेयाभिनन्दितेनानुपहसनीयकाव्य कारणतावच्छेदकतयाऽनुमितेन जातिविशेषेणाखण्डोपाधिनावा प्रतिभात नावच्छिन्नाया श्शब्दार्थयुगलोपस्थिते रसाधनत्वेन शक्नोत्यनया काव्यं क मितिव्युत्पत्तिवलऌभ्येनादृष्ट परपर्यायेण संस्कारेण, 'स्फुरतां,' प्रतिभाशा

किन्ना, कवीनां नमनान्येव मधुलिह स्तै श्शोभनं चरणपङ्कजं यस्य तादृशः । समस्तवस्तु विषयं साङ्गरूपकमलङ्कारः । "समस्तवस्तुविषयं श्रौताआरोपितायदा,, इति काव्यप्रकाशलक्षणात् । नतुपरम्परितं, नतावल्लित्वारोपमन्तरेणापि चरणे पङ्कजस्यारोपयितुं शक्यत्वात् । 'अयं, सः, ननु यच्छब्दस्य पूर्वार्धगतत्वेनोत्तरार्धे तदोऽभावेनानुपपत्ति रितिचेत्, न, "योऽविकल्पमिदमर्थमण्डलं पश्यतीश निखिलं भवद्वपुः । आत्मपक्षपरिपूरितेजगत्यस्य नित्यसुखिनः कुतोभयम्,, इत्यादाविदमोऽपि तच्छब्द समानार्थकतायाः प्रदीपादौ व्यवस्थापितत्वात् । सुबन्धु रेत-न्नामधेयः । अजयदित्यत्रातीतकालिकोत्कर्षस्य पूर्वोक्त विशेषणानुगुणक-तया साक्षारूपं काव्यलिङ्गम् । इहापि न समाप्त पुनरात्तता, विशेष्य वाचक पदस्यपश्चादभिधानात् । सत्कविश्रिताभिर्नमनानुभावेन व्यज्यमा-नाभीरतिभिः परिपोषितायाः प्रकृतकविनिष्ठाया स्सुबन्धुविषयिण्यारते र्विच्छित्तिविशेषाधायकत्वेनध्वनिः तथा च प्रेयोऽलङ्कारोऽपि । वसन्तति लकावृत्तम् "ज्ञेयंवसन्ततिलकं तरसाजगौग,, इतिहि तल्लक्षणम् ॥ ५ ॥

सकलं प्रसादयन्ती विमलतमा धूतविधुमाना ।
नवकामिनीव कविजनशरणा सावाणभारती भाति ॥६॥

सुबन्धुकवेः परस्तादौचित्येन महाकवि वाणं वर्णयति 'सकलमिति नव कामिनीव' 'नतु कामिनीव नवा नवयोषिदिव, 'सकलम्, अशेषं कलोपेतं वाजनं 'प्रसादयन्ती, प्रसन्नतां नयन्ती नतु प्रसादितवती प्रसादयिष्यन्ती वा, अभिहितंहि दृष्टान्तालङ्कारे दर्पणकृता "अविदितगुणाऽपि सत्कवि भणितिः कर्णेषु वमति मधुधाराम् । अनधिगतपरिमलापिहि हरतिदृशं मालतीमाला, इति । अन्यत्र 'सकलं, निखिलं युवानं वा । 'सकलं, स

मधुरध्वनि । भूषणानामित्यर्थात्, एतच्च प्रमत्तानामयोजके शिञ्जनं तादात्म्येनान्वेति, अतएवमन्दं गच्छतीति शङ्कितीया, भूषणक्वणत्कारेणाऽ पन्तीतियावत् दिति वा । यद्वा 'मकलं, मानलोकनं पुरैवैतद्दपि शिञ्जनं पारविशेषणम् अवलोकनेन प्रसादयन्तीत्यर्थः । लावण्यातिशयो व्यज्यते "कलास्यान्मूलविद्धौ शिल्पादावंशमात्रके । षोडशांशेन्च चन्द्रस्य कला कालयोः कला । कलं शुक्रे कलोजीर्णेऽप्यव्यक्त मधुरध्वनौ ,, इति विश्वप्रकाशः । विमलतमादुश्श्रवत्वादिना शब्दगतेन, अपुष्टार्थत्वादिनाऽर्थगतेन, स्वशब्दाभिधेयत्वादिना रसगतेन, उद्देश्यप्रतीतिविघातप्रयोजकत्वलक्षणेन दोषेणरहिता, परत्रनानाविधै र्यक्षकर्दम प्रभृतिभि रङ्गरागै रति निर्मला । अतएव 'धूतः, तिरस्कृतः । विधो श्चन्द्रमसो, 'मानः, उज्ज्वलताभिमानोयया, चन्द्राधिकसमुज्ज्वलेतियावत् । इतरत्र 'मान स्सौन्दर्याभिमानः' वियोगिक्लेशावहत्वेन सकलप्रसादकत्वस्य कलङ्कितया विमलतमत्वस्य विधौविरहात् कविजनशरणत्व साधारणधर्मसद्भावाद्रम्यसादृश्यो निरुक्तनिमित्तको व्यतिरेकालङ्कारः श्लेषसंकीर्ण इत्यनयोस्सङ्करः। व्युत्पत्ति वैशद्योपयोगि भूयोवलोकनविषयतया परत्रवर्णनीयतया कविजनस्यशरण भूता । यद्वा कविजनएवशरणं यस्या इत्यर्थः, प्रभवन्ति च विलोकितवात्स्यायनीयाः कवयएव नवकामिनीं रक्षितु मित्याशयः । 'सा बाणभारती, प्रसिद्धा हर्षचरितकादम्बिनीरूपा बाणस्य सरस्वती । अत्र च तच्छब्दस्य प्रसिद्धार्थकत्वेन "कला च साकान्तिमतीकलावतः,, इत्यत्रेवनयच्छब्दापेक्षा, प्रक्रान्त प्रसिद्धानुभूतव्यतिरिक्तार्थकस्यैवतदस्तदपेक्षणात् । इह पूर्वार्धस्थितयो र्विशेषणयो र्व्यतिरेकपोषकत्वेन तदन्तिके कविजनशरणे त्युपादानं व्यतिरेकाङ्गत्वविभ्रमावहतया नोचित मिति विधुकामिनी भारतीनां साधारणधर्मता प्रतिपत्तये द्वितीयार्धे तदवस्थापनं तथेति नापदस्य

पदत्वदोष प्रसङ्गः । प्रथममियं कामिनी तत्रापि नवीना इतीदमीयो पम-याऽति स्पृहणीयत्वं बाणभारत्यां व्यज्यते । भावध्वनिः । उद्गीतिश्छन्दः-सम् "आर्याशकलद्वितये विपरीते पुनरिहोद्गीतिः, इतितल्लक्षणम् । न च तुरीयचरणे सप्तदशवसन्तिमात्रो इतिनोक्तलक्षणेन गत मितिशङ्क्यं, पादान्तस्यलघोर्गुरुत्वस्य "गन्ते,, इति पिङ्गलसूत्रेण प्रतिपादनात्, अत एव पारिजातहरणनाटक इन्द्रायकुपितस्य वैनतेयस्योक्तौ "सिन्दूरपूरकृत गैरिकरागशोभे शश्वन्मदस्रवणनिर्झरवारिपूरे । सङ्ग्रामभूमिगतमत्तसुरेभ-कुम्भकूटे मदीयनखराशनयो विशन्तु ,, इत्यत्रनवसन्ततिलकालक्षण-क्षतिः, इति ॥ ६ ॥

शुद्ध मतिभेद मसृतप्रकृति श्रेयोमनीष मतिहृद्यम् ।
परमार्थसत्प्रवृत्ति ब्रह्मात्मा वस्तु सज्जनो जयति ॥७॥

ब्रह्मासाधारणधर्मप्रदर्शनेन तदात्मतया सज्जन माख्यायिकाङ्गतयावर्णयति शुद्धमिति । निर्मलमानसं, परत्र सत्त्वादि गुणत्रयोपेतया विचित्रानेकश-क्तिशालिन्या ऽघटितघटनापटीयस्या सदसद्भ्या मनिर्वचनीयया ऽनादिभाव रूपत्वेसतिज्ञाननिवर्त्यया भ्रमोपादानभूतया ऽहमज्ञोनजानामीति प्रतीति साक्षिण्या "विवादपदं प्रमाणज्ञानं स्वप्रागभावातिरिक्त स्वविषयावरण स्व निवर्त्य स्वदेशगतवस्त्वन्तर पूर्वकम्,अप्रकाशितार्थप्रकाशत्वा दन्धकारे प्रथ-मोत्पन्न प्रदीपप्रभावत्,, इत्यनुमानेन "सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं नविदन्त्यनृतेन प्रत्यूढा,, (छ) इति श्रुत्याच सिद्धया ऽभाव ज्ञानस्यप्रति योगितावच्छेदकरूपेण प्रतियोगिज्ञानपूर्वकतया ब्रह्माहंनजाना-मीत्यादि प्रतीतेरन्यथोपपादनस्याशक्यत्वेनावश्यंकल्पनीयाया विषयताया-निरूपिकया "एवमेवैषामाया स्वाव्यतिरिक्तानि परिपूर्णानिक्षेत्राणि दर्श-

यित्वा जीवेशावाभासेनकरोति मायाचाविद्याचस्वयमेवभवति,, इति श्रुत्या सिद्ध मायैक्यया शुद्धमलिनसत्त्वाभ्यां विक्षेपावरणशक्तिभ्यां वा प्रधानाभ्यामुपाधिभ्यांकल्पिततद्भेदया ऽविद्ययाऽनवच्छिन्नम् । “ निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्,, इति (श्वे. ६ अ.) श्रुते रञ्जनपदस्योक्तार्थकत्वात् । “ आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेवकेवला, इति संक्षेपशारीरकानुसाराच्छुद्धब्रह्मणो वाचस्पतिमिश्रोक्तयुक्तेर्जीवस्यवाऽविद्याश्रयत्वमित्यन्यदेतत् । अविद्यायां चित्प्रतिविम्वो विम्वत्वाक्रान्त चैतन्यं वेश्वरः अन्तष्करणे चित्प्रतिविम्वोजीवः शुद्धचैतन्यं ब्रह्मेति पृथग्विधानि मतानि प्रत्यपादिपत सिद्धान्तलेशे ॥ ‘भेदं, विग्रह मतिक्रान्तं विग्रहरहितमितियावत् । परत्र सजातीयेन विजातीयेनवा यद्द्वैतं तदतिक्रान्त मद्वितीयमित्यर्थः “एकमेवाद्वितीयं ब्रह्म,,इति(छा.वृ.) श्रुतेः । न च द्वितीयस्यसत्त्वेऽसत्त्वेवोभयथाप्यद्वैतंव्याहन्येतेतिशङ्कितुं शक्यं,नहिवयं व्यावहारिकीमपि प्रतिषेधामो द्वितीयेसत्तां किन्तु पारमार्थिकीम्(१) । अन्योन्याभाव पृथक्त्ववैधर्म्य भिन्नलक्षणयोगित्वलक्षणस्यचतुर्विधस्यापि भेदस्य “प्रागलोपाविनिगम्यत्व प्रमाणापगर्पभवेत् । अनवस्थितिमास्थातुरचिकित्सात्रिदोषता,, इत्यादिभिः खण्डनखाद्ये, प्रत्यक्तत्त्वप्रदीपिकाया(२)द्वितीयपरिच्छेदे विस्तरेण प्रत्याख्यातत्वात् । नचैवं द्वैतप्रपञ्चस्य मृषात्वेकथङ्कारमप्रताश्रुत्यादिप्रमाणेनाद्वैतं ब्रह्मसिद्धयेदितिवाच्य मादर्शस्थवदनदृष्टान्तेनाभासोऽपि प्रत्यायकत्वस्याद्वैतसिद्ध्यादौ व्यवस्थापनात् । नच प्रत्यक्षादिप्रमाणानामत्रविरोधः शब्द प्रमाणानां तदपेक्षयाबलीयस्त्वात् । युक्त्या दयस्तत्रानुग्राहकारिभूता इति ॥ यद्वा ‘शुद्धः, कल्मषापगतोऽको, ‘प्रति

(१) [illegible] (२) [illegible] ।

भेदो, ज्ञानविशेषो, यस्य, अन्यत्र 'शुद्धयाऽनवच्छिन्नया 'मत्या, चैतन्येन भेद इतरेभ्यो व्यावहारिकोपस्येत्यर्थः । अन्तःकरण तद्वृत्त्याद्यनवच्छिन्नस्यैवहि चैतन्यस्य ब्रह्मात्मता "नित्यं विज्ञान मानन्दं ब्रह्म,, इति (तै-भृ-व-) श्रुतेः विज्ञानपदेनहि निरुक्तमेवा भिधीयते चैतन्यम् अन्तःकरणावच्छिन्नस्यचतस्य प्रमातृचैतन्यत्वं, तद्वृत्त्यवच्छिन्नस्यच प्रमाणचैतन्यत्वं, विषयावच्छिन्नस्य च प्रमेयचैतन्यत्वं मायावच्छिन्नस्यचेश्वरत्व मित्येभ्यो भेदस्तस्यशुद्धतयेतितात्पर्यम् तदुक्तं "मोहातीतोविशुद्धोमुनिभिरभिहितो मोहसङ्क्रान्तमूर्तिः । साक्षीस्वान्तेतदुत्थेप्रतिफलितवपुर्गीयतेऽसौ प्रमाता, वृत्त्यारुढः प्रमाणंफलमपिधिषणावृत्तिसंव्याप्तचैत्यो पाधिर्मोहोत्थशब्दप्रमुखविषयगःस्यात्प्रमेयः परात्मा इति,, स्फुटमेतद्वेदान्तपरिभाषायामपि। "भेदो द्वैधेविशेषेस्या दुपजापे विदारणे,, इति मेदिनी विश्वप्रकाशौ॥ 'अमृतस्येव, सुधायाइवानन्दना प्रकृतिः शीलंयस्य, अन्यत्र अमृतं मोक्षः निरतिशयसुख मितियावत् तदेव प्रकृतिस्स्वरूपं यस्य "तं विद्याच्छुक्र ममृतम्,, इति (क०२अ-) "योवैभूमातदमृतम् इति (छा-७-प्र-) श्रुतिभ्याम् । नचैवं मोक्षस्य साध्यत्वाभावेन तमुद्दिश्य श्रवणादौ प्रवृत्तिर्नजायेतेतिवाच्यं, सिद्धत्वेपितस्यासिद्धत्वभ्रमेण तदुपपत्तेः । दृष्टश्चलोकेऽपि विस्मृतस्वकण्ठगतसौवर्णभूषण स्तदवाप्तयेप्रवर्तमानः । ननूक्तसुखस्य मोक्षत्वे प्रमाणाभाव इतिचेन्न, "ब्रह्मविद्ब्रह्मैवभवति,, इति (तै-) श्रुतेः । यत्तु वैषयिकानन्दस्य मुक्तित्वमुक्तं, तत्र मुक्तिदशायां भेदापत्तौ "यत्रत्वस्यसर्वमात्मैवाभूत्,, इति (बृ.) श्रुति विरोधो दुष्परिहरएवस्यात् । किञ्चतत्राभावेनशरीरस्यतज्जन्यमात्रमुदितानन्दो नोत्पत्तुमीष्टे, नचतत्रशरीरमपि कल्पयितुंशक्यम्, "अशरीरंवावसन्तं प्रियाप्रियेनस्पृशतः,, इति (छा.) श्रुतिर्हिव्याकुप्येत । नवालोकान्तरगमनमपि सम्भवतिब्रह्मविदां, "न-

४

तस्य [illegible] ममात्मा[illegible],, [illegible]
[illegible] 'अगत, नित्या, प्रकृतिनिरपेक्षः [illegible] । [illegible]
[illegible] [illegible] [illegible]
[illegible] [illegible] । [illegible]
प्रधानमात्मा[illegible],, इति [१.४] श्रुतिः । [illegible]
अपृथक्प्रकृतिसिद्धिरिदं, तत्र प्रकृतौ [illegible], प्रकृतिः, प्रकृष्टाकृतिः [illegible]
पारो यस्यासः । दृष्टान्तेन [illegible] यथा आदित्यो[illegible],,
अग्निर्यथा[illegible] यजमानः [illegible], गोवर्धिक इत्यादयः, [illegible]
कत्येन । परत्र 'अमृतं, मुक्तिस्वरूपमविनाशिना "अविनाशी वा अरे अ-
यमात्मा,, इति (वृ.) श्रुतेः प्रकृति, रुपादानं निमित्तंवा, "यतोवा इ-
मानिभुतानिजायन्त,, इति (तै.) श्रुतेः । अभिहितंचैतत् "जन्माद्यस्य
यतः,, (१अ.प्र.पा.२सू.) "प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुपरोधात्,, (१अ.
३.पा.सू.) इति वैयासिकसूत्रभाष्येश्रीशङ्करपादैः । तयोराद्यंद्विविधं विव
र्तोपादानत्व परिणामोपादानत्वभेदात्, तत्रप्रथमं ब्रह्मणः विषमसत्ताक का
र्यापत्ते विवर्तत्वात्, द्वितीयन्त्व विद्यायाः समसत्ताक कार्यापत्तेः परिणा
मत्वात् ॥० श्रेयोमनीषमिति । श्रेयसि पुण्ये श्रेयसी श्रेष्ठावा 'मनीषा
मतिर्यस्येत्यर्थः । श्रेयसिकैवल्ये मनीषायस्येतिवा निश्शेषसुखद्योतिका
मैहिकी मामुष्मिकीमपि दुःखानुषङ्गिणी माकलयन्तः केवलं कैवल्यमेवात
दृश माकलय्यतदर्थं प्रयतन्तेसाधवः,प्रतिपादितञ्च पातञ्जलदर्शनस्य साध
पादेसर्वस्य मुख्यगौण साधारणं दुःखत्वं "परिणाम ताप संस्कारै र्गु
वृत्ति विरोधाच्च दुःखमेवसर्वं विवेकिन,, इतिसूत्रेण, [१५] दुःखविभा
प्रकरणेच न्यायवार्तिककारैः । अन्यत्र श्रेयस्साधनत्वाच्छ्रेयसी मुक्तिकारि-
णी, मनीषा ज्ञानंयस्येति "श्रोतव्यो मन्तव्यो निदिध्यासितव्य स्साक्षा

स्कर्तव्यश्च,, इति (बृ०) "तमेवविदित्वाऽतिमृत्युमेति,, इति [पु० सू०] "ब्रह्मविदाप्नोतिपरम्,, इति (तै०ब्र०व०२) श्रुतिभ्यः । तत्र चतुर्णा श्रवणादीनां प्राधान्यं पूर्वपूर्वापेक्षयोत्तरोत्तरस्य विज्ञेयम् । श्रवणमननिदिध्यासनेषु प्रथमं प्रधान मितरयोस्त्वाराादुपकारक तयाङ्गत्व मितिकेचित् । मोक्षहेतुत्वञ्चतस्याविद्यादिसकलद्वयस्य निवृत्तिद्वाराऽवसेयं, नचजन्यत्वेन ब्रह्मरूपतामवाप्तु मशक्नुवत्या स्तस्याअविनाशेऽद्वैतभङ्गः, विनाशेचानवस्थाप्रसङ्ग इतिवाच्यं, तत्त्वज्ञानस्या विद्यादिसकलद्वयपाश्रय कालपूर्वत्वा भाव नियमादिति ॥ "पुण्यश्रेयसी सुकृतं,, "श्रेयोनिःश्रेयसामृतं,, श्रेयान् श्रेष्ठः पुष्कलस्यात्, इत्यमरः ॥ ० ॥ अतिहृद्य मुपकारकत्वा त्परमाभीष्टं जनानां, परत्रापि प्रानन्दात्मकत्वेन, "विज्ञानमानन्दं ब्रह्म,, इति [तै.आ] "आनन्दोब्रह्मेतिव्यजानात्,, इति [तै.आ.] "एतस्यैवानन्दस्यान्यानि भूतानिमात्रा मुपजीवन्ति इति (तै.) श्रुतिभ्यः । नचैवम् "आनन्दो ब्रह्मणोरूपंतच्चमोक्षेप्रतिष्ठितम्,, इतिस्मृतिविरोधः ! तस्याश्श्रुत्यपेक्षयाद्दुर्बलत्वात् "औदुम्बरीं स्पृष्ट्वोद्गायेत्,, इति श्रुते "स्तासर्वा वेष्टयितव्या,, इति स्मृत्या विरोधे प्राप्ते श्रुतेः प्राबल्यं स्मृति विरोधाधिकरणे "विरोधेत्वनपेक्षंस्या दसतिह्यनुमानम्, इत्यनेन (न्याय० १अ.) भगवता जैमिनिना सिद्धान्तितम् । नचतथापि " आनन्दं ब्रह्मणो विद्वान ,, इति (क०) श्रुतिविरोधः, गुणगुणिभावसम्पादकस्य समवायस्य " समवायाभ्युपगमाच्च साम्यादनवस्थितेः ,, इति (ब्र२अ० पा०) सूत्रभाष्यभामत्यां विस्तरेण प्रत्याख्याततयोक्तश्रुते रारोपितभेद विषयकत्वात् । प्रकृतमनुसरामः अन्तःकरणपरिणामात्मकस्य सुखस्य क्षयित्वेन दुःखसम्भिन्नत्वेनच हेयत्वमेव, ब्रह्मणश्च केवलनित्य निरतिशयसुखात्मतया युक्तमेवाति प्रियत्वम् " सोऽन्वेष्टव्यः सोविजिज्ञासितव्यः,, इति (छा०) श्रुतेः । यद्वा

प्रस्तुते हृदि मनसिभवं हृद्यमिति व्युत्पत्त्या हृद्यं मनोज, मतिक्रान्तं
कामं जितेन्द्रिय मितियावत् । इतरत्र हृद्यं ज्ञानादि मनोधर्म भूतं
परिणामात्मकम् " काम स्सङ्कल्पो विचिकित्साश्रद्धाऽश्रद्धा धृति रधृति
र्ह्रीर्धीर्भी रित्येतत्सर्वं मनएव ,, इति " विज्ञानं यज्ञं तनुते, इति, (तै०)
श्रुतिभ्यां मनसएव सुखदुःखाद्यखिलानर्थाश्रयत्वमति पादनात् । यद्यपि
तत्क्षेत्रज्ञसाधारणत्वादन्याख्येयं, तथापि ज्ञानसुख दुःखेच्छाकर्तृत्ववन्धा-
श्रयाहङ्कारतादात्म्याध्यासानधिष्ठानत्वरूपस्यातिक्रान्तपदार्थस्य विवक्षित-
त्वेन नोक्तापत्तिः, भवतिहि अहंजानामि सुखी दुःखीच्छामि करोमीति
व्यवहारः । " स्वान्तं हृन्मानसंमनः ,, " अभीष्टं दयितं हृद्यम् ,, इति
हृद्यं धवलजीरेच हृत्प्रिये हृद्भवेऽपिच ,, इत्यमर विश्व प्रकाशौ ॥ अथवा
" अति हृद्यं ,, प्रशस्तहृद्यम्, एतदेकविधमेव पक्षद्वितयसाधारणम्, इतरे-
ष्वपि यद्यपिहृद्य—त्वमात्रमस्ति, परञ्च प्राशस्त्य मस्मिन्नेवेत्याशयः ॥
यद्वा 'हृद्यं, हृदिष्ट कारकम् " हृद्यं जवनेऽथत्रिषु हृज्ज हृद्धित हृ-
त्प्रिये,, अतिशब्दः प्रशंसायां प्रकर्षे लङ्घनेऽपिच,, इतिमेदिनी ॥ यद्वा
अतिहृत् मनोऽतिक्रान्तं, मनोऽगोचर इतियावत् यंज्ञानात्मकम् "यन्मनसा
नमनुत,, इतिश्रुतेः, "अवाङ्मनसगोचरम्,, इतिस्मृतेः, "यतोवाचो निव-
र्तन्ते अप्राप्यमनसासह,, इतिगीतानिरुक्तेश्च । साधुपक्षेऽतिहृत् यो यशोयस्ये-
त्यर्थः मनसाप्यालोचनानर्हं यशस्क इति विवरणम् "यशोयः कथितः
प्राज्ञैर्यो वायुरिति शब्दितः । याने यातरि यस्त्यागे कथित श्शब्दवेदिभि
रित्येकाक्षर कोशाभिधानात्, नचैतस्य ज्ञानार्थकत्वं नायात मितिदेश्यं,
"येगत्यर्था स्तेज्ञानार्था ,, इति वचनेन यानशब्दस्य ज्ञानार्थकत्वस्यान
पायात्, अतएवानते स्सार्वकालिकगमनाभिधायकत्वेऽपि अततीत्यात्मेति
[illegible] पदस्य ज्ञानाश्रयवाचकत्व मनेकत्रोपपादितं साधुसङ्गच्छते ॥०॥

परमार्थसत्प्रवृत्तीति, परमोऽर्थोयस्मात् यस्येतिवा, आद्येऽर्थपदं प्रयोजन परं प्रकृष्टप्रयोजनसम्पादक मिति यावत्, द्वितीये निवृत्तिपरं, साच वाच्य विषयात् । सन्, साधुः, नचानन्वयप्रसङ्गः उद्देश्यताया विधेयतावच्छेदकेनावच्छेदत्वा दितिदेश्यं पक्तापचतीत्यादि वाक्य प्रामाण्यानुरोधेन किञ्चिद्भागस्याप्यपूर्वत्वे विशिष्टस्य विधेयत्वसम्भवेन विधेयांशेऽधिकावगाहिन श्शाब्दबोधस्या भ्युपगन्तु मुचितत्वात् । 'सन्, प्रशस्त इतिवा वेद्यमान इतिवा, सुधीरितिवा, । एतेन कत्रार्थे सत्पदस्य द्विधोपादाने, 'रतलीलाश्रमं भिन्ते सलीलमनिलोवहन्,, इत्यादाविव कवे निर्माण सामग्री दारिद्र्यस्योन्नयनेन श्रोतुर्विमुखतापादनेनच कथितपदत्वस्य दोषताप्रसक्ति रिति निरस्तम् । एतस्यच समासेऽपि सम्भवेन पददोषतायाः प्रसङ्गे वाक्यदोषतैव कथमालङ्कारिकैरभि हितेत्यन्या विचारणेत्युपरम्यते ॥ प्रकृष्टावृत्तिः प्रवृत्ति राचरणं यस्य, नहि साधवो निषिद्धमाचरन्ति । सती प्रवृत्तिर्यस्येतिवा । 'परमार्थेसती, परमार्थानुकूला प्रवृत्तिर्यस्येतिवा । परस्य मार्थे सम्पत्तये सत्प्रवृत्ति र्यस्येतिवा । प्रकृष्टाभिधेये 'सति, ब्रह्मणि प्रवृत्तिर्यस्येतिवाऽर्थः । अन्त्ये साक्षात्कारानुकूलत्वं सप्तम्या वोध्यते । " अर्थः प्रकारे विषये वित्तकारणवस्तुषु, अभिधेयेऽपिशब्दानां निवृत्तौच प्रयोजने,, इति विश्वप्रकाशः । "सन् साधौ धीर शस्तयोः । मान्ये सत्ये विद्यमाने त्रिषु साध्व्युमयोः स्त्रियामिति मेदिनी । " ॐ तत्सदितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृतः, इति भ० गीता । परत्र 'परमार्थसत्, कालत्रयावाध्यं, "तस्यहवा एतस्य ब्रह्मणोनामसत्यम्,, इति (छा०) श्रुतेः "सत्यंज्ञान मनन्तं ब्रह्म,, इति [तै०] श्रुतेः, " सच्चिदानन्दविग्रहम्,, इतिस्मृतेश्च सत्यत्वस्य मिथ्यात्वाभावतया तस्यच वाधितत्वात्मत्वेन निरुक्त रूपत्वात्, एतेतेच पारमार्थिक व्यावहारिक प्रातीतिकसत्ता भेदेन

प्रस्तुते हृदि मनसिभवं हृद्यमिति व्युत्पत्त्या हृद्यं मनोज, मतिक्रान्तं कामं जितेन्द्रिय मितियावत् । इतरत्र हृद्यं ज्ञानादि मनोधर्म भूतं परिणामात्मकम् " काम स्सङ्कल्पो विचिकित्साश्रद्धाऽश्रद्धा धृति र्ह्रीर्धीर्भी रित्येतत्सर्वं मनएव ,, इति " विज्ञानं यज्ञं तनुते, इति, (तै०) श्रुतिभ्यां मनसएव सुखदुःखाद्यखिलानर्थाश्रयत्वमति पादनात् । यद्यपे तत्क्षेत्रज्ञसाधारणत्वादव्याख्येयं, तथापि ज्ञानसुख दुःखेच्छाकर्तृत्ववन्ना श्रयाहङ्कारतादात्म्याध्यासानधिष्ठानस्वरूपस्यातिक्रान्तपदार्थस्य विवक्षित त्वेन नोक्तापत्तिः, भवतिहि अहंजानामि सुखी दुःखीच्छामि करोमीति व्यवहारः । " स्वान्तं हृन्मानसंमनः,, " अभीष्टं दयितं हृद्यम्,, इति हृद्यं धवलजीरेच हृत्प्रिये हृद्भवेऽपिच ,, इत्यमर विश्व प्रकाशौ ॥ अथवा " अति हृद्यं ,, प्रशस्तहृद्यम्, एतदेकविधमेव पक्षद्वितयसाधारणम्, इतरे ष्वपि यद्यपिहृद्य—त्वमात्रमस्ति, परञ्च प्राशस्त्य मस्मिन्नेवेत्याशयः ॥ यद्वा 'हृद्यं, हृदिष्ट कारकम् " हृद्यं जवनेऽथत्रिषु हृज्ज हृद्धित हृ त्प्रिये,, अतिशब्दः प्रशंसायां प्रकर्षे लङ्घनेऽपिच,, इतिमेदिनी ॥ यद्वा अतिहृद् मनोऽतिक्रान्तं, मनोऽगोचर इतियावत् यंज्ञानात्मकम् "यन्मनसा नमनुत,, इतिश्रुतेः, "अवाङ्मनसगोचरम्,, इतिस्मृतेः, "यतोवाचो निव र्तन्ते अप्राप्यमनसासह,, इतिगीतानिरुक्तेश्च । साधुपक्षेऽतिहृद् यो यशोयस्य तस्यर्यः मनसाप्यालोचनानर्ह यशस्क इति विवरणम् "यशोयः कथितः प्राज्ञैर्यो वायुरिति शब्दितः । याने यातरि यस्त्यागे कथित श्शब्दवेदिभि रित्येकाक्षर कोशाभिधानात्, नचैतस्य ज्ञानार्थकत्वं नायात मितिदेश्यं, "येगत्यर्था स्तेज्ञानार्था ,, इति वचनेन यानशब्दस्य ज्ञानार्थकत्वस्यान पायात्, अतएवातते स्सार्वकालिकगमनाभिधायकत्वेऽपि अततीत्यात्मेति योगेनात्मपदस्य ज्ञानाश्रयवाचकत्व मनेकत्रोपपादितं साधुसङ्गच्छते ॥०॥

रमार्थसत्मवृत्तीति, परमोऽर्थोयस्मात यस्येतिवा, आद्येऽर्थपदं प्रयोजन परं प्रकृष्टप्रयोजनसम्पादक मिति यावत, द्वितीये निवृत्तिपरं, साच वाच्य विषयात् । सन, साधुः, नचानन्वयप्रसङ्गः उद्देश्यताया विधेयतावच्छेद-केनावलीढत्वा दितिदेश्यं पक्तापचतीत्यादि वाक्य प्रामाण्यानुरोधेन किञ्चिद्भागस्याप्यपूर्वत्वे विशिष्टस्य विधेयत्वसम्भवेन विधेयांशेऽधिकाव-गाहिन श्शाब्दबोधस्या भ्युपगन्तु मुचितत्वात् । 'सन, प्रशस्त इतिवा वेद्यमान इतिवा, सुधीरितिवा, । एतेनै कत्रार्थे सत्पदस्य द्विधोपादाने, 'रतलीलाश्रमं भिन्ते सलीलमनिलोवहन,, इत्यादाविव कवे निर्माण सा-ामग्री दारिद्र्यस्योन्नयनेन श्रोतुर्विमुखतापादनेनच कथितपदत्वस्य दो-तामसक्ति रिति निरस्तम् । एतस्यच समासेऽपि सम्भवेन पददोषतायाः रसङ्गे वाक्यदोषत्वेव कथमालङ्कारिकैरभि हितेत्यन्या विचारणेत्युपरम्यते ॥ प्रकृष्टावृत्तिः प्रवृत्ति राचरणं यस्य, नहि साधवो निषिद्धमाचरन्ति । सती प्रवृत्तिर्यस्येतिवा । 'परमार्थेसती, परमार्थानुकूला प्रवृत्तिर्यस्येतिवा । परस्य मार्थे सम्पत्तये सत्प्रवृत्ति र्यस्येतिवा । प्रकृष्टाभिधेये 'सति, वृह्मणि प्रवृत्तिर्यस्येतिवाऽर्थः । अन्त्ये साक्षात्कारानुकूलत्वं सप्तम्या वोध्यते । " अर्थः प्रकारे विषये वित्तकारणवस्तुषु, अभिधेयेऽपिशब्दानां निवृत्तौच प्रयोजने,, इति विश्वप्रकाशः । "सन् साधौ धीर शस्तयोः । मान्ये सत्ये विद्यमाने त्रिषु साध्व्युभयोः स्त्रियामिति मेदिनी । " ॐ तत्स-दितिनिर्देशो वृह्मणस्त्रिविधः स्मृतः, इति भ० गीता । परन्न 'परमार्थसत्, कालत्रयावाध्यं, "तस्यहवा एतस्य वृह्मणोनामसत्यम्,, इति (छा०) श्रुतेः "सत्यंज्ञान मनन्तं ब्रह्म,, इति [तै०] श्रुतेः, " सच्चिदानन्दविग्रहम्,, इतिस्मृतेश्च सत्पत्वस्य मिथ्यात्वाभावतया तस्यच वाधितत्वात्सत्त्वेन निरुक्त रूपत्वात्, वर्ततेच पारमार्थिक व्यावहारिक प्रातीतिकसत्ता भेदेन

त्रिविधासत्तौपनिषदां, तासु प्रथमा ब्रह्मणः, द्वितीया घटादीनां, तृतीया शुक्तिरूप्यादीनाम्, घटः सन्नित्यादि प्रतीतिस्तु व्यावहारिकी मेव सत्तां गोचरयति । नचाकाशादीनांन्यायनयइवे हाऽपि कालत्रितयाबाध्यत्वं, "तस्माद्वा एतस्मादात्मनआकाश स्सम्भूत,, इति [तै०] श्रुतेः "एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणिच खं वायुर्ज्योति रापश्च पृथिवी विश्वस्य धारिणी,, इति [ई०] श्रुतेः तदित्थमेतेषां संक्षेपतस्सृष्टिप्रक्रिया, यथोक्तस्वरूपाया मायायाः परमेश्वरीयेक्षण सङ्कल्पप्रयत्नात्मिकाभिः इतिभि रपञ्चीकृतानि तन्मात्र पदप्रतिपाद्यानि त्रिगुणान्याकाशादीनि पञ्चभूतानि, तेषु सत्वगुणोपेते नैकैकेन यथाक्रमं पञ्चज्ञानेन्द्रियाणि मिलितैश्चतैरुक्तगुणवद्भि र्मनोबुद्ध्य हङ्कारचित्तानि, रजोगुणोपेतेन चैकैकेन यथाक्रमं वागादीनि पञ्चकर्मेन्द्रियाणि, मिलितैश्चतै रुदितगुणाश्रयैःप्राणादयः पञ्चवायवः, तमोगुणोपेतैश्चतैः [१] पञ्चीकृतानि भूतानि, तैरेवापञ्चीकृतभूतैः महत्तत्त्वाख्यातं हिरण्यग(२)र्भशरीरंपर महङ्काराख्यामस्मदादि शरीरमपरमिति द्विविधं परलोक प्रयाण निर्वाहकं मोक्षपर्यन्त स्थायि मनोबुद्धि द्विविधेन्द्रिय प्राणादिपञ्चकसंयुक्तं लिङ्गशरीरं, तमोगुणोपेतैः पञ्चीकृतभूतै श्चतुर्दशभुवनात्मकं ब्रह्माण्डं चतुर्विधं स्थूलशरीरंचजायन्ते ॥ नवा परमाणोरपि पुरोदिताबाध्यत्व मनभ्युपगमात् तत्रहिक्रियायास्संयोगस्य चोपपादन मशक्यमेव, किञ्चावयवावयविभावोऽपि दुरुपपादः समवायानङ्गीकारात् अवयवापेक्षयाऽवयविनि गुरुत्वस्याधिकस्य प्रसङ्गाच्च तदेतदस्त्यवादि तर्कपाद भामत्याम् "उभयथापिनकर्मातस्तदभावः,,

---

(१)पञ्चीकरण प्रकारश्च पञ्चदश्यां "द्विधाविधाय चैकैकं चतुर्धा प्रथमं पुनः । स्वस्वेतर द्वितीयांशै र्योजनात्पञ्च पञ्च ते ,, इति ।

(२) हिरण्यगर्भस्य मूर्तिरत एव प्रथमो जीवः ।

"समवायाभ्युपगमाच्चसाम्यादनवस्थितेः,, इत्यादि वैयासिकसूत्र भाष्य व्याख्यानावसरे विस्तरेण वाचस्पतिमिश्रैः। अथवा 'परमो, नित्यः अर्थः पुरुषार्थो यस्मात् मोक्षजनकज्ञानविषय इत्यर्थः, अर्थादिषु चतुर्विधेषु पुरुषार्थेषु त्रयाणां प्रत्यक्षेण श्रुत्याचानित्यत्वस्याधिगतेः साच "तद्यथेह कर्मचितोलोकः क्षीयते एवमेवामुत्र पुण्यचितोलोकः क्षीयते,, इति (मु०) मोक्षस्यच नित्यनिरतिशय सुखात्मक ब्रह्मरूपतेति । 'सत्, यथोक्तस्वरूपं, नतुतार्किकाभ्युपगतेन सामान्येन कालोपाधिसम्बन्धित्वेनवा सत्त्वेनोपेतं, तयो स्सर्वत्र सत्मदित्यनुगताकारकप्रतीते रुपपादकत्वा सम्भवेन सामान्यस्यच कार्य कारण भावस्याति प्रसक्ततया ऽवच्छेदकत्वेन साधयितुमशक्यतयाच सत्त्वस्योक्त रुपत्वकल्पनाया अयोगात् मन्मतेत्व द्वितीय ब्रह्म तादात्म्याध्यासेनैव सर्वत्रोदितप्रतीते रुपपादनं सुकरमेवेति ॥ अत एव प्रकृष्टावृत्तिः स्थितिर्यस्यतत् इतरेषान्तु जडत्वेन वृत्तिव्याप्यत्वेनवा किञ्चित्कालावच्छिन्न चित्ताद्दात्म्येनवा स्वातिरिक्त सम्विदपेक्षाव्याप्यत्वव्यवहारकत्वेनच, स्थितौ प्रकर्ष विरहात् "सवाएष महानजआत्मा,,इति श्रुतेः॥ एवंसति ब्रह्माभिन्नं सज्जनात्मकं वस्तु जयति। भावध्वनिः । तस्यच श्लेषभित्तिकेन रूपकेण व्यज्यमानाया उपमालङ्कृते ब्रह्मविषयकरतेश्चाभिव्यक्ति रङ्गम् । एवञ्च प्रेयोलङ्कारोऽपि,, गीतिकावृत्तम् ॥ ७ ॥

काव्यकृत्वङ्ग वैगुण्य प्रतिपत्ति परायणः ।
न वारणीयः केनापि यातुधानाधिकः खलः ॥८॥

आख्यायिकाङ्गतया खलवृत्तं वर्णयति काव्येत्यादिना, दोषैर्विधुरं गुणालङ्काराभ्यामन्वितं शब्दार्थोभयंकाव्यम्, ननु दूषितेऽपिकाव्यताया उपगतत्वेन, दुष्टंकाव्य मितिव्यवहारेण, नीरसेऽपि निरलङ्कारेपि वाग्विलसिते का-

व्यत्वस्य महाकवि सम्प्रदायसिद्धत्वेन नैतत्प्रकाशोक्तं लक्षणं सम्भवतीति-
चेत्, अत्राहु रुद्द्योतकाराः विलक्षणास्वादव्यञ्जकत्वस्यैव तत्........च्छे-
दकत्वाद् दूषितादौतदभावेन नानुपपत्तिः, काव्यंश्रुतं क...
दिव्यवहारस्य शब्दार्थयुगले काव्यपदशक्ति ग्राहकस्य
क्वं न काव्यम्,, इतिव्यवहारस्य ...
काव्यसामान्यलक्षणन्तु चमत्कारित्वेसति ...
त्यादौ काव्यत्वप्रसक्तिः दुष्टादपि ...
व्याप्ति रिति विभावनीयमेतत् । तदेव चम
त्वाच्चक्रतुः यागः अतादृशकाव्ये क्रतुत्व
तदङ्गानां दोषव्यतिरेक गुणालङ्काराणां
यणः व्यापारान्तरपरीहारेण तत्रैव
सम्पादनपरायणः परञ्चासौ
न केनापिजनेनोपायेनवातथा अ...
जीवितेन व्यतिरेकालङ्कारेण स्वत
व्यज्यते ॥ ८ ॥

(१) यत्तु रसवतो वाक्यस्यैव ...
प्रसक्त्यानादरणीयम् । ...
... चावच्छि
दत्वादिकमिव शब्दमात्रसाधारण
नतु " अन्यस्यान्यार्थक ...
। वैलक्षण्य च जातिरखण्डो
...त्वेन ...
... वक्रोक्तिकाराः

भाति श्रौतविधानमेध्यवसुधोवैदेहदेशो बुधै
र्यस्मिन् व्यासतनूद्भवोऽप्यधिजगावध्यात्मविद्यां सुधीः ।
तत्राति प्रथितोऽस्ति सोदरपुराभिख्याविभूषान्वयोऽ-
मुष्याङ्केऽजितदिग्वनेऽवनिसुरस्सर्वोजनुर्वाञ्छति ॥ ९ ॥

आख्यायिकावयवतयाऽन्ववायादिकं स्वकीयं कीर्तयति, भातीत्यादिना । 'श्रौतविधानैः, श्रुतिविहित क्रियानुष्ठानैः । 'मेध्या, पूता "पूतं पवित्रं मेध्यञ्च,, इत्यमरः, वसुधा यत्र, सः । तेन प्रकाशनयोग्यत्वं तदाश्रयत्वात्मकवाच्यार्थोपपादकतया गुणीभूतं व्यज्यते । अतएव परिकरालङ्कारः । 'विदेह(१)स्य, सबीज(२)समाधे रसम्प्रज्ञात समाधिसाधनस्य तृती(३)यां विधां सानन्दाभिधानामासाद्याहन्तया तत्कार्ये भूतया मदीयत्वविलक्षणया ममतया च विधुरीकृतस्य, जीवन्मु(४)क्तपदेनाभिधेयस्य वा, अयं वैदेहः "तस्येदम्,, इत्यनेनाण् प्रत्ययः । नतुयस्यकस्यचिन्नृपस्य । देशः, मिथिलाभिधानः । वैदेहपदेन पुरोदीरितमेव योग्यत्वं गम्यते । तथाच परिकराङ्कुरालङ्कारः, प्रकृतार्थोपपादकचमत्कारिव्यङ्ग्यक विशेष्यवाचक पदत्वलक्षणस्य सद्भावात् "साभिप्राये विशेष्येतु भवेत्परिकराङ्कुरः । चतुर्णां पुरुषार्थानां दातादेवश्चतुर्भुजः,, इति दीक्षितोक्तेः ।

---

१ विगत देह तदभिमानो यस्येति योगार्थः ।

२ सम्प्रज्ञाताभिधस्य, 'समाधेः, क्षिप्तमूढविक्षिप्तवृत्तिनिरोधस्य, "योगश्चित्तवृत्तिनिरोधः" इति पातञ्जलदर्शनसूत्रस्य भाष्ये "सर्वशब्दाग्रहणात् सम्प्रज्ञातोऽपि योग इत्याख्यायते" इति व्याख्यानात्, यत्किञ्चिच्चित्तवृत्तिनिरोधस्यापि प्रसञ्जकत्वात् ॥

३ तथाहि सम्प्रज्ञातश्चतुर्विधः सवितर्कः सविचारः सानन्दः सास्मितश्चेति ॥

४ जीवन्मुक्तस्वरूपं तु आत्मतत्त्वः समासनमिथ्याज्ञानोत्थरागद्वेषैर्विमुक्तः अदृष्टोत्पादरहितः प्रारब्धकर्मोपभुञ्जानः स्थितः समाधिप्रभावादुपपद्योक्ष्यमाणं वाक्यादन्यूहेन तदितरत् कर्मसामान्य यस्यतादृशः ॥

५

व्यत्वस्य महाकवि सम्प्रदायसिद्धत्वेन नैतत्प्रकाशोक्तं लक्षणं सम्भवतीति चेत्, अत्राहु रुद्द्योतकाराः विलक्षणास्वादव्यञ्जकत्वस्यैव तल्लक्ष्यतावच्छेदकत्वाद् दूषितादौतदभावेन नानुपपत्तिः, काव्यंश्रुतं काव्यमधिगत मित्यादिव्यवहारस्य शब्दार्थयुगले काव्यपदशक्ति ग्राहकस्य सद्भावेन "श्लोकवाक्यं न काव्यम्,, इतिव्यवहारस्य शब्दमात्रेलक्षणाश्रयणेनानापादनीयत्वात्, काव्यसामान्यलक्षणन्तु चमत्कारित्वेसति शब्दार्थोभयत्वं तेन नगौरस्तीत्यादौ काव्यत्वप्रसक्तिः दुष्टादपि काव्यादपकृष्ट चमत्कारोजायतएवेतिनाव्याप्ति रिति विभावनीयमेतत् । तदेव चतुर्वर्गप्रदत्वात् क्लेशातिशयसाध्यत्वाच्चक्रतुः यागः अतादृशकाव्ये क्रतुत्वारोपस्यायुक्तत्वात् । रूपकालङ्कारः। तदङ्गानां दोषव्यतिरेक गुणालङ्काराणां वैगुण्यस्यासद्भावस्य प्रविपत्तौ परायणः व्यापारान्तरपरीहारेण तत्रैव प्रवृत्तः, राक्षसोऽपियागाङ्ग वैगुण्य सम्पादनपरायणः परञ्चासौ मन्त्रादिनावलेनच शक्योवारयितुं, खलस्तु न केनापिजनेनोपायेनवातथा अतएव ततोऽधिकः । अत्र रूपकश्लेषोपजीवितेन व्यतिरेकालङ्कारेण स्वतःसिद्धेन खलविषयिणीनिन्दा वस्तुरूपा व्यज्यते ॥ ८ ॥

---

(१) ननु स्फुटतो [illegible] काव्यत्वमुपपन्नतिकेचित्, तन्न [illegible] प्रदत्तत्वानादरणीयम् । [illegible] निषयकमात्रनाल [illegible] चमत्कारत्वावच्छिन्नान्यतानिरूपितजनकतावच्छेदक [illegible] शब्दमात्रमाधारणमितिचाहु ॥ [illegible] । [illegible] । ननु " [illegible] । [illegible] । [illegible] ॥

भाति श्रौतविधानमेध्यवसुधो वैदेहदेशो बुधै
र्यस्मिन् व्यासतनूद्भवोऽप्यधिजगावध्यात्मविद्यां सुधीः ।
तत्राति प्रथितोऽस्ति सोदरपुराभिख्याविभूषान्वयोऽ-
मुष्याङ्केऽजितदिग्वनेऽवनिसुरस्सर्वोजनुर्वाञ्छति ॥ ९ ॥

आख्यायिकावयवतयाऽन्ववायादिकं स्वकीयं कीर्तयति, भातीत्यादिना । ‘श्रौतविधानैः, श्रुतिविहित क्रियानुष्ठानैः । ‘मेध्या, पूता “पूतं पवित्रं मेध्यञ्च,, इत्यमरः, वसुधा यत्र, सः । तेन प्रकाशनयोग्यत्वं तदाश्रयत्वात्मकवाच्यार्थोपपादकतया गुणीभूतं व्यज्यते । अतएव परिकरालङ्कारः । ‘विदेह(१)स्य, सबीज(२)समाधे रसम्प्रज्ञात समाधिसाधनस्य तृती(३)यां विधां सानन्दाभिधानामासाद्याहन्तया तत्कार्य भूतया मदीयत्वविलक्षणया ममतया च विधुरीकृतस्य, जीवन्मु(४)क्तपदेनाभिधेयस्य वा, अयं वैदेहः “तस्येदम्,, इत्यनेनाण् प्रत्ययः । नतुयस्यकस्यचिन्नृपस्य । देशः, मिथिलाभिधानः । वैदेहपदेन पुरोदीरितमेव योग्यत्वं गम्यते । तथाच परिकराङ्कुरालङ्कारः, प्रकृतार्थोपपादकचमत्कारिव्यङ्ग्यक विशेष्यवाचक पदत्वलक्षणस्य सद्भावात् “साभिप्राये विशेष्येतु भवेत्परिकराङ्कुरः । चतुर्णां पुरुषार्थानां दातादेवश्चतुर्भुजः,, इति दीक्षितोक्तेः ।

---

१ विगत देह. तदभिमानो यस्येतियोगार्थः ।

२ सम्प्रज्ञाताभि धस्य, ‘समाधे, क्षिप्तमूढविक्षिप्तवृत्तिनिरोधस्य, “योगश्चित्तवृत्तिनिरोधः” इति पातञ्जलदर्शनसूत्रस्यभाष्ये “सर्वशब्दाग्रहणात् सम्प्रज्ञातोऽपियोग इत्याख्यायते” इति व्याख्यानात्, यत्किञ्चिच्चित्तवृत्तिनिरोधस्यापि प्रसञ्जकत्वात् ॥

३ तथाहि सम्प्रज्ञातश्चतुर्विध. सवितर्क. सविचार सानन्दः सास्मितश्चेति ॥

४ जीवन्मुक्तश्चसाक्षात्कृतात्मतत्त्वः सवासनमिथ्याज्ञानोत्कटरागद्वेषैर्विमुक्तः अदृष्टोत्पादरहितः प्रारब्धकर्मोपभुञ्जान विनष्ट समाधिप्रभावाद्युगपद्भोक्ष्यमाणं कायव्यूहेन तदितरत् कर्मसामान्य मस्यतादृशः ॥

सत्येवं परिकर परिकराङ्कुरालङ्कारयो स्संसृष्टिः । काव्यप्रकाशकृतस्तु
ए(१)तमलंकारंनाधिक तयाऽऽतिष्ठन्ते, पूर्वाभिहितव्यङ्ग्यक पदत्वलक्षणेन
परिकरलक्षणेन तदङ्कुरस्यापिलक्षित तया तत्रैवान्तर्भावसम्भवादितिवि-
भाव्यम् । बुधैः, पण्डितैः । नतुएकेनतेन । भाति, दीप्यते । नतुतैरुपल
क्षितः केवलमस्ति । बुधेषु दीपनकरणत्वाभिधायकतृतीया श्रुत्या प्रकर्षः
प्रतीयते, यतोऽपकृष्टैस्तै ग्रामस्य गेहस्यापिवा दीप्तिर्नसम्भवति, किमुतजन
पदस्य । यस्मिनदेशे सुधीः व्यासस्य अष्टादशपुराणप्रणेतुः भगवदवताररू-
पस्य, नतुसाधारणस्य, तथाच पाण्डित्यातिशयोऽर्थान्तरसङ्क्रमितवाच्यध्व
निः । निरुक्तविशेषणाद्युपेतेबादरायणेऽर्थेव्यासपदस्य लक्षणावृत्तेराश्रय-
णात् । अन्यथातत्पदोपादानवैयर्थ्यम् । अतएव "त्वामस्मिवच्मिविदुषां
समवायोऽत्रतिष्ठति । आत्मीयां मतिमास्थायस्थितिमत्रविधेहितत्,, इत्यत्र
त्वामस्मिवच्म्यात्मीयपदाना मनुपयुक्तार्थतयोपदेश्याप्तत्वोपदेशप्रमाणपरि गृ-
हीतत्वात्मकार्थान्तरसंक्रमितवाच्यकतयाऽवश्यवाच्याहिताहितत्वाद्यर्थ व्य-
ञ्जकत्वं काव्यप्रदीपप्रभाया तुरीयोल्लासे प्रतिपादितम् । 'तनूद्भवोऽपि
नतुक्षेत्रजोऽपि शुकाचार्यः, तत्र पितुर्गुणसंक्रमणासम्भवात् । किमुतान्यः ।
'अध्यात्मविद्याम्' अष्टादशविद्यास्थानेष्वभ्यर्हिततमाम् अतिदुरवबोधां वेदा-
न्त विद्याम्, नपर मन्य विद्याम् " अध्यात्मविद्याविद्यानाम् ,, इति भगव
द्गीता । आत्मनीत्यध्यात्मम् "अनश्च,, इत्यनेन अन्नन्तात्टच् । अधिजगौ,
अध्यैष्ट । पुरोक्तरीत्याऽर्था पत्त्यलंकारोव्यङ्ग्यः तेनच प्राशस्त्यंदेशस्य तथा
एवञ्चवर्णनीयतया प्रस्तु तस्य देशस्य बुधकरणिकया दीप्त्यावैयासक्यादेर-
ध्ययनेन वर्णितेनकारणेन तद्देशोत्पन्नेकुलेप्राशस्त्यं कार्यभूतं प्रतीयत इति
प्रस्तुताङ्कुरालंकारः"प्रस्तुतेन प्रस्तुतस्यद्योतने प्रस्तुतांकुर,, इत्यभिधानात्

१ परिकराङ्कुरम् ॥

पुराकिलनैयासकिः पितुरनुज्ञयाऽऽगत्य मिथिलायामध्यात्मविद्यां राजर्षेर्जनकादधीतवा निति पौराणिकीप्रवृत्तिः। 'तत्र, यथोक्तदेशे। 'अतिमथितः। विख्यातत्तरः। 'सोदरपुराभिख्यायाः, सोदरपुरेतिग्रामनामधेयस्य, विभूषाभूतः' नतुभूषणमात्रम्। 'अन्वयः, वंशः। अस्ति। ''अभिजनान्वयौ'' इत्यमरः। नतुवंशस्यविभूषात्वमात्रमेति। तेनापिवंशस्य श्रेयस्त्वं द्योत्यते। 'अमुष्य, यस्यअर्जितं दिग्वनं तदभिधानोग्रामोयत्र, तस्मिन् अंगे, एकदेशे सर्वः, नतुकश्चिदेव, 'अवनिसुरः पृथिव्यां देवात्मको द्विजः, जनुः, जन्म, वाञ्छति। एतेनचानुभाव मुखेनसोदर पुरमूलक दिग्वन ग्रामोपलक्षितस्य कुलस्यातिउदात्तत्वंव्यज्यते। इमेचव्यङ्ग्यार्थाः कविनिष्ठ श्रेष्ठत्वे प्रयन्तध्वनावङ्गभाव मासादयन्ति। एवमग्रेपिग्राह्यमिति भव तिसर्वथा सन्दर्भशुद्धिः म. स. र. न. म. य. (१) ग. ग. वर्णानां क्रमेण पादेषु न्यासात्। शार्दूल विक्रीडितंवृत्तम् ॥९॥

अत्रश्रोत्रियसद्गुणाग्रगणनोवाग्मीसमज्याव्रजे
कान्तश्शान्ततमोऽव्यलीकवचनोऽनूचानमुख्यः कृती।
विख्यातेश्वरदत्तनामसहितो मिश्रोपनामोदितो
यत्कीर्तेस्सकलाकलामितरुचेर्द्यापिविद्योतते(जेगीयते)॥१०

अत्रेति। सोदरपुरान्वयस्य दिग्वनग्रामोपलक्षितेऽङ्गे 'श्रोत्रियाणां, श्रोत्रियाणां सद्गुणानुष्ठानपरायणतां [illegible] [illegible] [illegible] [illegible] [illegible] पुरातनेन मिथिलानृपतिना हरिसिंहदेवेन [illegible]

१ [illegible], [illegible], [illegible], [illegible]। [illegible]
[illegible], [illegible], [illegible]।

पदेन सङ्केतितानां द्विजवर्याणां, सद्गणेषु 'अग्रा, प्रथमागणनायस्य, सः। असौ प्रथमतोद्विजः, तत्रापि श्रोत्रियः, तेषामपिप्रतांगणानामग्रे गणित, इत्यदसीयमाहात्म्ये किं विशेषतोवक्तव्यम्। 'समज्यानां, सदसां 'व्रजे' समुदाये, नतुकस्याञ्चिदेकस्यां तत्र, 'वाग्मी' वाचोयुक्तिपटुः। नतुवाचाटः। 'कान्तः' सुन्दरः, समज्याव्रजेकान्त इतिवा, ननु गेहेकान्तः। तेनच सौन्दर्यातिशयोऽभ्यज्यते। 'शान्ततमः, अतिशयेनशान्तः, 'अव्यलीकं' सत्यं प्रियञ्च वचनं यस्य, सः। "व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि" इतिमेदिनी। "अलीकमनृतेऽपिच" इतिविश्वः। अथवा 'शान्तं' विलीनं, 'तमः' अज्ञानं, यस्य, सचासावव्यलीकवचन इति विशेषणयोः कर्मधारय इति। 'अनूचानानां, वेदेषु तदंगेषु च पण्डितानां विनीतानाञ्च, मुख्यः। "अनूचानो विनीतेस्यात्सांगवेदविचक्षणे" इति मेदिनी। 'कृती' पण्डितः योग्यश्च "कृतीस्यात्पण्डितेयोग्ये" इति विश्वप्रकाशः। 'विख्यातेन' प्रसिद्धेन, ईश्वरदत्तेतिनाम्ना 'महितः, पूजितः, अभिधेय इतियावत् माहात्म्यं द्योत्यते, सोऽयमत्यन्ततिरस्कृत वाच्यध्वनिः, अचेतनेन पूज्यत्वस्य बाधात्। यद्वा विख्यात इति पृथगेव विशेषणम्, पूर्ववत्समासः। अथवा विख्यातानांजनानामीश्वरः, 'दत्तं' दानम्, भावेनिष्ठाप्रत्ययः, तेनयत् नाम, तेनमहितः, दानजनितकीर्तिमानिति यावत्। मिश्रेत्युपनामयस्य, सः, ईश्वरदत्तमिश्र इति मिलितार्थः। 'उदितः, उत्पन्नः। 'सितरुचेः' धवलद्युतेः यस्यकीर्तेः, सकला, नतुकाचिदेव, 'कला' भागः, अद्यापि, नतुपुरैव, जेगीयते, अतिशयेनगीयते गैधातोर्यङ्। लोकैरितिस्फुटम्, अतएव न न्यूनपदत्व दोषप्रसक्तिः। अथवा विद्योतते इति पाठः, तत्रचनशङ्काप्युक्तदोषस्य। एतैश्चविशेषणै रतिपुष्कलत्वं मिश्रेऽभिव्यज्यते इति ॥ १० ॥

न्तं, मन्दिरं "निशान्त पस्त्य सदनम्" इत्यमरः निर्माय, विरच्य, अनिशं हरैकमनाभूत्वेति भावः । 'निर्मायतया, मायारहिततया 'शं, कल्याणम्, 'आयात्' प्रापत । हरैकमानसत्वस्य मायाराहित्येकारणतया काव्यलिङ्गम् । निर्माय निर्मायेत्यत्र यमकाङ्कारः "सत्यर्थेपृथगर्थायाः स्वरव्यञ्जनसंहतेः, क्रमेणतेनैवावृत्तिर्यमकं विनिगद्यते" इति दर्पणोक्तेः समानार्थत्वाभाववत्समानानुपूर्वीकानेकवर्णावृत्तियमक मितितु परिस्कारिणां सरणिः, लाटानुप्रासवारणाय समानार्थत्वाभाववदिति । विभिन्नार्थकत्व निवेशे "ममरसमरसोऽयम्" इत्यादौ द्वितीयावृत्तेर्निरर्थकत्वेनाव्याप्तिः प्रसज्येत, इति तदुपेक्षा । "सरोरस" इत्यादावतिव्याप्तिवारणाय समानानुपर्वीकेति । तथाविधवर्णद्वयेऽतिव्याप्तेर्व्युदासाय अनेकवर्णावृत्तीतीति संक्षेपः ॥ १२ ॥

तज्जातोधिषणावधीरितसुधीसन्दोहमोहप्रदः
स्वच्छान्तर्जितदर्पदर्पणमणि स्सन्तर्पणोजन्मिनाम् ।
पुण्यात्मा गविहापिताखिलपणो राजत्प्रमज्ञाचणो
लेभेसाधुवशंवदेन्द्रियगणो गोमाजिमिश्राभिधाम् ॥१३॥

तज्जातइति । तस्मात् रतिदत्तमिश्रात् जातः । 'धिषणया, बुद्ध्या, 'अवधीरितस्य, तिरस्कृतस्य, सुधियां सन्दोहस्य, मोहप्रदः । अमुष्य प्रज्ञातिशयं समधिगत्य सर्वएव सुधियोमुह्यन्तीति महामतित्वं व्यङ्ग्यम् । यद्वा धिषणयाऽवधीरितः सुधीसन्दोहोयेन तथाभूतस्सन् 'मोहम्' अविद्यां, प्रकर्षेणद्यति खण्डयति निवर्तयतीतियावत् तादृशः । अथवा धिषणाया अवधिः, काष्ठांप्राप्तः निरतिशयबुद्धिमानितिफलितार्थः, अतएव :, कम्पितः सुधीसन्दोहोयेन सचासौ 'मोहप्रदः, 'मायाः सम्पत्तेः,

'ऊहः, 'तर्कः, सत्पदः, सम्पत्तिप्राप्त्युपायविशेषक इत्यर्थः एतेन नीति-
ज्ञत्वं द्योत्यते । 'यस्य, शिवस्य, 'ऊहः, तर्कः, सत्पदः, [illegible]
कोपदे [illegible] । [illegible] यदि [illegible]
[illegible] सर्वेकार्ये [illegible]
खलो प्रतिपादितः "[illegible]" [illegible]
धानात् 'स्वन्तेन 'अन्तः, अन्तः करणेन जितः 'दर्पो, [illegible]
यस्य तथाविधः 'दर्पणमणिः, उत्कृष्ट आदर्शः दर्पणः मणिः [illegible]
येन सः, तदधिक [illegible] इति भावः । [illegible] । [illegible]
[illegible] 'सन्तर्पणः, तृप्तिकारकः, [illegible] ।
"सौहित्यंतर्पणंतृप्तिः" इत्यमरः । [illegible], [illegible] '[illegible]
पितः, विसर्जितः, [illegible] 'पणः, धनं, येन तादृशः । [illegible]
दिपदत्वं व्यज्यते । "पणोक्षादयादि[illegible]" । [illegible]
[illegible] इति मेदिनी ॥ अतएव [illegible]
[illegible], [illegible], पणः, [illegible], "[illegible]" [illegible]
प । पदानि [illegible] । '[illegible], [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

क्त्या प्रकृते तदभावात् । अतएव "श्वपाकोजल्पाको भवतिमधुपाकोपम गिरा, निरातंकोरंको विहरति" इत्यादौ भवतीत्यादिनागिरेत्यन्तेनव्य वधानान्नोदित दूषणप्रसंगः । अभिहितञ्च "प्रतिकूलवर्ण मुपहतलुप्तविस विसन्धिहतवृत्तम्,, इति काव्यप्रकाशकारिकाव्याख्यायां "तेननैरन्तर्येण त्वप्राप्तबहुविसर्गत्वं तथा लुप्तविसर्गत्वं च इति प्रदीपकारैः । अथवा " हापिताखिलधन स्संज्ञासमज्ञा ,, इतिपाठः । अत्रचनैतद्दोषस्योन्मेषोऽपि 'संज्ञया, निजनाम्ना, समज्ञयाच चणइत्यर्थः । साचेयंख्यातिरुत्तम पितुर्नामादिनाख्याते रनुत्तमत्वबोधनादिति ॥ १३ ॥

दृप्यद्द्वेषणदन्तिदारणहरे रज्यत्प्रतापानल
ज्वालाजातवदातकीर्ति हिमगु प्रोद्भासितज्यापतेः ।
यस्साचिव्यपदं प्रसाध्यमिथिलाभूपात्मजस्यातुलं
कंवा नोपचकारयोऽनु दिवसं नोकेन संस्मर्यते ॥ १४ ॥

दृप्यदिति ! 'दृप्यताम्, पराक्रममाणानां, नतु निर्व्याप्रतितयाति ष्ठताम् । , द्वेषणानां, परिपन्थिनामेव, दन्तिनां, नतुकेवलगजानां, 'दा रणे, पाटने, 'हरेः, सिंहस्य । अश्लिष्टशब्दनिबन्धनं केवल परम्परितरू कमलंकारः । 'रज्यतः, रागयुक्तस्य, 'धातुसम्बन्धेप्रत्ययाः' इत्यने प्रधानक्रियाकालएव गौणक्रिया बोधक धातूत्तरं प्रत्ययस्यविधानात् प्रोद्भा सितेत्यत्रप्रधानीभूत प्रोद्भासनक्रियाया अतीतकालिकत्वेनरज्यत इत्यत्रापि लटोऽतीतकालार्थकत्वात् । 'प्रतापानलस्य, प्रतापात्मकस्याग्नेः, परिणा मालंकारः अग्नौ प्रतापारोपमन्तरेण तज्जातत्वस्य कीर्तिचन्द्रेऽसम्भवात् ज्वालायाजातेन 'अवदातेन, शुभ्रेण, 'कीर्तिहिमगुना, यशश्चन्द्रेण रूपकालंकारः । हिमगुपदोपादानात्कीर्तौस्पृहणीयतमत्वं वस्तु शब्दशक्त्य

ष्पद्यते योद्धासिताया 'ज्यायाः, पृथिव्याः, पत्युः विषमालं-कारो द्वितीयः, कार्यकारणयोर्वैरूप्यात् ननु अकारणात्कार्यजननरूपाच्-तुर्थी विभावना, प्रतापकीर्त्योः कार्यकारणभावस्यसद्भावात् । वस्तुतस्तु प्रतापत्वेन कीर्तित्वेन तस्यासत्त्वेऽपि प्रतापाग्नित्वेन कीर्तिचन्द्रत्वेनाभा-वात्सम्भवत्येव साविभावनेति विभावनीय मलंकारद्वयानिर्देशः । यथाद्योक्ते न परस्परितरूपकेणेतरेषामलंकाराणां संसृष्टिः । द्वितीयचरणेन परिणामे नच विषमविभावनयो रङ्गाङ्गिभाव संकरः 'मिथिलाभूपस्य, [illegible] त्मजस्य वनमालिसिंहस्य, 'साचिव्यपदं' मन्त्रित्वस्य स्थानम्, नतु अ-न्यस्य, 'प्रसाद्य, अलंकृत्य, ननु प्राप्य । तथातेना [illegible] [illegible]-स्थानस्य शोभायाउदयात्, तत्पदसोपशोभायास्तेन । यः गोपालितः, यं प्राणिनम्, अनुकं यथास्यात् तथा नोपचकार, [illegible] तेनैतत्कर्तृक उपकारस्यसात्मकत्वेत्यनन्वयालंकारध्वनिरिति ध्येयम् । अत एव 'अनुदिवसं' प्रत्यहं केन प्राणिना न [illegible] स्मर्यते, [illegible] सर्वेः, तदनन्तरं तदधिकगुणशालिन [illegible] [illegible]-दात् । अनुकावकारकर्तृत्वस्य स्मरणगोचरताया [illegible] [illegible] एतच्च संसृज्यते निरङ्कालंकारैरिति ॥ १५ ॥

योद्धापी समस्तानपद्भुतमागमासिपां दीपिकां
शेतन् प्रोदस्तजनदुःखपदेषु वद्धान्युदरैः ।
आगादागमयांवभारदजनान् तत्तीर्थतापांदहन्
भौमांशरविर्यांदितानजुदसृदाह. पलन्दतार ॥ १६ ॥

यति । 'दस्तार्ः [illegible]
[illegible]

समयसम्बन्धदर्शनेन सामर्थ्यं द्योत्यते, तेनचपरिकरालंकारः । दीर्घ बहुतमाम् 'अग्रा, प्रथमा, 'अभिधा, अभिधानं, यस्यास्ताम् एवञ्च मधी सुरसशिशिरसुरभिविमलजलवत्त्वं दीर्घिकायांव्यज्यते । 'दीर्घिकाम्' प्रा पुष्करिणीम् , सम्यक् अखानयत् । 'दुश्चरपदेषु, दुर्गमस्थानेषु, 'उच्चा चानि, बहुविधान, "उच्चावचं नैकभेदम्,, इत्यमरः, मयूरव्यंसकादित्वा समासः 'उच्चकैः, उन्नतान, शेतून 'च, अपि, प्रोदसृजत् । 'सत्तीर्थस्य, वाराणसीप्रमुखस्य 'सार्थान, समुदायान, मुहुःस्वयम्, आगात्, जनान आगमयां, चकारच । 'चः' समुच्चये । 'नैकविधान, बहुविधान् नशब्देन समासः । 'उचितान्, धर्माविरोधिनः, भोगान अनुबभूव । दीपका लंकारः "सैवक्रियासुबह्वीषु कारकस्येतिदीपकम ,, इतिप्रकाशोक्तेः । तथाच परिकर दीपकयो स्संसृष्टिरिति ॥ १६ ॥

वदान्यतान्यशरणं शरणंयश्शरीरिणाम् ।
निकेतनं विवेकादेर्मिथिलावनिकेतनम् ॥ १७ ॥

वदान्यतेति । 'यः, उक्तमिश्रः, 'वदान्यतायाः, बहुप्रदत्वस्य, 'अन्यत, लौकिकादितरत्, 'शरणम्, गृहम, अतिशयोक्तिरलङ्कारः, लौकिकेऽलौकिकत्व वर्णनात् । "प्रस्तुतस्ययदन्यत्वम्" इत्यतिशयोक्तिप्रकरणेप्रकाशाभिधानात् । वदान्यतातिशयोवस्तु कविप्रौढोक्ति सिद्धेनालङ्कारेण व्यज्यते । 'शरीरिणां, नपुनस्तद्विशेषाणामेव, 'शरणं, रक्षिता । 'शरणं वधरक्षित्रोः शरणंरक्षणेगृहे' इति विश्वः । सर्वभूतेषुदयालुता द्योत्यते । 'विवेकादेः, विवेकक्षमाशान्ति प्रभृतेर्गुणस्य 'निकेतनं, गृहम् । उक्तगुणातिशयोगम्यः, मिथिलाया 'अवनेः, पृथिव्याः, 'केतनम्' पताका । मिथिलावनिशोभाकारित्वं प्रतीयते । 'केतनंतु निमन्त्रणेगृहे केतौचकृत्ये"

इतिमेदिनी । यमकालङ्कारः ॥ १७ ॥

कालव्याजवसद्वियोगिविशराघेन्दुद्विषि श्रेयस
स्तिथ्यांज्येष्ठदलेसधन्यसहजज्येष्ठोऽदलस्थोऽसताम् ।
गङ्गाभङ्ग समुद्गतामृतपृषत्सङ्गातिपूताङ्गको
भास्वद्व्यस्तदृगोमितिव्यवहरन्नागादनङ्गारिताम् ॥ १८ ॥

कालेति । कालस्य, श्यामलस्यअङ्कस्य 'व्याजेन, छलेन' 'कालश्यामलमेचकाः" इत्यमरः । वसत् वियोगिनांजनानां 'विशरेण' घातेन, अघं यत्र "आलम्भपिञ्जविशरघातो न्माथवधाअपि" इत्यमरः । तथाभूतस्येन्दोः द्विषि' 'ज्येष्ठस्य' तदभिधेयमासस्य, 'दले पक्षे' धवलदलइति यावत्' चन्द्रमण्डलंविलोक्य मोद्दामकामतया केचन वियुक्ताम्रियन्ते' इति तज्जनितं पापंचन्द्रमसि कलङ्कात्मनावसतीत्यर्थः। तथाचनायंचन्द्रेकलङ्कः, अपितु वियोगिवधजनितं कल्मष मित्यपह्नुति पूर्वकारोपात्मिकाऽपह्नुतिरलङ्कारः । अघस्यचश्यामलत्वं कविसमयसिद्धम् "मालिन्यंव्योम्निपापे यशसि धवलतावर्ण्यते हासकीर्त्योः" इत्याद्यभिधानात् । "प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः" इत्यपह्नुतिलक्षणंदर्पणे ॥ 'श्रेयसः, पुण्यस्य, तिथ्याम् एकादश्यामितियावत् । 'धन्यानां, पुण्यशालिनाम 'सहजानां, सोदराणाम्, 'ज्येष्ठः ज्यायान् । तेनातितमां पुण्यशालित्वंव्यङ्ग्यम् । असताम्, पापिनाम्, 'अदलस्थः' नपक्षस्थः, गङ्गायाभङ्गात्' तरङ्गात् 'भङ्गस्तरङ्गऊर्मिर्वा" इत्यमरः समुद्गतस्य 'अमृतपृषदः, जलबिन्दोः, सङ्गेन अतिपूतमङ्गंयस्यसः, 'भास्वति, मोदितेसूर्ये न्यस्ताहक् येनतादृशः ओम् इति ब्रह्मवाचकंपदंप्रणवाभिधानं व्यवहरन्, उच्चारयन अनङ्गारितां शिवत्वम् आगात्

प्रापत् तथाचतादृशाङ्कत्व भास्वन्न्यस्तदृक्त्व प्रणवोच्चारयितृत्वा नामनङ्गी
तापाप्तौ हेतुतया काव्यलिङ्गमलङ्कारः । सहजेषुज्येष्ठतयाज्येष्ठमासे असर
पक्षीयतया वियोगिघातकतयाऽसतः विधोः पक्षं धवलदलंविहाय कृष्णप
पुण्यशालितया पुण्यतिथौ गंगातीरेप्रणवंव्याहरन् शिवसायुज्यतामासाद
यत् कळेवर मत्यजदित्यभिप्रायः । एवञ्चपरिकराळङ्कारोऽपि । तथाचा
पह्नुतिकाव्यलिङ्गपरिकराणां संसृष्टिरिति विमर्शनीयम् ॥ १८ ॥

यस्यास्ते धर्मजायासमिति विजयिसत्कोविदेशान्ववाया
नक्तादिक्रान्तकाया हरिपदजलजध्याननिर्धूतमाया ।
शान्तापाया नयन्ती म[illegible]यमवहिता तारकञ्चिन्नयाना
यातो हिंसैककर्मा परममुनिपदं येन वल्मीकजन्मा ॥१८॥

निजमातरं वर्णयति, यस्येत्यादिना । 'यस्य, गोमाजिगिश्वर
'धर्मजाया, धर्मार्था 'जाया, पत्नी, शाकपार्थिवादित्वात् समासः । "च
तुर्थीतदर्थार्थबलिहितसुखरक्षितैः" इति सूत्रेण धर्मायजायेति तादर्थ्ये समास
न्यपिवहत्वः । 'समितिषु, सभासु, विजयिनः नकेवलंजयिनः । 'सन्तः
मान्याः साधवश्च, 'कोविदाना, विदुषाम्, ईशा यत्र, सचासौ ' अन्व
वायो, वंशोयस्या स्तथोक्ता । समितिविजयिनामा मान्यत्वेकोविदेशान्वय
हेतुत्वात्काव्यलिङ्गालङ्कारः । "सन्सुधीः कोविदोबुधः" इत्यभि
धानेन सत्कोविदपदयोः [illegible]
[illegible]पुनरुक्तवदाभासोऽपि [illegible] । [illegible](?)
[illegible]
[illegible] कोविदपदस्य [illegible] समान [illegible]

[illegible]

वंशोवर्णनीयायामातुरङ्ग मित्युदात्तोप्यलंकारः "महतां यदुपलक्षणमङ्ग-भावः अर्थाद्वर्णनीये तदप्युदात्तम्" इति काव्यप्रदीपाभिधानात् । 'नक्ता दिभिः, नक्तोपोषणादिभिः, नत्वन्यथा, क्लान्तः कायोयस्या स्तथा भूता । एवञ्च क्लान्तत्वेऽन्यप्रयोज्यत्वस्यव्यावृत्तेस्तात्पर्य विषयीभूताया आर्थत्वादार्थीशुद्धा परिसंख्यालङ्कारः । अयञ्च पुरोदितेष्वपि पद्येषु यथायथं बोध्यः । एवमग्रेऽपि । हरिपदमेवजलजं, तेन रूपकालंकारः, तस्य 'ध्यानेन, समानविषयकान्तः करणवृत्ति प्रवाहेण, "तत्र प्रत्ययैक तानताध्यानम्" इति हि पारमर्षे पातञ्जलदर्शनेसूत्रम् 'निर्धूता, नितरां तिरस्कृता माया यया, प्रयोज्यत्वं तृतीयार्थः तेनध्यानस्यसाक्षादविद्याना शकत्वविरहेऽपिनक्षतिः । यद्वा साक्षात्कारद्वारातस्यापि हेतुत्वमेवेति तृती यायाएतदर्थकत्वेऽपिनक्कापि हानिः व्यापारेण व्यापारिणोऽन्यथासिद्धिवि-रहादिति विभावनीयम् । अतएव शान्तः 'अपायः, अविद्याकल्पितोऽ-न्तरायः यस्या स्तादृशी अविद्यानाशेनैवतस्यापि नाशात्, इहाऽपिकाव्य लिङ्गम् । 'अवहिता, अप्रमत्ता सावधानेति यावत्, 'तारकं, रामेतिनाम, 'चिन्तयाना, मनसाजपन्ती वाचिकोपांशु मानसजपेषु अन्त्यस्यैवेतरा पेक्षयाप्राधान्यात् । समयं नयन्ती, नत्वन्यथा, आस्ते, केवलं स्थिता । एतैश्च विशेषणैर्माहात्म्यं मातुरिव्यज्यते । येन तारण [illegible] 'एवं-प्रधानं कर्मयस्य तादृशः कल्पोकजन्मा परमहंसपदं यातः ॥ इहालंकाराणां संसृष्टिसंकरव्यवस्था स्वयमेव सुधीधिया कार्येति । स्रग्धरावृत्तम् "म्र-भ्नैर्यानांत्रयेण त्रिमुनियतियुता स्रग्धराकीर्तितेयम्" इति वृत्तरत्नाकरो-पलक्षणमप्यस्यादिति ॥ १८ ॥

तस्मात्ती प्रमतिः पतिव्रतलसद्वामामणौ जान्हवी
देव्या मत्र सतांप्रियः समजनि श्री बालकृष्णाभिधः ।

यः प्रेम्णा चरणाम्बुजन्मयुगलं शुश्रूषमाणोगुरो

विंशाब्दावधि दर्शनेषु परमां शिक्षां समासादयत् ॥१९॥

तस्मादिति । पत्युः व्रतेन मनुनिर्देशितेन, लसन्तीनां, योषितां "नारीरूपं पतिव्रतम्" इति नीतेः पातिवृत्यस्य तासां शोभावहत्वात् 'मणौ, श्रेष्ठायाम् । 'अत्र, यथोक्तायां, जानकीदेव्यां, 'तस्मात्, गो साग्निमिश्रात्, तीव्रमतिः एतेन विंशाब्दावधि दर्शनेषु परमशिक्षासमास दनयोग्यत्वं गम्यते, तथाच परिकरालंकारः । 'सतां, साधूनां विदुषा प्रियः । एतेनच कार्यभूतेन विनयादिगुणगणाति शयोव्यज्यते । सत्प्रि त्वे तीव्रमतित्वस्यापि हेतुतया काव्यलिंगमलंकारः । श्रीबालकृष्णाभि समजनि । नच श्रीशब्दस्य नामानन्तर्गततया "श्रीबालकृष्णाभिध इत्युक्तिरसङ्गतेतिदेश्यम्, तस्याः श्रियायुक्तः बालकृष्णाभिधः श्रीबा ष्णाभिध इति विग्रह प्रतिपाद्यार्थकत्वात् । एवमेवहि "संक्षेपतः श्रीरघु नाथनामा" इति प्रामाण्यवादप्रत्यक्षमणिदीधिति ग्रन्थे शिरोमणेरभिधा तदीयविवृतौ सङ्गमयांचक्रिरेभट्टाचार्य चरणाः । यः बालकृष्णाभिधः गुरोश्चरणएवाम्बुजन्म, तथा च रूपकालङ्कारः तस्य युगलं 'प्रेम्णा भक्त्या, तस्यगुरुगोचरत्वात् । नतु कार्यानुरोधेन । 'शुश्रूषमाणः, सेव मानः । विंशतेः पूरणः विंशः, सचासावब्दः, अवधिः यस्य तत् । तद वधित्वञ्च तत्पर्यन्ताभिव्याप्तिकत्वम् । नत्ववधिपदं मर्यादार्थकम् तथा सति ऊनविंश वर्षाभिव्याप्तस्यैव शिक्षाग्रहणस्य बोधः प्रसज्येत । नचविव क्षिताविवक्षितार्थोभयोपस्थापनानुकूलस्वरूपसन्देह विषयत्वात्मकस्य स न्दिग्धत्वदोषस्य प्रसङ्गः, तादृशस्य संदेहस्य प्रकृतेऽनवतारात् । 'दर्श नेषु, आन्विक्षिकीप्रभृतिशास्त्रेषु, परमां नतु साधारणीं शिक्षां समासाद-

यत् । नतु केवल मवापत । नचापादानानुक्त्यान्यूनत्वं दोषः, गुरावपादानत्वस्यार्थतायाअनुभवसिद्धत्वात् । यद्वा "यः प्रेम्णा गुरुपादपद्मयुगलं शुश्रूषमाणस्ततः" इति पठनीयम् पञ्चमीचेयम् "आख्यातोपयोगे" इतिसूत्रानुशिष्टा, अतएव समासाद् यदित्यस्याप्युपपत्तिः । एतेन च "प्रथमेनार्जिताविद्या" इति निन्दाश्रुतेरगोचरोऽय मित्यलम् ॥१९॥

यत्रप्रात्यहिकाध्वरौघहुतभुग्धूमान्धकारावृते
र्भास्वत्प्रौढमरीचिभिर्नहिशुचौतापं भजन्तेजनाः ।
अर्चान्यस्तविशस्त धूपपवन व्यासञ्जना मोदना
त्सान्द्रेचैकुरसञ्चयेसुरभयेनोवा यतन्तेऽङ्गनाः ॥ २० ॥

अथ निजवासग्रामं श्लोकद्वयेनवर्णयति, यत्रेत्यादिना । यत्र ग्रामे शुचौ ग्रीष्मसमये 'प्रात्यहिकस्य, अनुदिनं विधीयमानस्य. 'अध्वरौघस्य, यज्ञसमुदायस्य, 'हुतभुजां, हुताशनानां, धूमैः अन्धकारेण आवृते रावरणाद्धेतोः, 'भास्वतः, भास्करस्य, 'प्रौढाभिः, प्रवृद्धाभिः, 'मरीचिभिः, किरणैः, तापं जनानभजन्ते । अतिशयोक्त्यलङ्कारः । प्रत्यहमध्वरातिशयविधानेन परमपवित्रत्वं प्रतीयते । एवम् 'अर्चासु, देवातिथीनामर्हणेषु, न्यस्तानां 'विशस्तानां, प्रशस्तानां, धूपानां पवनै 'र्व्यासञ्जनेन, व्यासक्ततया आमोदनात् सौरभात् हेतोः, 'सान्द्रे' स्निग्धे, चैकुरसञ्चये, केशकलापे, सुरभये, सौरभाय, अङ्गना नोवा यतन्ते सिद्धत्वादित्यर्थः । देवादीनामर्चातिशयोव्यंग्यः । स्नानात्परं सलिलार्द्रानेवचिकुरानङ्गनाधूपैर्वासयन्तीत्याचार इति ॥ २० ॥

प्रयत वंश वतंस विशारद
द्विजकुले वहुलेख गृहाकुले ।

वसतियोऽवसथेऽत्र समेऽसमे
श्रितशमेनवटोलपदास्पदे ॥ २१ ॥

प्रयतेति । 'प्रयतानां, पवित्राणां, नत्वतादृशानां, वंशानां 'वतंसः, भूषणं, नतुकुठाररूपं, यद्वा प्रयतेति द्विजकुलविशेषणम् । विशिष्टा 'शारदा, सरस्वती, विद्येतियावत्, यस्यतत् । द्विजानां 'कुलं, समूहो, यत्र तथोक्ते, बहुभिः 'लेखगृहैः, देवगृहैः चित्रगृहैश्च, "लेखाअदितिनन्दनाः" इत्यमरः । 'आकुले, व्याप्ते । 'समे, सशोभे ससम्पत्तिकेच, 'असमे, अनुपमे, विरोधालङ्कारः, समत्वासमत्वयोस्सहानवस्थायित्वलक्षण विरोधस्यापाततः प्रतिभासनात्, परमार्थस्तूक्तएव । श्रितः शमोयं तादृशे, शमोप्येतदीयगुणातिशयं विलोक्यैन माश्रयदितिभावः । शमस्तु अन्तरिन्द्रिय परिग्रहः । एवञ्च ग्रामे मुमुक्षाधिकारिजनशालित्वं गम्यते तस्यामेव शमस्य विनियोगात् तदुक्तं विवरणाचार्यैः "सर्वत्र फलश्रुतयः कामनोत्पादन द्वारा मुमुक्षो रधिकार प्रदर्शनार्था" इति । नवटोल पदस्य 'आस्पदे, स्थाने, नवटोलाभिधान इति यावत् 'अत्र, यथोक्ते पूर्वोक्त पद्य वर्णित इति यावत् । अवसथे, ग्रामे, "अवसथोग्राम" इति शब्दरत्नावली । यः बालकृष्णः वसतीत्यर्थः ॥ सुन्दरीवृत्तं तदुक्तं वाणीभूषणे "कुसुमगन्ध रसे रतिभूषिता, चरण सङ्गतनूपुर मण्डिता । कर सुवर्णलसद्वलयान्विता, स्फुरति कस्यनचेतसि सुन्दरी" इति ॥ २१ ॥

कार्णाटा वनिपेन केरलमही पालेन यो गौर्जर-
ज्यानाथेनच मालवक्षितिभुजा वैदेहभूमीभृता ।
दोषज्ञाति विदूर दर्शि विदुषां राजत्समज्ञाजुषां
विज्ञातं सममानि संसदि समालोच्यासकृन्नैकधा ॥२२॥

कार्णाटेति । 'यः, वालकृष्णः । कार्णाटावनिपादिना नतुयेनकेनचित् राज्ञा 'राजत्सपज्ञाजुषां, विलसत्कीर्तिमतां, दोषज्ञाना-मतिविदूरदर्शिनां विदुषाम्, नतु साधारणानाम् । 'संसदि, सभायाम् । 'असकृत्, नत्वेक वारम् । 'नैकधा, बहुभिः प्रकारैः, 'समालोच्य, विपश्चिदय मितिविनिश्चित्य, नत्वापाततः । 'विज्ञातं, ख्यातं, यथास्यात् तथा । 'सम्मानि, सम्मानितः । यद्वा 'नैकधा, पारितोषिकरूपाणां प्रभूतमुद्राणाम् ऊर्णतन्तु निर्मित शीतनिवारकावरणानां दोशाळेति भाषया विश्रुतानां समर्पणेन सम्मानीति । तथाच तादृश संसदि निरुक्त महाराजै स्तथाविधेन सम्मानेन पाण्डित्यातिशयो व्यज्यते ॥ २२ ॥

द्वाविंशेयतिवत्सरे समधराधीशावली मस्तक-
न्यस्तस्रङ्मकरन्द विन्दु विलसत्पादारविन्दस्य यः ।
यातश्श्रीलरमेश्वरस्य मिथिलानेतुस्स्वविद्यौक(१)सा
माद्येऽध्यापकता मदभ्रशरदोऽनैषीत्तमावर्धयन् ॥२३॥

द्वाविंशइति । 'यः' वालकृष्णः । द्वाविंशे वत्सरे 'यति' गच्छति, समेषां धराधीशानां या आवली, तस्याः मस्तकेपुन्यस्ता याःस्रजो, मालाया, मकरन्दविन्दुना विलसत्पादारविन्दं यस्य, तथोक्तस्य, निखिलभूप मणम्यमानस्येतियावत् । मिथिलाया नेतुः, नायकस्य, श्रीळ रमेश्वरस्य नतु सामान्यभूपस्य, 'स्वविद्यौकसां' स्वकीय विद्यालयानाम् 'आद्ये' प्रथमे मुख्ये, अध्यापकतां यातः 'तं' यथोक्तं रमेश्वरम् आवर्धयन् उत्तरोत्तर मौन्नत्यं प्रापयन् 'अदभ्रशरदः, बहूनिवर्षाणि "अदभ्रं बहुलंबहु" इत्यमरः । अनैषीत् इति ॥ २३ ॥

(१) स्वविद्यालये मुख्ये इत्यपिपाठः ।

श्री पद्मारमण प्रधानदिविषत्सद्मानि निर्मापिता
निश्छद्मानुरते दिशासु नयनालानानि यः प्राणिनाम् ।
चेन्द्रद्वैत निरूप्य विभ्रमधियो नेताजनान् द्योतिता
शावक्त्रस्फुट साधुकैर विकया कीर्त्याऽभितो भ्राजते ॥

अथ मिथिलापतिं रमेश्वरसिंहं वर्णयति श्रीत्यादि श्लोकद्वयेन 'यः, रमेश्वरसिंहो भूपः, श्रीपद्मारमणः प्रधानं येषां, तेषां 'दिविषः स्वर्गौकसां, सद्मानि, प्राणिनां, ननु मानवानामेव, नयनयोरालानानि बन्धनानि, तेन सद्मसु सौन्दर्यातिशयो व्यज्यते । 'निश्छद्मानुरतेः, निश्छद्म भक्तेः, दिशासु, ननु एकस्यां दिशि । निर्मापिता, "नलोकाव्यय निष्ठ खलर्थ तृनाम्" इत्यनेन षष्ठ्या निषेधः । दिविषत्पदोपादानेन स[illegible] सुधाशस्त्यं प्रतीयते । द्योतितम् 'आशायाः दिशः, वक्त्रं यया, तयोक्त स्फुटं, विकाशितं "व्याकोशविकचस्फुटाः" इत्यमरः । साधुरेव कैरवं [illegible] तादृश्या, स्फुटत्वस्याचेतनधर्मस्य साधौ विरहेण कैरवतादात्म्यारोपस्या[illegible] [illegible] तथा परिणामालङ्कारः । साधुरूपं चन्द्रकीर्ति [illegible] [illegible] चन्द्रद्वैतेन 'निरूप्य:, विषयिणः, विभ्रमधियः चन्द्रद्वैतगोचराणि [illegible] [illegible] ज्ञानानीति यावत् । ज्ञानस्य विषयनिरूप्यत्वात् । तथाच [illegible] [illegible], स्फुटम् अतएव 'साधु, शोभनं, कैरवं [illegible] [illegible] [illegible], इति सामान्यात् कीर्तौ चन्द्र[illegible] [illegible] [illegible] जनाना [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] वर्णनीयत्वात् [illegible] [illegible] [illegible] [illegible] [illegible]

वसुस्थितोऽपि द्विजराट् व्रजनेयश्शिवावहः ।
शिवाश्रितोऽपि सुमनो मार्गणो रतिवर्धनः ॥ २५ ॥

यः 'द्विजराट्, चन्द्रः "सोमोहवै द्विजानाᳬराजा" इति श्रुतेः, 'वसौ, अष्टमस्थाने, स्थितोऽपि 'व्रजने, यात्रायां 'शिवावहः, कल्याणकारकः, यात्रायां चन्द्रस्याष्टमस्थानस्थितत्वे मरणप्रदत्वं ज्योतिस्तन्त्र सिद्धम् एवञ्च विरोधः । वसुपदे विभवार्थकत्वस्य द्विजराजपदे ब्राह्मण पत्यर्थकत्वस्यचाभ्युपगमेन तत्परीहारः । आगत जनकल्याणकारक इति पर्यवसितार्थः । 'शिवं' शङ्करम् आश्रितोऽपियः 'सुमनः, प्रसूनं मार्गणो वाणोयस्य सः, काम इति यावत्, रतेः तत्प्रियायाः 'वर्धनः, 'आनन्दनः, शिवकामयोरर्थि प्रत्यर्थि भावाद्विरोधः । 'सुमनाः, शोभनमना, मार्गणो, याचको, यस्येति, 'रतेः' सुखस्यवर्धन इत्यर्थस्याभिमतत्वेन तत्पूत्यादेशः । "मार्गणो याचकेशरे" इति मेदिनी श्लेष भित्तिको विरोधाभासालङ्कारः तेनतयोस्संकर इति ॥ २५ ॥

प्रजानां मानसे प्रेम्णो वीजाज्जाता दयाऽमृतैः ।
प्रौढा ऽऽशंसालता कापि श्रेयो यस्य प्रसूयते ॥२६॥

प्रजाना मिति । प्रजानां मानसे यस्य प्रेम्णो वीजात्, विषयत्वं षष्ठ्यर्थः । जाता यस्य दयामृतैः प्रौढा समवेतत्वं षष्ठ्यर्थः । 'कापि, को कोत्तरा, यस्य आशंसा, समीहा, लता, विषयत्वं षष्ठ्यर्थः । यस्य 'श्रेयः' कल्याणं 'प्रसूयते, जनयति । यस्यराज्ञोऽभ्युदयं प्रजाः कामयन्त इति भावः । राजप्रजयो रन्योन्यानुरागवत्त्वं व्यज्यते । रूपकानुप्राणितो व्यतिरेकालङ्कार इत्यनयो स्सङ्कर इति ॥ २६ ॥

विवेकराकापनिकल्पितोदयः
सुधीवरव्रात निषेवितोऽजयः ।

श्री पद्मारमण प्रधानदिविषत्सद्मानि निर्मापिता
निश्छद्मानुरते दिशासु नयनालानानि यः प्राणिनाम् ।
चन्द्रद्वैत निरूप्य विभ्रमधियो नेताजनानां द्योतिता
शावक्त्रस्फुट साधुकैर विकया कीर्त्याऽभितो भ्राजते २

अथ मिथिलापतिं रमेश्वरसिंहं वर्णयति श्रीत्यादि श्लोकषट्केन 'यः, रमेश्वरसिंहो भूपः, श्रीपद्मारमणः प्रधानं येषां, तेषां 'दिविषदां' स्वर्गौकसां, सद्मानि, प्राणिनां, नतुमानवानामेव, नयनयोरालानानि बन्धनानि, तेन मद्मस्तु सौन्दर्यातिशयो व्यज्यते । 'निश्छद्मानुरतेः, निर्व्याजभक्तेः, दिशासु, नतु एकस्यां दिशि । निर्मापिता, "नलोकाव्यय निष्ठाखलर्थ तृनाम्" इत्यनेन षष्ठ्या निषेधः । दिविषत्पदोपादानेन सदा सुप्रशस्त्यं प्रतीयते । द्योतितम् 'आशायाः दिशः, वक्त्रंयया, तथोक्तया, स्फुटं, विकशितं "व्याकोशविकचस्फुटाः" इत्यमरः । साधुरेव कैरवंयया तादृश्या, स्फुटत्वस्याचेतनधर्मस्य साधौविरहेण कैरवतादात्म्यारोपस्यावश्यक तया परिणामालङ्कारः । साधुहर्षावहाकीर्तिरेतदीयेतिभावः । कीर्त्या, चन्द्रद्वैतेन ' निरूप्याः, विषयिण्यः, विभ्रमधियः चन्द्रद्वैतगोचराणि भ्रमात्मक ज्ञानानीतियावत । ज्ञानस्य विषयनिरूप्यत्वात् । तथाच चन्द्रेऽपि द्योतिताशावक्त्रत्वं, स्फुटम् अतएव 'साधु, शोभनं, कैरवं यस्मात् तत्तस्य रूपं स्फुटसाधुकैरवत्वंचास्ति, इति साजात्यात कीर्तौचन्द्रत्वभ्रमेण गगनतलवर्तिनाचन्द्रेण द्वैत भ्रमो जायते जनाना मितिभावः एवंभूतः अभितः 'भ्राजते' दीप्यते । प्रेयोऽलङ्कारोपि, पद्मापतिप्रमुखदेवादिविषयिण्या विभावाऽनुभावाभ्यामभिव्यज्यमानाया वर्णनीयराजनिष्ठाया रतेर्भावस्य प्राधान्येनध्वन्यमान राजालम्बन कविनिष्ठ रत्यात्मभावस्याङ्गभावादिति॥२४।

भाष्ये अपवादस्य क्रमः तथाहि "वृद्धिरेचीत्यस्य अदेङ्गुण इत्यत्र, एत्ये धत्यूठ्सु इत्यस्य पररूपगुणयोः, ग्याकारिभ्यो रप इत्यस्य स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यत्र पवादकत्वं द्रष्टव्यम् । न्याये गौतमीयदर्शने सच्छलता छलम् तत्र प्रमाण प्रमेय संशय प्रयोजन दृष्टान्तसिद्धान्ता वय वतर्क निर्णयवादजल्प वितण्डा हेत्वाभासच्छलजाति निग्रहस्थानानि षोड़-शपदार्थाः कैवल्योपयोगिनो महर्षिणाप्रतिपादिताः । अथ 'जैमिनिनये, मीमांसायां देवाकृतेर्द्वेपिता, तत्र मत्याख्यातं किलदेवानां शरीरम्,'अन्यथा युगपद्विधीयमानेषु क्रतुषुदेवस्य प्रामाणिक सन्निधानं नोपपद्येत इति मन्त्रात्मिकैवदेवतेति । नतुलोकेषु 'अपवादस्य, कलङ्कस्य क्रमः, निषिद्ध क्रियानाचरणात् अतएव नवा 'सच्छलता, व्याजयुक्तता । नवा देवस्याकृतेः मूर्तेः द्वेपिता देवमूर्तयो न भज्यन्त इतिभावः साङ्ख्येच साङ्ख्य दर्शनएव चोऽवधारणे । पुनरर्थकोवा । 'प्रकृतेः, मूलप्रकृतेः अविकृतिप्रकृतेः तत्त्वञ्च तत्त्वान्तरारम्भकत्वेसति तत्त्वान्तरानार-म्भपत्वम् । 'प्रधानतरता' सर्वोपादानता, "प्रकृतेर्महान् महतोऽहङ्कारः अहङ्कारात्पञ्चतन्मात्राणीत्यादि कापिलदर्शने सूत्रम् । तत्त्वान्तरानारम्भ्यत्वञ्च "मूलेमूलाभावादमूलं मूलम्" इति तत्रत्यसूत्रस्य भाष्ये विज्ञानभिक्षुणा समर्थितम् । नतु सचिवेषु प्रकृतिपदा भिधेयेषु प्रधानतरता,प्राधान्यमात्रस्यैव सत्त्वात् तच्च राजन्येव, निन्दि तं हि राज्यं सचिवेनायत्तम् 'योगे, योगदर्शने, अन्तरायस्य 'श्रुतिः, श्रव-णम् रुच एकतत्त्वाभ्यासोपयोगदर्शनाय समाधिपादे "व्याधिस्त्यानसंशय प्रमादालस्या विरति भ्रान्तिदर्शनानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः, "दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः" इति सूत्राभ्यां प्रतिपादितः ॥ नतुलोकेषु 'अन्तरायस्य, विघ्नस्य श्रुतिः सर्वेनिर्विघ्नास्ति-

अशेषरत्नानवगाहनाशयः
पयोधिवद्भूमिपति विभातियः ॥ २७ ॥

विवेकेति । यः भूमीपतिः, विवेकएव प्रकाशमानत्वादाह्लादकत्व राकापतिः, पूर्णचन्द्रः, तेन, नत्वन्यथा 'कल्पितः, जनितः, 'उद वृद्धि यस्य सः, एतेनोदये चिरस्थेमानं द्योत्यते । सुधीवराणां, विद्वद्रा 'व्रातेन' समुदयेन 'निषेवितः' सेवितः । तेन तेषां गुणग्राहित्वं राशि व्यते । 'अजयः' नजयो यस्य, सः । जयनकर्मत्वाभाववानितिपा पराक्रमातिशयोगम्यः । 'अशेषाणि, समग्राणि, अनपायानिच रत्नानि यद्वा अशेषाणां 'रत्नं, श्रेष्ठः । तथोक्तस्सन 'अनवगाहनः, ज्ञानाविष आशयः, अभिप्रायोयस्य तादृशः नीतिमार्गगामित्वं गम्यम् । अतएव योधिवत्, समुद्रेणतुल्यः, विभाति । सोऽपि विवेकतुल्येन राकापति कल्पितोदयः, 'सु, अतिशयेन धीवराणां, कैवर्तानां "कैवर्तेदाशधीवरौ इत्यमरः । व्रातेन मत्स्यादिलाभाय निषेवितः, अजयः, अशेषरत्नः, 'अ वगाहनः, स्प्रष्टुमशक्यः, 'आशयः, तलं यस्य तादृशश्चेति रूपकश्लेष जीवितो पमालङ्कारः । तथाचतेषा सङ्कर इति ॥ वंशस्थवृत्तम् "वदी वंशस्थविलं जतौजरौ" इति लक्षणान्वयादिति ॥ २७ ॥

यस्मिन् मथिलशासके फणिपते र्भाष्येऽप्यवादक्रमो
न्यायेऽप्यच्छलनाऽथजै मिनिनये देवाकृति द्वेषिता ॥
साङ्ख्येच प्रकृतेः प्रधानरता, योगेऽन्तरायश्रुतिः
वेदान्तेऽधिकभासिनिनयविदुषा मन्त्रानिवाधस्थितिः । २८

यस्मिन्निति । मिथिलानां शासके यस्मिन् भूपपति 'पण्यत भाषेन श लभ्यत्' इत्यनेन सदृशी । फणिपतेः शेषनागस्य भाष्ये व्याकरणाय ‹

वृत्तनिवन्धैरिव हीरकै[26]घटित कुण्डलिकामणि मौक्तिक मालेन्दु वदनावभासित सुन्दरीगीयमान हरिगीतमन्दा[27] क्रान्तैः, वैरोचनिभवनैरिव अनेकाशोकै[28]पलाशै[29]काञ्चन[30]मा लारोचिरञ्चितैः, मन्दंकदाचिदमन्दमान्दोलितातिह्यहि न्दोल क्रीडासंविधानवेल्लितै[32] वर्द्धमान[33]चित्रित चीनै[34]निचोल रुचिचञ्चिताभिः, वसनवदनकान्त्या शातक्रतवकार्मुकसौ दामनीप्रभाविभ्रम मावहन्तीभिः पुरुषायित सुरतकेलिम

भ्यस्यन्तीभिरिव दोलाकुतूहलकला कुशलतावलोकन सं-जात प्रमादवनदेवना वितीर्णमौक्तिक फलवर्पणैरिव निम्नो न्नयनश्रमस्वेदोन्मिषत्स्वेद कणिकाकलापैर्व्याप्त प्रतिप्रती काभिः दृशानवयौवनेनत्रिजगतीं तृणायमन्यमानाभिर्वि-लासिनीभिरुपशोभितैः, अविरतविसारविवर्तनोच्छलच्ची करनिकररुचिराभिः, चक्रवर्तिस्थितिभिरिव कुवलयासीन पक्षिभिः वेशवीथीभिरिवेतस्ततो भ्राम्यमाणमधुपावलीभिः सरसीभिर्विभासितैः, अनारतमधुलुब्धगन्धवाह पूतानून प्रसूनै रुपवनैः प्रियदर्शना। यत्रसदहा अपि श्रयन्ति विदहताम्, कलहंसा अपि नाकलयन्ति कलहंसताम्, कुशासेन समासीना अपि नपश्यन्तिकुशासनम्, मंक्षुक्षीणाक्षिपक्षनि क्षिप्ता अपि साक्षात्वसंतिक्षिपिरूपम्.

२६ हीरकं वज्रं छन्दश्च एवमग्रेऽपि । २५ मन्दाक्रान्ता [illegible] मन्दमाक्रान्तं गमनं यस्तेति च । २७ [illegible] । २८ [illegible] । ३० [illegible] । ३१ [illegible] । ३२ [illegible] । ३३ [illegible] । ३४ [illegible] । ३५ [illegible] । ३६ [illegible] । ३७ [illegible] । ३८ [illegible] । ३९ [illegible] । ४० [illegible]

सस्यभावः सतांकलहश्च । ४१ कुशासनम् कौपृथिव्यां शासनं कुशस्यासनं कुत्सितं शासनञ्च । ४२ मंक्षु सपदि, ४३ अक्षिनेत्रम् अक्षीकवि; ४४ किमपि रूपंकोपि गुणविशेषः भागवतं स्वरूपंच ।

सुरभिसमयेष्वाषाढ विलसितम्, अधरतोऽपि द्विजानामस्मृतावापनम् यान्चरत्न सानुमिवनजहातिजात्वपिसुवर्णता, यदवनीं स्पृष्टवती सुरापगापिपावयति प्राणिसामान्यानि, यदीय विश्वम्भरातोऽवततारायश क्तिरूपा विदेहनन्दिनी, यत्राश्रितकुवेरोदवसितवशीकृतचारुतोर्वशी प्रभृतिविलासिनी त्रपाकारि सौन्दर्य शालिनीनां नीलनलिननिभाः कालिन्दीकल्लोल कुटिलकटाक्षच्छटाः सुतनुश्रितकामिनीनां व्यपनयन्ति तनु वाणतांपञ्चवाणस्य, विमुग्धमुग्धाङ्गनापाङ्ग भङ्गयइवकृतयः कवीनां प्रसह्यहृदयं प्रविशान्तियमिनोऽपि, यत्रच व्यसनं शास्त्रेषु नदुरोदरादिक्रीड़ासु, हृदयग्रहण मभिषोभीयपशूनां, नपराङ्गनानाम्, वादिप्रतिवादिभावो विचारेषु नव्यवहारेषु, कर्कशता प्रत्यग्रवधूवक्षोजेषुनान्तः करणेषु, मार्गणताकार्मुकेषु, अधीरतापिप्पलदलेषु, विपदाकलन मुपवनेषु अपचीयमानता युवतिमध्यभागेषु नलोकेषु, अश्रुप्रवृत्तिर्भगवद्गुणाकर्णनेन, नशोकेन, श्रुतीनामाक्रमणं सुन्दरीलोचनैः, नपापण्डदुर्वादैः, सारसतासरसीरुहेषु नजनतासु, स्नेहविच्छेदो वैभातिकदीपभाजनेषु नदम्पतिमानसेषु, तर्कशास्त्रे जातिसङ्करः, सुरतेषु अधरपीतिः, पाद्यपि गोत्रस्खलनम् ।

सुरभिर्वसन्तोयोषिच्च, समयः कालआचारश्च, आषाढोमासोव्रतिनां दण्डश्च। अधरतः नीचात् अधरोष्ठतश्च। द्विजानां विप्राणां रदानांच। अमृतं मुक्तिः सुधाच, सुरापं गच्छति या सा सुरापगा मद्यपगामिनी सुराणामापगानदीगङ्गाच। सुवर्णताकनकत्वं शोभनचातुर्वर्ण्यतासुरूपताच। उदवसितंगृहम्, तनुः, स्तोकः। मैथिलीपूर्वश्रीप्रभृत्यपेक्षयासौन्दर्येणसुतनुपतित्वे नच व्यतिरेकः, तासांकटाक्षामदनशररूपाभवन्तीतिप्रौढोक्त्य रूपकध्वनिः। विमुग्धा विशेषेणसुन्दरी। दुरोदरं द्यूतम्। शाब्दपरिसंख्यालङ्कारः। ग्रहणमवदानाय। विचारोन्यायप्रयोगः। मार्गणतावाणत्वं याचकत्वं च। सन्तोषातिशयः समृद्ध्यतिशयोवाध्वनिरितितस्यसन्देहसङ्करः। अधीरता चाञ्चल्यमप्राज्ञत्वंच। विपत्पक्षिपदम् आपच्चिश्च। आकर्णनेनेति तथाच भक्त्यतिशयोऽपह्नुयः। श्रुतीनां कर्णानां वेदानाञ्च। सारसता सरसीरुहत्वम् अलसजनवत्वं च। रलयोरभेदात्। स्नेहःतैलं प्रेमाच। जातिसङ्करः परस्परात्यन्ताभावसमानाधिकरणयोरेकत्रसमावेशोजातित्वबाधकेष्वन्यतमः, विजातीयवर्णजातत्वंच। एवञ्चनलोकेषु इतिअर्थतः प्रतीयतेअतः आर्थपरिसङ्ख्यालङ्कारः। अधरोऽधरौष्ठोनीचश्च। नान्यदेतिआर्थः एव मग्रेऽपि। प्रावृपि वर्षासमये गोत्रस्खलनम् हृदयस्थितयोरन्यनायकयोर्नाम स्खलनम् मार्गेस्खलनं च।

बालिशतायामसद्भावः, अपवर्गयोर्लोभः, प्रतिपादनेऽसन्तोषः, वृषविदूषके द्वेषः। यस्यांचक्वचिदाम्नायक्रियाकलापेषु(१), क्वचिदीशाननवानुमानेषु(२),

१ श्रम मिमांसेवेदस्य। २ न्यायस्य।

क्वचित् पीलुपाकप्रक्रियासु(१), क्वचित् श्रुतेरपौरुषेयतायाम्(२), क्वचिद्दृष्टिसृष्टिवादे(३), क्वचित् सत्कार्यसंस्थापने(४), क्वचिन्निर्विकल्पसमाधौ[५], क्वचिद्रसध्वन्यलङ्कारकवनेषु(६), क्वचिन्नागेशोक्ति प्रदीपोद्योतेषु(७), क्वचित् ग्रहगणगणितेषु (८) क्वचित्कुण्डमण्डली निर्माणेषु, (९) क्वचित्पञ्ची प्रबन्धेषु [१०] विचारोजनानाम् ।

क्वचिद्धु द्रीय विधानमनुसेव्य केचित् भूतिभूषित भालाद्यवयवाच्छतगक्षुद्रुद्राक्षच्छायाविच्छुरितविग्रहाश्शिवलिङ्गंस्नपयन्ति परमपूतघनसारघनचन्दन शिशिर सलिलैः, क्वचिन्मार्तण्डमण्डलन्यस्तलोचना मनागप्यस्पन्दमानापघना अनाकलितरदना ध्यानं दधाना एकचरणाङ्गुष्ठस्पृष्टकुशासनाश्चित्रार्पिता इव केचित् प्रजपन्तिगायत्रीं निखिलागमैकावलम्बनीम्, क्वचित् बहुमान्यमन्येन्यासं विन्यस्यन्ति, । क्वचिद्ब्रह्मपरायण पुराणानि केचिद्वाचयन्ति, क्वचित्स्वाहाकारैः क्वचित्स्वधाकारैः क्वचिच्च वषट्कारैः केचिद्गगनवलयं वाचालयन्ति, किं बहुना, येन च कामपि

---

१ काणाददर्शनस्य । २ मीमांसायाः । ३ वेदान्तस्य । ४ सांख्यस्य । ५ योगस्य । ६ साहित्यस्य । ७ व्याकरणस्य । ८ ज्यौतिषस्य । ९ तन्त्रस्य । १० धर्मशास्त्रस्य । एतेनसकलशास्त्राभिज्ञजनवत्त्व व्यज्यते ।

सुषमां सुखं विलोकमानास्तत्र जनाःस्पृहयन्तिनामर पुरायाऽपि ॥

बालिशता अज्ञता । असद्भावः असाधुता अनस्तित्वंच । नतुजने-ष्वमः । अपवर्गयोः परापरमुक्त्योः, नतुधनेसः । प्रतिपादने दाने ज्ञानेच, नतुतत्र । दूपविदूपके धर्म्मविरोधिनि, नतुसाधौ 'आम्नायोवेदः, ईशानः शिवः । नवानुमानेषुनवसंख्याकेषुनूतनेषुचतेषु पीलुः परमाणुः, दृष्टौमत्यांसृष्टिःदृष्टि सृष्टिस्तस्यावादः एतदेवपरमरहस्यंवेदान्तस्य, सत् नित्यम्, निर्विकल्पः असम्प्रज्ञातः, नागेशः शेषः, घनसारः कर्पूरम्, अपघनोऽवयवः, न्यासम् मातृकादिकमागमोक्तम्, सुषमापरमाशोभा । इति मिथिला वर्णनम् ॥

योऽनुवासरमवसरेहरेः पूजनस्याधिमहारजनभाजन कलङ्कविकल कलकलाधर विमल सकलहरिद्विसृत्वरपरिमलमेदुर हरिचन्दनद्रवं परेणपात्रेणापिधायाध्यात्मदृग्ध्यातवेदव्रातविन्दु वृन्दारकवृन्दवृन्दारक पुरन्दरोपहृत मन्दमन्द स्यन्दि सुन्दर मकरन्द विन्दुमन्दिरोपगुञ्ज दिन्दि न्दिर पुञ्जमञ्जुमन्दारमरन्दाति रोहित वृन्दारिकादिवन्दारुत्रिजगदिन्दिरावन्दित शारदारविन्द श्रीमन्मुकुंदचरणद्वन्द्वलाञ्छनं निःपक्ष्मस्पन्दं स्वच्छन्द मौपम्यक्षेत्रीकृत शरदाशतच्छदेनाक्षियुग्मेन क्षिप्तरपत्रेऽतिक्षितिक्षणं तत्रसंवीक्ष्य क्षपितानूनकांक्षमपक्षेणतपः क्षामक्षोमतामुपेयुषा यो-

गिच्छत्रलक्षणप्रतनुविटपिनेव जटापटलान्वितेन पाटीरद्रुमेणेव नागनिर्मोकधवलीकृतकलेवरेण निवातप्रदीपेनेवनिश्चलेन, विधिनेवपद्मासनस्थायिना, हरेणेव निगृहीत विषयिणोऽपि दुरासदं परमतमानन्दसन्दोहकन्दलं विन्दन् चिरमर्चनमचर्चिकांचकार। यस्याभ्याशमासाद्यापश्यन्तश्शरणान्तरंवनदहनतुलिततापत्रितयात्यन्तिकोपशमननिदानोत्कलिकाकलापाकुल विकलमानसाः कलिकलांकलयतो विततानुभावां प्रहीणवैष्णवमनुप्रादेशनस्यानुक्रोशेन सरहस्यामधिगम्यागमीयदीक्षामञ्जसा समानयन्नात्मनःस्पृहणीयसिद्धिसमृद्धि शालितां वादविजितसभाजनसभावजनता हितसभाजन सभाजन मिथिलाभिजनाः पुरातनाः। सविधवर्तिनिच यदीयवदने प्राद्रवन् चन्द्रकान्तदृषदोऽपि। यञ्च स्वकीयरामणीयक प्रवणीभूतां नाकामयन्निकामं स्पृहयन्तीमपि परकामिनीम्।

महारजनं सुवर्णम्, मेदुरः सान्द्रः। विन्दुः ज्ञाता, । वृन्दारकोदे मुख्यश्च। इन्दिन्दिरः भ्रमरः, मन्दारः पारिजातः, मरन्दः पुष्परसः, रदा शरत्समयः। अतिक्षिति, क्षितिपति कान्तम्,। क्षण उत्सवः,छत्रंश्रेष्ठ मतनुः विपुलः। जटा,लग्नकचः। शिफाच, पद्मासन मासनविशेषः पद्मात् वपासनञ्च, विषयि इन्द्रियम्। विषयीकामश्च। कन्दलंमुकुलम्, अर्चनमर्चिका मन्त्रपूजनम्। मनुः मन्त्रः। प्रादेशनं दानम्, अनुक्रोशोदया,

ऋसा शीघ्रम्, सभाजनः सभायास्सदसोजनः सभाजनंसपर्या, भाजनं पात्रम्, सभाजननं सह भायाः दीप्ते जननेन, अभिजनोदेशः, वदन इति प्रौढोक्त्या रूपकालङ्कारध्वनिः ।

अथासौकदाचिदतिविस्तारविकरालदुःपार संसार कान्तारस्फुरत्स्फारसार सपरिवार मारप्रवेकनैकप्रकार-साभिहारसञ्चार श्वापदवारकवलितारालजङ्घाल नि-श्वास प्रासविषय महाशीविषग्रासजासोढप्रौढतर कालकूटज्वालाजालजटाल जीवजातपरीतापकलापा-त्यन्तिकनिवर्तनैकसाधनदर्शनम्, नैदाघदिवसाव-सानजायमानपावमानापदिशलसद्घनघटामेच क-च्छटां वैभवाश्रितां[१]पि मूर्तिमादधानम्, कलुषे सरोष मिव निस्तललोचनम्, करचरणयोरथनासादनेनत्या-गयोग्यतामुपदिशन्तमिवकैवल्यपरिपन्थिभूतादानक-र्माशेषविपर्येषु, चक्रेणापिदण्डाकृतिमुपेयुषा सुदर्शनेन प्रोद्भासितम्, कृतात्मानमिवसुभद्रान्वितम्, अन्तःस्थि तजगन्निवासतयाऽवधीरितगिरिगणाग्रगणनीयगौरवे, नवकामिनीमानइव प्रोन्नतमेघनादपरिगोपिते, महा गहनइव मातङ्गतुरङ्गमकेशरिसुरक्षिते, कनकाचलइव वैकुण्ठाधिष्ठितोत्तरप्रदेशे, अनङ्गेनापिभीमेन, प्रत्या-ख्यात सुगतेनापि सुगतशालिना, निर्मापिते, क्रतु

१ "जगदाधारतया" इति वा पाठः ।

ञ्चनकमलाञ्चिते काञ्चनेनकमलयालक्ष्म्याकमलेनचाञ्चिते । वाणतु·
जा,उषा, मदनमोहनोदेवः पित्तलविग्रहः, मदनस्य अनिरुद्धस्य मोहनं चि·
त्रलेखावचनप्रपञ्चश्च, प्रमदा जगन्नाथदासी युवतिश्च, तस्याःशतैः नि·
वितम् । प्रावृषेण्यम् प्रावृषिवर्षासमयेभवम्, नीलाचलावस्थितम् नील
चलः नीलपर्वतनामधेयोगिरिःअन्यत्रनीलाचला श्यामावनी, तत्रावस्थि
म् । विमलासन्नम् विमलादेव्याः । परत्र विमलस्य निःपापस्यासन्न
" विमलाभैरवीतत्रजगन्नाथस्तुभैरवः " इत्यागमाभिधानम् । सरस्व
समुद्रः सरसश्च, अप्रदेशातिरिच्यमानम् अन्तिकमितियावत् । श्रुतिश
विलसितम् श्रुतिशतं वेदशतंच, तेनतत्रवा विलसितम् । प्रधानं मु
मुख्यञ्च । दक्षिणाशादक्षिणाया द्रव्यरूपाया स्तृष्णा, दक्षिणा दिशा·
सङ्कर्षणोवलदेवः । सनाथः नाथसहितः युक्तश्च, अनाथोनाथरहितोऽन·
ष्टश्च । उदन्तोवृत्तम् । तिष्ठामीत्यादौसर्वत्रवर्तमानसामीप्येलट् ॥

मसौनिवर्तयितुंनैवप्राभवत् । अनन्तरं चादसीया·
मवसायातिभूमि मुत्कलिकां कथंकथमपितैरनुज्ञात·
गमनोऽनुकूलचन्द्रताराकेन्द्राधिष्ठितोच्चस्थशुभग्रहसमु·
दयेचरलग्नावलग्नेशोभनवासरे प्रयाणाय विशेषेणभग·
वतःपर्याप्ततानसपर्यां पर्यायेण, जजापचेष्टमनुम्, प·
पाठचभूयांसिस्तोत्राणि, जुहावचदक्षिणाश्रितशिख·
संस्कृतेजातवेदसिहविश्शान्तिमन्त्रैः, विदधौचान्या·
न्यपिकल्याणोदर्काणिकर्माणि, ततः प्रवर्धितोराशि·
भिराशिषां गुरुभिरभिवादितैः, अभिनन्दितस्समाजै·
स्सामाजिकानाम्, साश्रुधारं समालिङ्गितोवयस्यैः

कश्चिदा बहुप्रकारा, अप्रतिपत्तिर्जड़ता, मुग्धता नवयौवनत्वं मोहवत्त्वं विशेषणद्वयेन अद्भुतसौन्दर्यातिशयोऽभ्यङ्ग्यः, ज्ञातजातम् सुखसंहतिः स्मरणीयतामुपगतेषु व्यतीतेषु । पर्यायोक्तमलङ्कृतिः ॥

तेषु वासरेषु नातिदूरेऽतिमेदुरपृथुलसालप्रभृति विटपिनां पटलैर्नभस्वतान्दोलितेन मूर्ध्ना निवारयद्भिरिवदवीय सामपि पथिकानामागतानि, सुपर्णतयोचितहरिविलसितैः, लक्ष्यतया निपतितपतत्रिभिः, रविरथपथं प्रतिरोद्धुमभिलषद्भिरिव कौतूहलेन, वारणमदवारण प्रसवजाम्बवानोकह निवह दीर्घताभिमानं तिरस्कुर्वाणैः परिवृताम्, शिखरिविस्तारितशिखण्डशिखिगणमयूखजनिताशेष सुषमाम्, राजसम्पदमिव प्रभूत कनकखर्जुरावर्जिताम्, सत्पुरुष क्रियामिव 'दर्शित वंशोन्नतिम्, प्रावृषमिव घनाघनघनगर्जिताम्, सम्पराय क्रियामिवस्वच्छन्द खड्गवर्गाम्, केशवकराकृतिमिव सारङ्गसङ्गताम्, भारतकथामिव भीम सत्त्वकृत पराक्रमां कीचकविलसितां सकौरवाञ्च, राजरमणीमिव सहचरी शतसेवितां नवप्रवालरुचिरां प्रोद्गतमदनांच, मानवविवर्जितामपि पुंनागनिषेविताम्, अनलकामपिरम्भासम्भाविताम्, नेत्रविकलामपिसनेत्राम्, कुष्ठाश्रितामपि वेदनानभिज्ञाम्, वाहिनीरहितामप्यनेकगुल्मिनीम्, क्वचिद्दिवौकोभिरि

[illegible]

तेषु नाप्येवं नातिदूरे निगदुग्गुल्गुलुतालप्रभृति विटपि-
नां पटलैर्भ्रमितान्धकारितेन भूम्ना निवारयद्भिरिव
य मामपि पथिकानामागतानि, सुवर्णनयांचितदृगिवि-
लसितैः, न्नष्टयनया निपतितपतत्रिभिः गतिरिव
प्रतिरोद्धुमभिलषद्भिरिव कौतूहलेन, वारणमदवासित
भ्रमवजाम्बवानोकह निवह दीर्घताभिमानं तिरस्कु-
र्वाणैः परिवृताम्, शिखरिविस्तारितशिखण्डशिखि-
गणमयूखजनिताशेष सुषमाम्, राजसम्पदमिव प्रभू-
तकनकखर्जुरावर्जिताम्, सत्पुरुष क्रियामिव 'दर्शि-
तवंशोन्नतिम्, प्रावृषमिव घनाघनवनगर्जिताम्, स-
म्परायक्रियामिवस्वच्छन्द खड्गवर्गाम्, केशवकरा-
कृतिमिव सारङ्गसङ्गताम्, भारतकथामिव भीम-
सत्त्वकृत पराक्रमां कीचकविलसितां सकौरवाञ्च
राजरमणीमिव सहचरी शतसेवितां नवप्रवालरुचिर-
प्रोद्गतमदनांच, मानवविवर्जितामपि पुंनागनिषेवि-
ताम्, अनलकामपिरम्भासम्भाविताम्, नेत्रविकल-
मपिसनेत्राम्, कुष्ठाश्रितामपि वेदनानभिज्ञाम्, वा-
हिनीरहितामप्यनेकगुल्मिनीम्, क्वचिद्दिवौकोभिरि

वामृताशनैर्विहङ्गमैः कृतकलकलाम्, क्वचित्वलाहके रिव वनगतै स्समदश्वापदकुले र्विहित निश्वानसंकुलाम्, क्वचित विस्मितामिवशब्दरहिताम्, क्वचित् जरदजगर प्रमुखविषधरवर निकर शरण्या मरण्यानीं दूरतो ददर्श ।

निवारयद्भिरिवेत्युत्प्रेक्षा, एवमभिलपद्भिरिवेत्यत्र । सुपर्णः शोभन पर्णाश्रयः वैनतेयश्च, हरिः कपिर्विष्णुश्च । लक्ष्यता दृश्यता शरव्यताच, पतत्री पक्षीबाणश्च । वारणोगजः, निवारकश्च, जाम्बवानोकहोजम्बूवृक्षः शिखरीपर्वतः, कनकोधत्तुरः कनकं सुवर्णंच, खर्जूरः तदभिधोवृक्षः खर्जूरं रजतं च, वंशोवेणुः कुलंच । घनाघनः घातकगजः वर्षदम्भोदश्च, घनंसान्द्रम् । सम्परायो युद्धम्, खड्गः गण्डकः असिश्च सारङ्गो मृगः वैष्णवं धनुश्च । भीमसत्वम भयानकोजन्तुः भीमसेनस्यबलंच । कीचकः तन्नामधेयोवीरः अनिलाघातेन शब्दकारकोवेणुश्च, कौरवः दुर्योधनादिः शृगालश्च । सहचरी अनुचरी पीतकुरण्टकश्च । प्रवालः किसलयः विद्रुमश्च । मदनोमरुवकवृक्षः कामश्च । पुंनागः प्रशस्तः पुमान् केसरश्च । अलका कुबेरपुरी, रम्भा स्वर्वेश्या कदलीवृक्षश्च । नेत्रं नयनं सरित् द्रुममूलं कस्तूरिकामृगश्च । कुष्ठो व्रणविशेषः भेषजविशेषः आमलकीच, पुलिमनीलतेतिवा, वहनं वाहः सोऽस्त्यस्मिन्निति वाहि,नीरंजलं हितं यस्यामितिवा । अमृताशनैः आमलकी भक्षकैः सुधाभक्षकैश्च बलाहको मेघः, वनगतैः वनं विपिनं गतैः प्राप्तैः, गतंवनं जलंयेभ्यस्तैः त्यक्त जलैरिति यावत् । जातिकालसुखादिभ्यः परानिष्ठावाच्येति वार्त्तिकान्निष्ठान्तस्यपरत निपातः । जरदजगरः वृद्धोऽजगरनाम धेयस्सर्पः । अरण्यानी महारण्यम् ॥

अनिन्तनजचेतमिनिंगं मपालोन्य भीपनां नदीयाः
साकं चक्रवाकविल्गितेन आनपमतापेन कौशिकक्ल
क्लेशेन ननतनुविनोदेनन परिणतोदिवसः, मधुकर
जिराजित राजीवसदनान्तर्विलसजवमभ्रनां चिगर
निपवणादिवकरैः, वरुणवरवर्णिनी प्रोक्षितवक्षोरुह
क्षितिभृग निरीक्षणप्राप्त प्रोढ़गाढ़ानुरागादिव, समुदः
योन्मुखद्वेपणपीयूपकरग्मस्त केरव कदम्बकावलोकनो
द्यदोपादिव, कालमेपिकारुणतामुपयाति मैहिरंमहः।
आश्रयितु मनुमगतिमूरः परिहृतवसुनवरत्नाकरम्,
निजनिजशावकावनाय गृहीतविघसआवासनीड़
दिशमभिप्रयन् प्रयातिगणः खगानाम्, तदिहैवपुरि
पुरोभागमलङ्कुर्वति दिव्यदिव्योपपाद कोदवभिते
नेतव्या यामिनीति, ततस्तत्रैव समुपेत्यावस्थिति
मकरोत । तदनु भगवती सुपास्यसन्ध्यां विधानैरप
चित्यचेत सानन्येनदेवं केवलं प्रत्यवसिततदीयनैवे
द्यो विभाव्य वालामिव तरुणिमानमाश्रयन्तीं, प्रवर्त
मान यामिकजनारवां युवतिमिव कलाकरगृहीतम
ध्याम्वरां रजनीमवलम्वित कम्वलासनः सुखं सुष्वा
प । अथ त्रियामापरिणतिं पिशुनयति मागधनिकर
इव कलरुतं कलयति कलविङ्के, सान्द्रनिद्रान् प्रवोध
यितुमिव प्रणिनददतितारं दयिताश्लेषसुखद्वेषकारके

अचिन्तयच्चचेतसिचिरं समालोच्य भीमतां तदीयाश्, साकं चक्रवाकविलसितेन आतपप्रतापेन कौशिककुल क्लेशेन नववधूविनोदेनच परिणतोऽदिवसः, मधुपरा जिराजित राजीवसदनान्तर्विलसन्नवमधूनां चिराय निषेवणादिवकरैः, वरुणवरवर्णिनी प्रोक्षितवक्षोरुह-क्षितिधर निरीक्षणप्राप्त प्रौढगाढानुरागादिव, समुदे· योन्मुखद्वेषणपीयूषकरसख कैरव कदम्बकावलोकनो द्यद्रोषादिव, कालमेषिकारुणतामुपयाति मैहिरंमहः। आश्रयितु मनुसरतिसूरः परिहृतवसुनखेवररत्नाकरम्, निजनिजशावकावनाय गृहीतविधसआवासनीड़ दिशमभिप्रयन् प्रयातिगणः खगानाम्, तदिहैवपुरि पुरोभागमलङ्कुर्वति दिव्यदिव्योपपाद कोदवमिते नेतव्या यामिनीति, ततस्तत्रैव समुपेत्यावस्थिति मकरोत। तदनु भगवती मुपास्यसन्ध्यां विधानैरप· चित्यचेत सानन्येनदेवं केबलं प्रत्यवसिततदीयनैवे· द्यो विभाव्य बालामिव तरुणिमानमाश्रयन्तीं, प्रवर्त मान यामिकजनारवां युवतिमिव कलाकरगृहीतम-ध्याम्वरां रजनीमवलम्बित कम्वलासनः सुखं सुष्वा· प। अथ त्रियामापरिणार्तिं पिशुनयति मागधनिकर इव कलरुतं कलयति कलविङ्के, सान्द्रनिद्रान् प्रबोध यितुमिव प्रणिनददातितारं दयिताश्लेपसुखद्वेषकारकं

ताम्रचूडे, शीतलं वहति मृदुलमनारतकेलिश्रमस्वेदशीकरनिकरापहारिणि चुम्बितचन्दने परिशीलितकावेरिणिमलयसमीरणे, प्रियागमनप्रतीक्षाक्षपिताखिलक्षपाक्षणाहितामर्षेणेव

अचिन्तयदिति, यामिनीतीत्यनेनान्वेति । साकमिति सहोक्तयलङ्कारः । कौशिकः उलूकः । दिनेतस्य दर्शनशक्तितिरोभावात् क्लेशः । विनोदेनेति, रात्रौतासा क्लेशोदयाद्दिव सएवसुखम् । मधुपोभ्रमरोमद्यपश्च राजीवं कमलं तदेवसदनम् । मधूनां पुष्परसानां मद्यानाञ्च, करैः किरणैः हस्तैश्च । मद्यालये मद्यपास्तीष्ठन्तीति वस्तुस्थितिः । वरुणवरवर्णिनी पश्चिमाशा, प्रोच्छ्रितः उत्तुंगः । क्षेपादिति अन्योऽन्यरातिसपक्षोन्नतिं विलोक्यकुप्यतीति । कालमेषिका मंजिष्ठा । इमाअलंकारान्तरोत्था उत्प्रेक्षाः । शूरः सूर्योवीरश्च, वसुकान्तिर्धनंच, रत्नाकरः समुद्रः रत्नानामाकरोभूपतिश्च, वीरस्नेजमारहितो जलादौ प्राणान्जहाति, इतरोऽपि विगलितविभवः प्रभूनरत्नं पुरुषमाश्रयते । विघसः स्वभुक्तावशिष्टः । दिव्य उत्तमे, दिव्योपपादकादेवः । अपचित्य सम्पूज्य । भत्यवसितं भुक्तम् । कलाकरश्चन्द्रः सकलकलाभिज्ञोनायकश्च, अम्बरमाकाशं वसनं च । पिशुनयति सूचयति, कलरुतं मधुरशब्दम् । कलविङ्केचटके । ताम्रचूडे कुक्कुटे ।

लोहितवदनायां पुरोदिगङ्गनायाम्, सुचिरसमयव्यापृतनिधुवनरभसपरिश्रमालस विलासिन्यामिव निमीलित प्रायतारकायांक्षणदायाम्, परिव्राजकेष्विव स्निग्धदशाविधुरितेषु भ्राम्यत्सु विशिखेषु प्रदीप नि

अचिन्तयच्चचेतसिचिरं समालोच्य धीमतां तदीयाम्, साकं चक्रवाकविलसितेन आतपप्रतापेन कौशिककुल क्लेशेन नववधूविनोदेनच परिणतोदिवसः, मधुपराजिराजित राजीवसदनान्तर्विलसन्नवमधूनां चिराय निषेवणादिवकरैः, वरुणवरवर्णिनी प्रोक्षितवक्षोरुह-क्षितिधर निरीक्षणप्राप्त प्रौढ़गाढ़ानुरागादिव, समुदेयोन्मुखद्वेषणपीयूषकरसख कैरव कदम्बकावलोकनोद्यद्रोषादिव, कालमेषिकारुणतामुपयाति मैहिरंमहः। आश्रयितु मनुसरतिसूरः परिहृतवसुनवेवरत्नाकरम्, निजनिजशावकावनाय गृहीतविधसआवासनीड़ दिशमभिप्रयन् प्रयातिगणः खगानाम्, तदिहैवपुरि पुरोभागमलङ्कुर्वति दिव्यदिव्योपपाद कोदवमिते नेतव्या यामिनीति, ततस्तत्रैव समुपेत्यावस्थिति मकरोत। तदनु भगवती मुपास्यसन्ध्यां विधानैरपचित्यचेत सानन्येनदेवं केवलं प्रत्यवसिततदीयनैवेद्यो विभाव्य वालामिव तरुणिमानमाश्रयन्तीं, प्रवर्तमान यामिकजनारवां युवतिमिव कलाकरगृहीतमध्याम्बरां रजनीमवलम्बित कम्बलासनः सुखं सुष्वाप। अथ त्रियामापरिणतिं पिशुनयति मागधनिकर इव कलकलं कलयति कलविङ्के, सान्द्रनिद्रान् प्रवोधयितुमिव प्रणिनददतितारं दयिताश्लेषसुखद्वेषकारकं

ताम्रचूडे, शीतलं वहति मृदुलमनारतकेलिश्रमस्वेदशीकरनिकरापहारिणि चुम्बितचन्दने परिशीलितकावेरिणिमलयसमीरणे, प्रियागमनप्रतीक्षाक्षपिताखिलक्षपाक्षणाहितामर्षेणेव

अचिन्तयदिति, यामिनीतीत्यनेनान्वेति । साकमिति सहोक्त्यलङ्कारः । कौशिकः उलूकः । दिनेतस्य दर्शनशक्तितिरोभावात् क्लेशः । विनोदेनेति, रात्रौतासां क्लेशोदयाद्दिव सएवसुखम् । मधुपोभ्रमरोमद्यपश्च राजीवं कमलं तदेवसदनम् । मधूनां पुष्परसानां मद्यानाञ्च, करैः किरणैः हस्तैश्च । मद्यालये मद्यपास्तीष्ठन्तीति वस्तुस्थितिः । वरुणवरवर्णिनी पश्चिमाशा, प्रोच्छ्रितः उत्तुंगः । रोषादिति अन्योऽपरातिसपत्नोन्नतिं विलोक्यकुप्यतीति । कालमेषिका मंजिष्ठा । इमाअलंकारान्तरोत्था उत्प्रेक्षाः । शूरः सूर्योवीरश्च, वसुकान्तिर्धनंच, रत्नाकरः समुद्रः रत्नानामाकरोभूपतिश्च, वीरस्तेजसारहितोजलादौ प्राणान्जहाति, इतरोऽपि विगलितविभवः प्रभूतरत्नं पुरुषमाश्रयते । विघसः स्वभुक्तावशिष्टः । दिव्य उत्तमे, दिव्योपपादकोदेवः । अपचित्य सम्पूज्य । प्रत्यवसितं भुक्तम् । कलाकरश्चन्द्रः सकलकलाभिज्ञोनायकश्च, अम्बरमाकाशं वसनं च । पिशुनयति सूचयति, कलरुतं मधुरशब्दम् । कलविङ्के चटके । ताम्रचूडे कुक्कुटे ।

लोहितवदनायां पुरोदिगङ्गनायाम्, सुचिरसमयव्यापृतनिधुवनरभसपरिश्रमालस विलासिन्यामिव निमीलित प्रायतारकायांक्षणदायाम्, परिव्राजकेष्विव स्निग्धदशाविधुरितेषु भ्राम्यत्सु त्रिशिखेषु प्रदीप नि

वहेषु, वियुक्तजनायतोपचित निःश्वासवैश्वानर नितान्तपरीतापेनेव प्रोन्नतसपत्नारुणवैजयन्ती प्रदर्शन जनितासोढ शोकेनेव क्षणमप्यविषह्य प्रेयसी वियोगेनेव अधिपश्चिम सलिलनिधि निमज्जति निशानायके, वटुपटलसमारब्धस्वाध्यायाध्ययनध्वान प्रबुद्धाध्वनीन धृतासुपद्धतिषु, प्रमथगणेष्विव भैरवरागानुरञ्जितमानसेषु लोकेषु प्रत्यूषसि विसृष्टशयनो निर्वर्तित स्नानादिक्रियो नातिदूरसुरपदं समारूढे सारस मिव जगतीतलं विकाशयितरि सवितरि दक्षिणादेशायायिनीं पदवी मशिश्रियत् । अशृणोच्च

"हरिभक्तिभरश्शरीरिणां, यदि वाधैरतिरस्कृताभवेत् ।
जनविस्मय दायिनीतदा, संसिद्धिर्नचिरायजायते ॥"

इत्यपरवक्त्रकं मधुरस्वरेणोद्गीयमानं केनापि । ततोऽतिक्रान्तेषु कतिपयकालेषु पौरस्त्याकलितस्यतन्महावनस्य प्राच्येनाध्वना प्रतिषिद्धगमनेनाप्यविदित प्रवृत्ति गच्छन्नभिवीक्ष्यान्तरीक्षमध्यलक्ष्मीमालिंगितु काममिवोद्यान्तं तीक्ष्णमरीचिमालिनं माध्यन्दिनसवनायतत्सवेशेसन्निवेशेन निरन्तरदलसन्ततीनामातपत्रानुकारिणो निषंगस्येव शिली

तारका नक्षत्रम् अक्ष्णोः कनीनिकाच । परिव्राजकोयतिः, द्विनवदशा सतैलवर्तिका प्रेमयुक्तावस्थाच, भ्राम्यत्सु इतस्ततस्सञ्चरमाणेषु घू·

र्णमानेएव, विशिखेषु रेत्या शिखयाचरन्तिषु, आयतोदीर्घः, वैजयन्ती पताका मेयती निशात्मिका । अध्वनीनः पथिकः पद्धतिर्मार्गः । सज्जयन्तीष्विति बहिर्गमनायेति भावः । भैरवरागः शिवविषयिणीमीतिः भैरवाभिधानोरागश्च, छ्रपदम् आकाशम् । दरीत्यादि, एतेन भाविकालभुज गभीतिशान्तिः सूचिता ॥ अपरवक्त्रकं वृत्तम् । पौरस्त्यं पूर्वम्, प्रतिषिद्धेति कालसर्पोपद्रुतेरिति भावः, अविदित प्रवृत्तिरितिगमनेहेतुः प्रवृत्तिः वृतान्तः, भवनायपूजनाय, निरन्तरदलसन्ततीनां सन्निवेशेनेत्यन्वयः । निषंगः इषुधिः, शिलीमुखो वाणः मधुकरश्च ।

सुखनिषेवितस्य तरुणीचरण पुरातनाघातसंजातकोपादवसरं सरन्नेववैरिविरहिणी दहनाय प्रत्यग्रप्रवाल जालच्छलेनानलास्त्राणीवसन्दधानस्याशोकानोकहस्य शीतलेतले गृहीतासनोनारायणनमस्या मतनोन्नानाविधैर्वनभवप्रसूनैः । अथतद्वाटिक महाटवीनिकटातिस्फुटग्णत्प्रोद्भटघण्टिकाटङ्काराकर्णनोद्रिक्त क्रोधातिरक्तनेत्रजगतीग्रासप्रसक्तशक्तव्यक्त समभिद्रवत्कालकरालवक्त्र निर्यद्धालाहलमहानलज्वलज्ज्वालाजालजर्जरितसनसा श्वासनिश्वासश्वसनस्यदसन्दह्यमानविपिनम्, प्रकृत्यैवाऽक्षेत्रतयाक्षान्ते दिक्षुविदिक्षुचालक्ष्याण्यपि प्राणिलक्षाणिक्षणादेवप्रत्यक्षमात्रेणाति तमां क्षोभयन्तम्, अन्तकस्यापि भीतिमुपजनयन्तं, वनदेवतामपि कान्दिशीकतांनयन्तम्, प्रकुपितभोगिराजमिव वर्धितभीषणभोगभाजं, भाद्रभीमदर्श विभावरी-

मपी[1] कालभावादधः कुर्वाणम, अहर्पतिदर्पस्फुरत्फणाफूत्कारस्फारथूत्कृतीनां वृष्टिमुष्टिभिस्तिरोदधतम्, भैरवरूपिणमप्यशङ्करं, काद्रवेयपतिकम्पसम्पादक मप्यशेषकम्पलम्पटम्, शोषयन्निवायूंषि सर्वतोमुखानि जनिजुषाम् उन्मत्तमिवमदं, यौवनमिवक्रूरभावस्य स्वरूपमिवमहोत्पातसागरस्य, अभिमानमिवहिंसायाः सर्वस्वमिवकरालतायाः, धावमान (१) माञ्जनपुञ्जमिव, तमस्तोममिव, श्यामलशिलोच्चयमिव, सान्द्रतमाल तरुसमुदयमिव, यामुनह्रदमिव समुद्गतम्, पातालान्धकारमिव मध्यभुवनमाश्रित माजङ्घ्यमानं कालसर्पेन्द्र मर्पितमात्रे जपेपश्यन्नेवपुलकितस्स्वेदितस्समवेपत । समस्फुटदिवचसहस्रधा

आघातेति युवतिपदाघातेनाशोके पुष्पोद्गमोभगवतीतिकविसमयः । अवसरं प्रिय वियोगात्मकम, सरचेव प्राप्नुवन्नेव । अकृतोह्यवृक्षः नमस्यां पूजाम् । तद्घाटिकः तस्याघटिकाया अयम् एपचटङ्कारस्यविशेषणम्, नेत्रान्तंचवक्त्रस्य, कालोयमः नमानासिका, निः श्वासोमुखवायुः, स्पदोषेगः, अवक्ष्याणि द्रष्टुमनीप्सितानि, कान्दिशीकनां भयद्रुतताम्, भोगिराजं शेषनागम्, भोगःफणा कालभावात् श्यामत्वात्, भैरवश्शिवोभयानकश्च, शङ्करश्शिवः कल्याणकारकश्च । काद्रवेयोनागः, अशेपकम्पलम्पटम्

---

१ माधुषानोरात्मनेपदित्वमपि प्रयोगे दृश्यते, यथा हर्षचरिते गंगावर्णने "धर्मधेनुमिवा, मा धवल पयोवगाम" इति ।

न [illegible] । [illegible] । [illegible]-
[illegible], [illegible] : [illegible] । [illegible]
[illegible] ।

हृदयेन, ततः क्षणेनैव धैर्यमाधाय प्रतिविधानं विस्मृत्यान्यत्साधनान्तर मनवलोकयन्

" कारुण्यैकरसामनन्यशरणश्श्रीमन्तमभ्यर्थये
कालव्यालमुखान्तरालपतितं मो बालमाम्पालय" ।

इत्याकस्मिकावभासेन पद्मपादयुगळेन भक्तवत्सलं हरिमापन्नार्तिनाशनमार्त आर्तयत । अस्मिन्नवसरेद्रागेवसमुद्भूतोग्रनिरवग्रहावग्रःग्राहगृहीताङ्घ्रिसिन्धुराग्र्यः, करुणासिन्धुर्दीनबन्धुर्मधुनिषूदनोऽतिदन्तुरं, तुरगरूपमतनुतनुकं, पृथुप्रोथं, ग्रीवापघनप्रभवलोमस्तोम प्रतिरुद्ध यादृच्छिकवारिवाहप्रचारम्, अजस्रं विपुल पुच्छ गुच्छ धूनन घोणकोण निर्गच्छत्प्रभञ्जनाभिक्षिप्ताभ्यर्णचरसहस्रं, विकटटापकुट्टनभयकम्पमानकूटभृतं, स्वायतागतमपि विततमतमश्श्यामरश्मिसम्बद्धं, हयग्रीवभक्तिभरविवर्तमपि उच्चैश्श्रवसं भीष्मेणाप्यशान्तनवेनाक्षियुग्मेनाभिवीक्षमाणम्, ऊर्ध्वीकृतमूर्धानमुपधायवधाय शतधासत्वरतरन्तमुरगवरं विभज्य वज्रविद्वेषिणाप्रोन्नतेनदन्तेनान्तिकमन्तकस्य झटिति समयापयत, क्षणेनपुनरदृश्यतामुपागमत् । सचतदानीं कलावेतमद्भुतमभूतपूर्वञ्चात्मनि

भगवतोऽनुभावं निश्चितेनचक्षुषानिरीक्ष्यशमनवदन गर्भमुक्तमिव, अभिनवं जगतिजातमिव, दहनोदरादागतमिव, महोदधिमध्यनिमज्जनान्निस्तृतमिव, शान्तेनसं स्वंमन्यमानंपरिच्छेदरहितैः, परश्शतैरपिवचोभिरगोचरैः, हर्षप्रकर्षैरन्तर्मातुमशक्नुवद्भिरिववाष्पकैतवेनवहिरागतैः कियत्कालमवापवाह्यान्तर्वृत्तिविसर विधुरां, मोहमयीमिव, शून्यमयीमिव, कैवल्यमयीमिव दशाम् । ततोऽभितोष्टूय्यप्रकटितदयोदयमिष्टदेवं विधायचनिर्वाधसञ्चारं तत्प्रदेश मवाप्यचानपायिनं सकलामोदिनमकलङ्किनंकमपियशः कलाकरं निश्शङ्कः परास्तातङ्क ऋजुनैववर्त्मनाप्रववृतेगन्तु मिति ॥

इति मैथिल श्रोत्रिय श्रीवालकृष्ण मिश्र विरचितायां
श्री ५ लक्ष्मीश्वरी चरिताख्यायिकायां
प्रथम उच्छ्वासः ।

रसा भूमिः । आर्तथत प्रार्थयत् । निरवग्रहोनिः प्रतिवन्धः, अवग्रहो विघ्नः, सिन्धुराग्र्यः गजेन्द्रः, तनुः कृशश्शरीरं च, प्रोथः नासिका, अपघनोऽवयवः, घोणोनासिका, कूटभृत् पर्वतः, रश्मिः प्रग्रहः किरणश्च, हयग्रीवो नारायणः, उच्चैश्श्रवाः इन्द्रतुरगः । उन्नतकर्णश्च, वज्रविद्वेषिणा वज्रतोपिकठिनेन, शमनोयमः, अभिनवमिति जनिक्रियाविशेषणम् । एनः पापम्, भीतिजन्यदुःखभोगेन पापशान्तिरितिभावः । वाह्यवृत्तिः वाह्येन्द्रियसन्निकर्षजन्यावृत्तिः अतथाभूताचान्तर्वृत्तिः, विसरः संभूतः । निश्शङ्कत्वं परास्तातङ्कत्वंच ऋजुवर्त्मनागमनायप्रवृत्तौहेतु रिति ॥ इति प्रथम उच्छ्वासः ॥ ❀ ॥

अथ द्वितीय उच्छ्वासः ।

पुण्याचरणपवित्रितकायोऽमलमानसोनिरतः ।
केशवचरणसरसिजेप्रभवति कर्तुं न किं कस्मिन् ॥

अथगच्छतश्चास्यबहुपदइवदुर्विधक्लेशान्त कारकः, वलीयानिवशूरंकरमन्दकरः, कांसार इव मनाग्दर्शितवासरः, नागरतरुणइवश्यामानन्दनः, लौकायतिकइव अभियातिसदागतिः, शाकद्वीपइव प्रियचित्रनिषेव्यमाण भानुः, यातुधानइव अमृतावगाहनसुखवञ्चितः, व्यभिचारिनायकइव परमहेलाधररसलम्पटः, तिमिरोत्कारइव तापनाशनः, शाब्दिक प्रयोगइव बाहुलकानुगतः, हरिरिवानतिशयितसुरतामोदजननः, साधुरिव प्रदर्शिताभिनन्दनीयफलशालिमार्गः, निदिध्यासनसमाधिरिव प्रमुदितक्षेत्रवान्, नयरक्षितभूपतिरिव विगत कमलोच्चयः खलशोभा वहश्च, कामयमानइवजातपुलकः, हेमन्तसमयस्समीपाय, यत्राञ्चलवितानाञ्चितकुचशिखरियुगलान्तराल नीतवदेनास्सुकृतिनोयुवानः प्रमदयानन्दसन्दोहमनुभवन्तिकमपि, पृथुकरूपमाकलय्य संयाततनयाइवासादयन्तिसुखंकृषीवलाः, सुपीमबहुलेनापियेनोपचीयतएवसन्तापो वियोगिनाम्,

गीः । पुण्येति, एतेन भवितव्यत्री भूतानितनयशोगताग्निरमुनिश । शुरकरः रविकिरणः नोत्कटश्च । वासरः दिनं मणिविशेषश्च । पङ्क्तेरित्यस्य लघुत्वेनपनारदर्शिनत्वमितिभावः । इन्द्रापाराग्निः तदानन्दनोत्पत्तिः सुरवर्गोत्तमाच । लौकायतिकश्चार्वाकः, अभिपातिः, द्वेष्यः, मन्दागतिः ९ नस्स्वर्गेश्च । चित्रभानुः भास्करोऽनलश्च । अमृतं जलं सुधाच, अवगाहं स्नानमास्वादश्च । परपाहेलासुरतस्यपीठेच्छायत्रमचामानवररमस्यलम्पटः शोपकः, तत्र व्रणोदयादिति । अन्यत्र परपहेलायाः परकीयवनितायां अ घररमस्य लम्पटः कामुकइत्यर्थः । तापस्यनाशनः अन्यत्रतापनस्यमानोस्वतः भक्षणीयइति । बाहुलकः कार्तिकः । बाहुलकं क्वचित्प्रवृत्तिरित्यादिवत्तुर्विध शब्दशास्त्रेप्रसिद्धम् । सुरतामोदः सुरतेनामोदः देवसमुदायामोदश्च । अभि नन्दनीयफलाश्शालयो यत्रसचासौमार्गः मार्गशीर्षः । अन्यत्रतादृशफलेन शालीशोभमानोमार्गः पन्था इति । क्षेत्रवान् कृपीवलः जीवश्च । कमलोचय पङ्कजसमुदयः लक्ष्मीसमुदयश्च । खलः धान्यस्थापनादिस्थानंदुष्टश्च प्रमदयेतितृतीयार्थोनयनक्रियान्वयी । पृथुकः चिपिटान्नं बालश्च सुषीम शैत्यम् ।

ततोविपुलफलभरभाराभिनन्दितजनिजुषांखपुर-खर्जूरलाङ्गलिप्रमुखशाखिनां भुक्तविप्रलम्भाभिरिवव-ल्लरीभिस्सविस्रम्भदृढपरीरम्भारम्भसम्भोगसम्भाविता-नां शातकुम्भशोभिसुरभिसम्भुग्नस्तम्भोरुप्रसवसम्भारो-पलम्भाति भासुररम्भाजम्भलद्रुमाणां स्तम्भितजम्भा-हितारामरमणीयदम्भामुपाटवींविलोकयन् प्रमोदमा-नमानसोऽसौनातिदूरेरसवतीरसानुबुभूषयाऽऽगतंविद्या

धरपुरमिव सागमोल्लसितद्विजनिकरं कुसुमसमयमिव, परिक्षयाकृतपरिवेषं चन्द्रमण्डलमिव, सानेक प्रालेयशैलमिव प्रासादैः, दुग्धोदधिमिव मणिमौक्तिक विद्रुमैः, पुरुहूतपत्तनमिव बुधगुरुकविकलाधरैः, विश-ङ्कटसङ्कटं, निरर्गलार्गलगोपुरं पुरं पुरतः सम्पश्यते चित्ररेखाप्रभृतिलेखालयाङ्गनाजनेष्यमाण निष्कृपकृप-णलेखासमुदयस्य, जलधरस्येवविमलतरवारिधाराव-धीरितपरिपन्थिप्रतापस्य, सरस इव पद्मोल्लासभासित-स्य, प्रौढयुवतिवक्षोरुहस्येव सुवृत्तमनोहरस्य, पवनाश ननायकस्येव धृतक्षमस्य, प्रकृत्यादक्षिणस्यदक्षिणक्षो-णीरक्षिणोनिरीक्षमाणः क्षिप्रमेष्यन्तीं क्षपाकापालिकी मवधायसन्ध्यया तदीयपानाय सम्पादितइव मदिरारसे रागकैतवेन, दिवसश्रियाश्रितवारुणीकम्बरं परिहरति पश्चिमगिरिगहनकेलिकामुके पूषणि.

जनिजुषां प्राणिनाम्, सर्वेषामेवतद्वासेरित्याशयः । खर्जुरः गुवाक पादपः, लाङ्गली नारिकेलः, शातकुम्भं सुवर्णम्, हुरुः, कुटिलः, [illegible] मरान्, जम्भलः दाडिमः, जम्भारिः इन्द्रः, [illegible] च, अनन्तभोगी असङ्ख्यातो भोगवान्, अनन्ताभिध नागराट्, [illegible] मेत्यादि, आगमः शास्त्रम् । द्विजो विप्रः, अण्डजोऽपि, [illegible] पत्तनं नगरम् बुधः पण्डितः चन्द्रात्मजश्च, गुरुः [illegible]

[illegible] पानं [illegible] कर्तृकं पानं । [illegible] भावः, [illegible] पश्चिमाशा, [illegible] अम्बरमाकाशं वसनं च, [illegible] न्वेति तृतीयायास्सहार्थकत्वात् ।

निशावसानोन्मिषत्प्रणयकलहकुपितापनोदनान्तराय-तरणिसमुदयावलोकनायातभामिनीमानापहरणोत्क-लिकाकलापमुपनेतुमायातिकुमुदिनीनायके, सञ्च-रणमारभमाणेषु शम्भलीजनेषु, अभिसरणपथ्य नेपथ्यधारिकास्वभिसारिकासु, सखी सुरत कौतूहलोद-वसिते वयस्याभिः स्थाप्यमानासु पञ्जरस्थसारिकासु, विधिवश विघटमाने चक्रवाकमिथुने, त्रिदिवमिव साप्सरोहंसक्करणितरामणीयकम्, कृष्णचरितमिव शुकभाषितम्, सदाचरणपरायणमिव सुकृतमालाचि तम्, तारुण्यमिव मन्मथावापितच्छायम्, अभिजन

मिव पुन्नागदीपितम्, अनागरिकमपि श्यामालिंगितम्, नवदरेणाऽपिनदरेण पलाशिनाऽपि हरिप्रियेण रुचिरम्, चम्पकवकुलमालती माधविकाकामिनी मदनमञ्जरीद्रुमैर्मञ्जुलम्. वियोगिविसरविशारणायमारमाधकाभिचारमन्त्रोच्चारणध्वनिभिरिव परिमलमुदितचञ्चरीकनिचयगुञ्जितैरासञ्जितम्, । अलकाया इव पुटभेदनाद्बहिर्विद्यमानमुद्यानं सान्ध्यविधिविधानाय समासाद्य सम्पादिताशेषकृत्यः क्षपां क्षपयितुङ्कस्यचन घनच्छदन ..ाखाविशालस्य रसालशालस्य प्रच्छायतयाऽशीतलेतले विहितासनपरिग्रहः तदातदासन्नप्रदेशेषु भ्राम्यता नागरिकेण केनचिदा याय दर्शनमात्रोपजात

शम्भली कुट्टिनी । पथ्यं, समुचितम्, नेपथ्यं वेशरचना । साप्सरोहंसकः सजलसरोवरस्थहंसः तत्परणितेन रुतेन रामणीयकंच च तत्, अप्सरसां पादकटकरणितेन यद्रामणीयकं तेनसहितञ्च । शुक्रः कीर शुक्राचार्यश्च । सुकृतमालाचितम् अतिशयेनशोभनैर्वाकृतमालैराजवृक्षैः, सुकृतस्य पुण्यस्य मालयापरम्परयाच व्याप्तमिति । मन्मथः कपित्थः मदनश्च, छाया पत्रच्छायाकान्तिश्च । अभिजनःकुलंदेशश्च, पुन्नागः देववल्लभपादपः पुरुषश्रेष्ठश्च । अनागरिकं नागरिक जनातिरिच्यमानं नगरेऽजातंच नगरवाह्यत्वस्य तस्योद्याने वक्ष्यमाणत्वात्, श्यामामुग्धयोवनाप्रियंगुश्च । नवदरेण वदरभिन्नेन, नवदलवताच रलयोरैक्यात्, ।

यितो शुक्रश्च, कलाधरः कलाभिज्ञश्चन्द्रश्च, विशङ्कटैः महद्भिर्जनैः सङ्कुलं व्याप्तम्। निरर्गलः अनाधिता अर्गलायाम्भोयत्र तादृशं। गोपुरं पुरद्वारं तत्तथोक्तम। सम्परायोयुद्धम्, एतेनराजविषयिणीचित्रलेखादिनिष्ठा प्रीतिर्ध्वन्यते। विमलेति, विमलयातरवारेःखड्गस्य धारया, विमलतरया धारिणोधारयासम्पातेनच,। अन्तर्धारितः परिपन्थिनां, परिपन्थीव प्रतापस्तेजःप्रकृष्टस्तापश्चयेनतस्य,। पद्मोल्लासः सम्पदः, कमलस्यचोल्लासः,। सुवृत्तं शोभनमवृत्तिः तेन मनोहरः। सुवृत्तोवर्तुलोमनोहरश्च, पवनाशननायकः शेषः, क्षमा शान्तिः पृथ्वीच, रक्षितइत्यस्यपुरमित्यनेनान्वयः,। तदीयपानं क्षपाकापालिकीकर्तृकं पानं। क्षपागतौ।गनाशादितिभावः, वारुणी पश्चिमाशा,मद्यंच, अम्बरमाकाशं वसनंच, दिवसश्रियेति श्रयणेकर्मणोवान्वेति तृतीयायास्सहार्थकत्वात्।

निशावसानोन्मिषत्प्रणयकलहकुपितापनोदनान्तराय-तरणिसमुदयावलोकनायातभामिनीमानापहरणोत्कलिकाकलापमुपनेतुमायातिकुमुदिनीनायके, सञ्चरणमारभमाणेषु शम्भलीजनेषु, अभिसरणपथ्यनेपथ्यधारिकास्वभिसारिकासु, सखी सुरत कौतूहलोद्वमिते वयस्याभिः स्थाप्यमानासु पञ्जरस्थसारिकासु, विधिवश विघटमाने चक्रवाकमिथुने, त्रिदिवमिव साप्सरोहंसकरणितरामणीयकम्, कृष्णचरितमिव शुक्रभाषितम्, सदाचरणपरायणमिव सुकृतमालाचितम्, तारुण्यमिव मन्मथावापितच्छायम्, अभिजन

पलाशिना मांसाशिना पत्रवताच, हरिप्रियेण हरिप्रीतिविषयेण, हरिप्रियेण कदम्बद्रुमेणच। विसरः समुदायः। विशारणं मारणम्, मारः मारणकास्मर स्सएवसाधकः अनुष्ठाता, तस्यनामाधकः कार्यकारकश्चञ्चरीकः, उच्चारणध्वनिभिः अनेकेषां युगपदुच्चारणेध्वनिर्जायत इतिवस्तुस्थितिः' अभिचारप्रयोगेवाचिकजपस्यैवागमेविधानमितिनकाप्यनुपपत्तिः । अकवायाइवेति, "वाद्योद्यानस्थित हरशिरश्चन्द्रिकाधौतहर्म्या" इति मेघदूतकाव्येकालिदासस्य महाकवेरभिधानात्, पुटभेदनं पुरम् । क्षपयितुंगमयितुम्। छदनं, पत्रम्, शालोवृक्षः,

नितान्तभक्तिना सपदि शिशिरसुरससुमनःसुरभितसरोवारिणावहुविधफलपुष्कलेनोपवनसमुचितेनातिथेयेनातनितसत्कृतिः प्रणम्य कौतुहलापहृतहृदयेन सविनयमन्वयुज्यत, देव ! महजवैयात्यशतस्याधमतमजनस्य सुलभैवभवत्यशालीनता, याचक्षमणीयैवस्यात्सांसिद्धिकशान्तिशालिभिभवादृशैर्महानुभावैः, सौम्य ?

"स्वसजातीयोत्कर्षः प्रायेणहिदुस्सहोभवति"

इति भवदीय विलोकनाकलिताशेषसुखभागिनी लोचनेमोद्धुमशक्नुवान श्रवणेन्द्रियं भावत्कचवदनचन्द्रिमदीप्तिपरिचयप्रवृत्तिमन्नतिनिशमनसुधापानं प्रार्थयति माक्तवहितम्, आर्य ! कतमं देशकं ज्ञापयितुमनानाना, कस्यपुण्यास्पदस्यजनपदस्य

राघवस्य, पुरुविपोग्वस्य, चन्द्रइव यादवस्य, मना-
गप्यनासृष्टपरीवादपङ्कतयाऽतिविशदयशसो घुसौता-
न्वयस्य निदानं नैमिषाटवीस्थलइव क्रतुसमाजगण-
विमलः, क्षितिपालभालदेशइव धीरोज्ज्वलः, राका-
पतिरिव वाडवकुलामोदकरः, श्रोत्रियाग्रेसरः षट्कर्म
तयानयाधिकः, ठक्कुरोपनामधेयो विधीयमानमहाऽ
ध्वरपञ्चकः कृतिकुलकमल विकाशकोऽविकरः पवित्रया
मासजन्मनाधरणीतलम् । येनात्मनासमानः प्रथमा
यां पत्न्यामुपदेशकौशलकृतकेनान्तेवासिनिकरे स्फी
तमतितोयकरोबुद्धिकरः। रतिकान्तइव विबुधप्रसादको
ऽसदलक्ष्यःकान्तश्चरतिकान्तो द्वितीयाया मुदपादिषा-
ताम्, तयोरादिमो नगवारेति दरोगाढेतिनामकं सं-
वसथमसङ्ख्यसङ्ख्याघदतिक्रान्तवैदुष्यपरितोषितेन
महीभृतोपहारीकृतमुपार्जिजत्, यतो घुसौतनगवारे-
ति घुसौतगढेति मूलग्रामौ प्राचीनसम्प्रदायानुरोधेन
तावविन्दताम् । तत्ररतिकान्ततः कीर्तिप्रकरकरः
कीर्तिकरः ततश्चदूवदनाभिधानः परमपावनः प्रादुरा-
सीत् । बुद्धिकरस्तु समस्तप्रशस्तक्रियावपास्तनिर्वादौ
सुगृहीतसम्विदौ हलधरकेशवाविव गोकुलगोपकाव-
क्रूरपक्षपातिनौ हलधरकेशवावजीजनत्, तत्रहलधरः
शाणपाषाणकषणविमलीकृतं पुरातनंरत्नमिवरतनं के-

शवश्लाघ्यपत्न्यामरुन्धतीशीलंसन्दधत्यां गोविन्द-नामानं मां गोनू-श्रीहर्षौच. कनिष्ठभार्यायां कविगण रुचिकरं रुचिकरं महायिक मप्युदपीपदत । (१]

कृूरध्वरो मुनिवरश्च धीरः पण्डितः कुङ्कुमं च । याढवो ब्राह्मणः बाडवानलश्च, कुलं समूहः स्थानं च, आमोदोहर्षोद्गन्धश्च । षट्कर्माणि यागादीनि. तदुक्तम् " इज्याऽध्ययनदानानि याजनाध्यापनेतथा, प्रतिग्रहश्चैर्युक्तः षट्कर्मा विप्रउच्यते" इति । नयोन्यायः तत्र पञ्चैवकर्माणिसन्ति अतएव तदधिकः । महाध्वरपञ्चकञ्च "पाठोहोमश्चातिथीनां सपर्यातर्पणंबलिः, एतेपञ्चमहायज्ञा ब्रह्मयज्ञादिनामकाः" इति । त्रिकाशकइति एतेन धरणीतलपावनत्वेनचरविकरमोहस्यमभिधामूकपाव्यञ्जनयाध्वन्यते । कतकः सलिलप्रसादकरो द्रव्यविशेषः, तेनान्वर्थनामत्वं सूचितम् । विबुधः पण्डितोदेवश्च, अमदलक्ष्यः अमतामलक्ष्यः असन् अविद्यमानोलक्ष्योयस्य स च । उदपादिपातामुत्पादितौ । संवसथं ग्रामम् । सङ्कशावान् पण्डितः, अत्र विरोधालङ्कारोव्यङ्ग्यः । निर्वादो निन्दा । गोकुलं गवांकुलं व्रजपुरं शास्त्रं च, अक्रूरः मथुरावासी क्रूरभिन्नश्च । शाणपाषाणः निकषः । रुचिकरं स्पृहाकरं कविगणस्पृहणीयपाण्डित्यशालिनमितियावत् । उदपीपदत उत्पादयामस ।

तेषु श्रीहर्षः साम्राज्यमिव लावण्यस्य, मरूपमिवरमणीयतायाः, सम्मोहइववामभ्रुवाम्, आनायइव

---

१ "छोनोदेव्या· अपमतनय. केशवस्यात्मजन्मा, श्रीगोविन्दोठाघकरकवे प्रेमपात्र कमीवान् । श्रीमन्नारायणचरणयोः सम्यगाधायचित्तं नत्वाऽऽतारस्तमपिमह· काव्यस्य व्यनक्ति." इति गोविन्दठक्कुर प्रणीतस्य काव्यप्रदीपस्याद्य श्लोकः ।

राघवस्य, पुरुरिवपौरवस्य, चन्द्रइव यादवस्य, मना·
गप्यनास्पृष्टपरीवादपङ्कतयाऽतिविशदयशसो धुसौता·
न्वयस्य निदानं नैमिषाटवीस्थलइव क्रतुसमाचरण·
विमलः, क्षितिपालभालदेशइव धीरोज्ज्वलः, राका·
पतिरिव वाडवकुलामोदकरः, श्रोत्रियाग्रेसरः षट्कर्म
तयानयाधिकः, ठक्कुरोपनामधेयो विधीयमानमहाऽ
ध्वरपञ्चकः कृतिकुलकमल विकाशकोरविकरः पवित्रया
मासजन्मनाधरणीतलम् । येनात्मनासमानः प्रथना
यां पत्न्यामुपदेशकौशलकृतकेनान्तेवासिनिकरे स्फी
तमतितोयकरोबुद्धिकरः। रतिकान्तइव विबुधप्रसादको
ऽसदलक्ष्यःकान्तश्चरतिकान्तो द्वितीयाया मुदपादिषा·
ताम्, तयोरादिमो नगवारेति पत्रोगाढेतिनामकं सं·
वमयमभङ्गलयमङ्गल्याधदतिक्रान्तवैदुष्यपरितोषितेन
महीभृतोपहारीकृतमुपार्जिजत्, यतो धुसौतनगवारे·
ति धुसौतगढेति मूलग्रामौ प्राचीनसम्प्रदायानुरोधेन
नावविन्दताम् । नत्रातिकान्ततः कीर्तिप्रकरकः
कीर्तिकरः ततश्चन्द्रवदनाभिधानः परमपावनः प्रादुरा·
सीत् । बुद्धिकरस्तु समस्तप्रशस्तक्रियाकलापास्तनिर्वादो
दुर्बुद्धीनमस्थिर्दो हलधरकेशवाविव गोकुलगोपकान·
कृतक्षणानितौ हलधरकेशवावजीजनत, नत्रहलधरः
कान्तकामगकृपणनिर्णीकृतं पुराननंरत्नमिवमतनं सं·

शवश्लाघ्यपत्न्यामरुन्धतीशीलं सन्दधत्यां गोविन्द-नामानं मां गोनू-श्रीहर्षौ च. कनिष्ठभार्यायां कविगण रुचिकरं रुचिकरं महायिक मप्युदपीपदत । (१)

क्रतुरध्वरो मुनिश्वरश्च धीरः पण्डितः कुक्कुपं च । याज्ञवो ब्राह्मणः याज्ञवानकश्च, कुलं समूहः स्थानं च, ग्रामोद्दोर्ष्यौद्दश्च । षट्कर्माणि यागादीनि. तदुक्तम् "इज्याध्ययनदानानि याजनाध्यापने तथा, प्रति-ग्रहश्चैतैर्युक्तः षट्कर्मा विप्र उच्यते" इति । नयोन्यायः तत्र पञ्चैव कर्मा-णि सन्ति अतएव तदधिकः । महाध्वरपञ्चकञ्च "पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः, एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः" इति । त्रिकाशक इति एतेन धरणीतलपावनत्वेन चरविकरमोहद्यमभिधामूरुया व्यञ्जनयाध्वन्यते । कतकः सलिलप्रसादकरो द्रव्यविशेषः, तेनान्वर्थना-मत्वं सूचितम् । विबुधः पण्डितो देवश्च, अमन्दलक्ष्यः अमतामलक्ष्यः अमन् अविद्यमानोलक्ष्योयस्य स च । उदपादिपातामुत्पादितौ । सं वसथं ग्रामम् । सङ्ख्यावान् पण्डितः, अत्र विरोधालङ्कारो व्यङ्ग्यः । निर्वादो निन्दा । गोकुलं गवां कुलं व्रजपुरं शास्त्रं च, अक्रूरः मथुरावासी क्रूरभिन्नश्च । शाणपाषाणः निकषः । रुचिकरं स्पृहाकरं कविगणस्पृह-णीयपाण्डित्ययशालिनमितियावत् । उदपीपदत उत्पादयामास ।

तेषु श्रीहर्षः साम्राज्यमिव लावण्यस्य, स्वरूपमि-वरमणीयतायाः, सम्मोहइववामभ्रुवाम्, आनायइव

१ "गोनोदेव्याः प्रथमतनयः केशवस्यानुजन्मा, श्रीगोविन्दो ठाकुरकवये प्रेमपात्रं मनीषान् । श्रीमन्नारायणचरणयोः सम्पदाभावचित्तं जनतासारस्वतमपि महः पाण्डतरं ध्वनति" इति गोविन्दठक्कुर प्रणीतस्य काव्यप्रदीपस्याद्य श्लोकः ।

मनश्शकुलिनाम्, प्रदीप्तपावकइव यौवतविवेकहविषाम्, प्रत्याख्यानमाश्विनेययुगलस्य, प्रत्यादेशः कुसुमकार्मुकस्य, प्रत्याहारोऽचिरजातस्य, निग्रहस्थानमम्तदीधितेः, परस्परप्रतिस्पर्धिशोभैरवयवैरुद्भासितोल्पीयसावयसापूर्वभवानन्तभवाभ्यस्तसमस्तशास्त्रतयाऽधिजगौ समुदितामेव विद्युद्विद्योतमानानवद्यहृद्यविद्याम् । आससादच स्तोकेनैवकालेन कमनीयां विपुलापुलाकां प्रतिष्ठाम्, अनाकलितकैतवेन नारायणे प्रणयेन पौरस्त्यान्यप्यधश्चकार वृन्दानि भक्तिभाजाम्, हन्त हन्त सचासौपश्यत्येव दग्धदशाभिदुरजरठदीर्घयाप्यजीवने मयिज्यायसि सोदरे भ्रातरि विहाय मेदिनीतलं सुरधामललामतामभिजगाम(१), तदिति विनैवस्तनयित्नुं कुलिशपातः कोऽपि, ततो विदितप्रवृत्तिराशापि मलिनाम्बरतां पर्यधात्, पश्चिमाचलकाननमगात्तापनोऽपि, अभिव्यापच्च मोहसन्तमसं जन्मिनां मनांसि, अपतत्समवायः सुमनसाम्, प्रावृषीव समाप्लुयतवसुमतीनयनसलिलासारैः, मुखरतामयततारतारैर्हाहाकारैरन्तरालंनभसः, असकृत

१ ज्येष्ठे सर्वगुणैः कनीयसितपोमात्रेण पात्रेधिया, गात्रेण स्मरगर्व खर्वणकरे, निष्ठाप्रतिष्ठामये । भ्रीहैव त्रिदिवं गते मयिमनोहीनेच, कश्शोधये दग्धाष्ट महो महत्तु विधिनाभारोऽयमारोपितः"

इति काव्यप्रदीपान्ते श्लोकः ॥

पृथिव्या अप्रथतवेपथुः(२), वाष्पपयः प्रवाहपतनभी-त्येव निद्रापि लोचनकं नाग्रहीत्, स्मरणीयतामयासीदालयं श्रेयसः, अशिश्रियत् शास्त्रीयविचारसरसता कथाशेषताम्, अविन्दतजलाञ्जलिसमज्यासुवाग्मिराजतावराकी, तथ्यमेतत् सर्वंसहावसुन्धरेति यत् तदा नैवव्यदीर्यतसहस्रधा शतधावा । नचातः परमदसीयवान्धवदशा शक्यते कथयितुम्, उद्बुद्धश्च कश्चिद्विकारोमीलयतिचैतन्यम् ।

आनायो वागुरा, शष्कुलीमत्स्यः । यौवतं युवतिसमूहः । समुदिता सकला समेधिता च । पूर्वभवः पुरातनः, भवोजन्म (१) । अपुलाका निस्तुषा निर्मलेतियावत् । दग्धदशेति खेदोक्तिः, भिदुरः कुलिशः, जरठः कठोरः, याप्यो निन्दनीयः । स्तनयित्नुर्मेघः, आशादिग्वातह्वास्तव्यश्च, मलिनाङ्गता मलिनाकाशता मलिनवसनताच । तापनोऽपि किमुत-साधुः । सुमनसां पुष्पाणां सच्चेतसां च । समाप्लुपत पूर्णा । अयत गतः । अप्रथत विस्तीर्णः । कश्चित् अनिर्वचनीयः ।

आवृणोतीन्द्रियमिहिरं महामोहमिहिका, लुप्यते स्मृतिः, निलीयतेधृतिः, अपैति विवेकशक्तिः, अपह्रियतेदृष्टिः, कारुण्यपयोनिधौ पुनर्निमग्नमात्मानमपि नाधुनाजानामि प्रागेवापरम्, इत्यभि

---

२ अप्रकृतप्रथतवेपथुः पृथिव्या इत्यपि वा पाठ.

धाय क्षणंतूष्णीमास्त, ततोविवेकेन स्मरणाहितवि·
कारं व्युदस्य वदितुमारेभे, अतिदुस्त्यजो बान्धववि·
योगाहितः शोकस्सर्वप्रमाथी, यश्चाशमनवदनदर्शनो
निरयः, सलिलानिवर्तनीय आश्रयाशः, मन्त्रादिप्र·
योगानपहार्यः पिशाचः सम्प्रहाराजनितंशरविसर
शयनम्, प्रोद्दामदारुदहनादधिकतरं दहतिशोकात्मा
कृष्णवर्त्माकिमत्रविधेलिमम् केवलंविवेकितैव समाश्र·
यणीया, पश्यतु भवान् आत्मसात्करोति सकल
मेव जगति भगवती प्रेतभर्तुराज्ञा, शब्दायतेदु·
न्दुभिरनारतं महाप्रयाणपिशुनः प्राणिपटलीनाम्, स·
र्वसत्वसंहारकारकोदण्ड स्सन्ततं परिभ्रमति, किस
लयकोणान्तदरलग्नपाथःपृषदिव, सौदामिनीविलसि
तमिव, तप्तायसपात्राहितहविरिव, नैदाघवलाहकच्छा
यावस्थानमिव, प्रकुपितपृदाकुभोगमण्डलमिव, स्वाप्न·
शातमिव, जीवनं पारिप्लवं प्राणभृताम्, शरीरा·
णिच विसिनीसूत्राणीव, घनकालकल्लोलिनीपुलिना
नीवच्छिद्दुराणि, नच जन्तूनां वपुस्सहस्रेणापि सौहित्य
मुपयात्यौदरानलो मृत्योः, अतिशीघ्रवाहिनी किलन
श्वरता सरित्, विद्यतेचजीवशुको निर्गमनमार्गबहुल
एव शरीर पिञ्जरे, स्रोतस्वती प्रवाह पतित दारु·
द्वयसम्मिलनमिव संगतं जनानाम्, अनति क्रमणीय

स्सामयिक स्वभावः, अनुक्षणपरिणामिनः क्षणाः, क्लेशमयं सर्वम्, असारः संसारः, तदहं स्वदेशात् श्रीजगदीशवदनदर्शनेनानेकजन्मसञ्चितप्राच्यकर्मबीजोद्गतकलुषलताप्रतानैरावृता मात्मभूमिंप्रसाधयितुं राजसरइव सचित्रोत्पलं, रमणीकरकुशेशय मिव

इन्द्रिय मिहिरमिति, प्रकाशकत्वादिन्द्रियस्य मिहिरत्वम्, मिहिका ...क्षेपः । चतुरस्य निराकृत्य । निरयोनरकः आधयाश [illegible] ...भिः । सम्प्रहारो युद्धम् । कृष्णवर्त्मा दहनः । [illegible] ...लङ्कारः । दुन्दुभिरित्यत्र दण्डइत्यत्र च [illegible] । [illegible] ...र देवी पूजने बलिप्रदानावसरे पशोः महापपाणसूचको दुन्दुभिः [illegible] । पृदाकुः सर्पः । स्वामशातं स्वमसुखम् । [illegible] । [illegible] ...पं [illegible] । परिणामिनः धर्मलक्षणावस्थान्यतमपरिणामवन्तः, क्षणाः ...आत्मभिन्नाः । [illegible] । सचित्रोत्पलं चित्रोत्पलाभिधान- ...नद्या विचित्रणोत्पलेन [illegible] । कुशेशयं पद्मम्

कण्टकोपशोभितम्, अनिर्वचनीयरञ्जनमिव [illegible] सितम्, क्षितिपतिमिव निधि-निधिवर्तिनम्, [illegible] मिव कपिकुलगलितसलिलैः, [illegible] मकरन्द भागावलोकनैः, सुरगुरुमिव [illegible] रमणैः, [illegible] । [illegible] [illegible] [illegible]

[illegible]

[illegible]

[illegible]

भूत, [illegible] आनन्दाश्रुपातनिमी-
लितशरीरः [illegible] क्रमगमनं नमन्वा-
न्वेन [illegible] निर्भरानन्दन-
नि कृतो मनोऽभ्युपगम, अननुभविन पूजानुवादिभिः
पश्चादभिद्रुतोऽभटनिवहेन, अन्तःपुरपार्श्ववर्तिना स्व-
हस्तीकृत उत्कलिकाकलापेन पुरोगामिविश्रुतोऽनु-
गतः पौरस्त्यं प्रविश्यनस्यमनमः, भक्तिभरभार विभू-
तोऽपि झटिति तत्पदशमायाव । ततो दर्शनादेव ध-
न्यतममात्मानं मन्यमानः अपास्य शाश्वतिकमपि स
पत्नभावं विधायचानेक विग्रहं शुभ्रांशुनाऽपिनखमि-
षेण निषेव्यमाणे, गोविन्द पादभवसायनख कान्ति-
कैतवान्मन्दाकिनी स्रोतसेवसेव्यमाने, तदीयचरणा-
म्बुजे रसालीनशिरसा सप्रणयं प्रणम्य पश्चादागतस्य
तन्नागरिकस्य हस्तादादायनृपसमुचितादप्यधिकैरु-
पचारैः कृतार्चनो बद्धाञ्जलिरवोचत ।

कटक एतदभिधानं महानगरं वलयश्च । अनिर्वचनीयरजतम् प्राति
भासिकं तुलाविद्यापरिणामभुतं रजतम्, साक्षिभासितं साक्षिणाचैनन्येन
साक्षिगोपालेनचभासितं दीपितं ज्ञापितंच । निधिर्वारिधिः, शेवधिश्च ।

ऋषिकुल्या तन्नामधेयानदी मुनेःजलवहनप्रणालिकाच। विमलेति, विमलं विगतं मलं पापंयस्मादिति, स्फीतञ्च, चन्द्रभागानदी चन्द्रभागः इन्दुकलाच। इन्द्रद्युम्नो महाराजः, इन्द्रस्यशतक्रतोः द्युम्नंधनंच, तस्य विजृम्भणैः चेष्टितैः विलासैश्च। सोऽयमिति, राजतनयामयनिवर्तकोगण कनिर्देशित इत्यर्थः। सम्वादेनेति, इदमपरं प्रातिभाभिधानं प्रमाणम्। नाथायेति, राज्ञः पृथ्वीपतित्वादितिभावः। अञ्जसाशीघ्रम्। सम्पातो धारा धानं पानम्। कुम्भसम्भवो महामुनिरगस्त्यः। भद्रं कल्याणंतस्य पश्चाद्भावित्वात्। अपास्येति, कमलेनसार्कं सार्वदिकएवविरोधश्चन्द्रस्य तमपिशुश्रूषालिप्सयाविहायेत्यर्थः, तेनगोविन्दे माहात्म्यातिशयोध्वन्यते, एवमग्रेऽपि। विग्रहं शरीरम। अङ्गुष्ठनखयो र्द्वित्वादितिभावः। मन्दाकिनीति, अस्यागोविन्दपादप्रभवत्वं पुराणादौ प्रसिद्ध मिति। रसेति, एतेन साष्टाङ्गत्वं प्रणतौ सूचितम॥

महाभाग? भगवतोदर्शनं समासाद्य सद्यः परिहृताव द्यकस्यमे प्रत्यपद्यत कृतार्थतां नयनद्वयम्, भवत्पाद पाथोजपरागस्पर्शलेशतोऽपि परमपवित्रतां प्रयातापुरीयमधात्प्रधानतां नगरीषु गरीयसीषु, परमुपचकार चैषा पितृप्रसूः, धन्यधन्यमिदमुपवनं यदनुगृहीतमासनेन, तमोवहुलेप्यशेषजननिलऽधैतद्देशभागधेय सुधादीधितिमण्डलोदयादत्रागतानत्रभवतः किमिव कथमिव च समाचरेयमिति तरलतां मन स्समाराधने प्रयाति, अभवदीयंवा नैवकिञ्चिदस्मदीयं वस्तु,

यत्तु तदुपयोगिभावं लभेत, नचवचसाऽपि नद्रिवा· ने प्रभवामि, तथाहि अतीववृद्धनीपद्धतिर्भवदवलम्ब· नानां गुणानाम्, इयतीतुमे मतिपरिमितिः, किञ्च श्रित विदेशैः कोविदैरपि धिक्कृतमाध्वीकसुरसाभि र्भावभरितभारतीभिरनुभूय भूयस्सम्भूयनूयमानाद् तत्र भवतः स्तुवन् महार्घमणिमौक्तिक प्रवालहीरकाणामु पायनस्यास्पदे काचवराटकोभवेय मितिमन्दाक्षमुपै· ति मेहृदयमिति । ततएवमभिनन्दितोऽयं तोयनिधि रिवासन्नरत्ननिधिस्तेजोविशेषानुभूत तदीयभूपभावः सप्रश्रयादर

'अवधकं पापम् । पितृप्रसूः, सायंसन्ध्या तमोबहुले, तमसाशोकं नान्धकारेण च बहुले, एतेन दुःप्रवेशत्वं व्यज्यते । 'जननि, जन्म, मण्डलं, चक्रवालं, समूहश्च, समुदयादिति, एतेनतपस्विनाशिते आगमनमुपरत्नमि त्याशयः । 'अत्रभवतः, पूज्यान, प्रयातीति, अकस्मात् महत्त्वमानां स मागमेचेतसश्चाञ्चल्यं भवतीतिवस्तुगतिः ' तदुपयोगीति, आराधनो· योगीत्यर्थः, नहितदीयेनैव वस्तुनातदादरोयुक्त इति भावः । 'तत्, आरा धनम् । ' कोविदः पण्डितः । आसन्नेति, आसन्नः प्राप्तः समीपस्थितश्च, रत्नानां निधिपदमादिर्यैत्तपस्येतित्रार्थः ।

दर्शनदत्तविस्मयापन्नस्वान्तसो विनयमपि विनीततां वेदयन्तं, भक्तिमपि भक्तिमत्तां शिक्षयन्तम्, ऋजुता

मपि मृदुतामादिशन्तं, वाग्मिवरानप्यतितरां त्रपातो यधोनिमज्जयन्तं, वरासने सहसैव समुपवेश्यवसुमतीपतिं प्रदायकरकिसलययुगेनसफलामाशिषां राशिं गुरुरिवसुरनायकं, द्वैपायन इव धर्मतिमजं, मैत्रावरुणिरिव रामचन्द्रं, प्रणयेन घनसारक्षोदैरिव, पुञ्जितविमच्छदैरिव, पारदनिकरैरिव, नीहारविसरैरिव, शारदेन्दु किरणैरिव, दशनमरीचिभिर्धवलयन् नभोवलय मभाषत, भूमीपते। किंनाचरित मायुष्मता प्रेमप्रह्वीभावयोस्स्वरूपमादर्शयता, नन्वियं परमासीमा सत्कृतेस्सम्बिधानस्य, श्रद्धयानिष्पादितस्तनुरप्यादरोपचारः प्रीतेरतिशयं जनयतेनाम, किमुत ईदृशः, परन्तु जगन्नाथ विलोकनसमीहयां गच्छतोमे माभवतुभङ्गोविधेरितिकस्मैचित द्विजन्मने दुर्विधाय देय मेत दुपहृतं सदयेनमहोदयेनेति। अथाय सुस्थाय प्राञ्जलोवद्धाञ्जलिना व्यजिज्ञपत् नाथ?

'सहसैव, हठादेव, एतेनराज्ञिविनयातिशयोद्योत्यते. 'सफलां, फलेन पादपानुबन्धिना भविष्यदिष्टेनच सहिताम्, "रिक्तहस्तोन पश्येत्तु राजानं भिषजं गुरुम्" इतिस्मरणात्। 'मैत्रावरुणिः, वसिष्ठः। 'घन-

यत्तु तदुपयोगिभावं लभेत, नचवचमाऽपि तद्विधा· ने प्रभवामि, तथाहि अतीवबृंहणीपद्धतिर्भवदवलम्ब· नानां गुणानाम्, इयतीतुमे मतिपरिमितिः; किञ्च श्रित विदेशैः कोविदेशैरपि धिक्कृतमाध्वीकसुरसाभि र्भावभरितभारतीभिरनुभूय भूयस्सम्भूयनूयमानात् तत्र भवतः स्तुवन् महार्घमणिमौक्तिक प्रवालहीरकाणामु पायनस्यास्पदे काचवराटकोभवेय मितिमन्दाक्षमुपै· ति मेहृदयमिति । ततएवमभिनन्दितोऽयं तोयनिधि रिवासन्नरत्ननिधिस्तेजोविशेषानुभूत तदीयभूपभावः सप्रश्रयादर

'अवधकं पापम् । पितृप्रसूः, सायंसन्ध्या तमोवहुले, तमसाशं नान्धकारेण च वहुले, एतेन दुःप्रवेशत्वं व्यज्यते। 'जननि, जन्म, मण्ड चक्रवालं, समूहश्च, समुदयादिति, एतेनतमसिनाशिते आगमनमुपगन्तुं स्वाशयः। 'अत्रभवतः, पूज्यान, प्रयातीति, अकस्मात मङ्त्तमानां मागमेचेतसश्चाञ्चल्यं भवतीतिवस्तुगतिः' तदुपयोगीति, आराधनो योगीत्यर्थः, नहितदीयेनैव वस्तुनातदादरोयुक्त इति भावः। 'तत्, आ धनम् । 'कोविदः पण्डितः । आसन्नेति, आसन्नः प्राप्तः समीपस्थितश्च रत्नानां निधिपदमादिर्येनतयस्येतिवार्थः ।

दर्शनदत्तविस्मयापन्नस्वानसो विनयमपि विनीततां वेदयन्तं, भक्तिमपि भक्तिमत्तां शिक्षयन्तम्, ऋजुता

मपि मृदुतामादिशन्तं, वाग्मिवरानप्यतितरां त्रपातो यथोनिमज्जयन्तं, वरासने सहसैव समुपवेश्यवसुमतीपतिं प्रदायकरकिसलययुगेनसफलामाशिषां राशिं गुरुरिवसुरनायकं, द्वैपायन इव धर्मात्मजं, मैत्रावरुणिरिव रामचन्द्रं, प्रणयेन घनसारक्षोदैरिव, पुञ्जितविसच्छेदैरिव, पारदनिकरैरिव, नीहारविसरैरिव, शारदेन्दु किरणैरिव, दशनमरीचिभिर्धवलयन् नभोवलय मभाषत, भूमीपते। किंनाचरित मायुष्मता प्रेमप्रह्वीभावयोस्स्वरूपमादर्शयता, नन्वियं परमासीमा सत्कृतेसम्बिधानस्य, श्रद्धयानिष्ठादितस्तनुरप्यादरोपचारः प्रीतेरतिशयं जनयतेनाम, किमुत ईदृशः, परन्तु जगन्नाथ विलोकनसमीहया गच्छतोमे माभवतुभङ्गोविधे रितिकस्मैचित द्विजन्मने दुर्विधाय देय मेत दुपहृतं सदयेनमहोदयेनेति। अथाय मुत्थाय प्राञ्जलीबद्धाञ्जलिना व्यजिज्ञपत् नाथ ?

' सहसैव, हठादेव, एतेनराज्ञिविनयातिशयोद्योत्यते. 'सफलां, फलेन पादपानुवन्धिना भविष्यदिष्टेनच सहिताम्, " रिक्तहस्तोन पश्येत्तु राजानं भिषजं गुरुम् " इतिस्मरणात्। 'मैत्रावरुणिः, वसिष्ठः। 'घन-

यत्तु तदुपयोगिभावं लभेत, नचवचसाऽपि तद्विधाने प्रभवामि, तथाहि अतीववृहतीपद्धतिर्भवदवलम्बनानां गुणानाम्, इयतीतुमे मतिपरिमितिः, किञ्चश्रित विदेशैः कोविदेशैरपि धिक्कृतमाध्वीकसुरसाभिर्भविभरितभारतीभिरनुभूय भूयस्सम्भूयनूयमानात् तत्र भवतः स्तुवन् महार्घमणिमौक्तिक प्रवालहीरकाणामुपायनस्यास्पदे काचवराटकोऽभवेय मितिमन्दाक्षमुपैति मेहृदयमिति । ततएवमभिनन्दितोऽयं तोयनिधिरिवासन्नरत्ननिधिस्तेजोविशेषानुभूत तदीयभूपभावः सप्रश्रयादर

' अवद्यकं पापम् । पितृप्रसूः, सायंसन्ध्या तमोबहुले, तमसाशोकेनान्धकारेण च बहुले, एतेन दुःप्रवेशत्वं व्यज्यते । 'जननि, जन्म, मण्डलं, चक्रवालं, समूहश्च, समुदयादिति, एतेनतपस्विनाशिते आगमनमुपाक्रमिष्याशयः । ' अत्रभवतः, पूज्यान, प्रयातीति, अकस्मात् महत्पदानां सपागमेचेतसश्चाञ्चल्यं भवतीतिवस्तुगतिः ' तदुपयोगीति, आराधनोपयोगीत्यर्थः, नहितदीयेनैव वस्तुनातदादरोयुक्त इति भावः । 'तत्, आराधनम् । ' कोविदः पण्डितः । आसन्नेति, आसन्नः प्राप्तः समीपस्थितरत्नानां निधिवरदाद्रिर्येनयस्येनिवार्थः ।

दर्शनदत्तविस्मयापन्नमानसो विनयमपि विनीततां वेदयन्तं, भक्तिमपि भक्तिमत्तां शिक्षयन्तम्, ऋजुता

मपि मृदुतामादिशन्तं, वाग्मिवरानप्यतितरां त्रपातो
यधोनिमज्जयन्तं, वरासने सहसैव समुपवेश्यवसुम-
तीपतिं प्रदायकरकिसलययुगेनसफलामाशिषां राशिं
गुरुरिवसुरनायकं, द्वैपायन इव धर्मात्मजं, मैत्रा-
वरुणिरिव रामचन्द्रं, प्रणयेन घनसारक्षोदैरिव,
पुञ्जितविसच्छेदैरिव, पारदनिकरैरिव, नीहारविसरै-
रिव, शारदेन्दु किरणैरिव, दशनमरीचिभिर्धवलयन्
नभोवलय मभाषत, भूमीपते। किंनाचरित मायुष्म
ता प्रेमप्रह्वीभावयोस्स्वरूपमादर्शयता, नन्वियं
परमासीमा सत्कृतेसम्बिधानस्य, श्रद्धयानिष्पादि
तस्तनुरप्यादरोपचारः प्रीतेरतिशयं जनयतेनाम, कि-
मुत ईदृशः, परन्तु जगन्नाथ विलोकनसमीहया
गच्छतोमे माभवतुभङ्गोविधे रितिकस्मैचित द्विजन्म
ने दुर्विधाय देय मेत दुपहृतं सदयेनमहोदयेनेति ।
अथाय मुत्थाय प्राञ्जलोवद्धाञ्जलिना व्यजिज्ञप-
त् नाथ ?

' सहसैव, हठादेव, एतेनराज्ञिविनयातिशयोद्योत्यते. 'सफलां, फ-
लेन पादपानुवन्धिना भविष्यदिष्टेनच सहिताम्, " रिक्तहस्तोन पश्येत्तु
राजानं भिषजं गुरुम् " इतिस्मरणात् । 'मैत्रावरुणिः, वसिष्ठः । 'घन-

सारक्षोदः, कर्पूरचूर्णम् , 'पारदो, धातुविशेषः । 'नीहारः, तुहिनम् । भङ्गइति, तीर्थगमने हि मार्गेप्यातिथ्यग्रहणं निषिद्धम् । प्राञ्जलोमृदुः ।

किं नविधत्ते सदागमोऽभिलषितम्, परां कोटिमानयत्यानन्दनिस्यन्दोहृदयस्य, दयानिधे ? विधेर्हतकस्य प्रतिहतप्रवृत्तितया कालपाशप्रतीकाशेनामयेन द्वितय समातस्समास्कन्दिते, अनीकिनीनायक इव संवित्प्रयोग कुशले, माधवइव शुचिरुचिचञ्चिते, आलेख्य इव कृष्णविशदभक्तिभाजने, मधुमासद्रुम इव कुसुम सुकुमारकाये, मकरवगाकृष्यमाणमातङ्ग इव गोविन्द मात्रशरणे, दुस्सहसहस्रकरकरनिकर चिर संस्पर्शमुकुलायमान शिरीषप्रमुख पेशलमृदुप्रसून इव, विधुन्तुदोदग्रदशनावदलितेन्दुमण्डल इव, तुलतापनोपक्रमकालिक प्रालेयगलदुत्पलप्रकर इव, प्राभातिक प्रदीप इव क्षामक्षामदशामुपेयुषि, स्थूलेश्वयथुभिरसर्वाङ्गसङ्गतैः प्रवर्धिते, सन्ततविकाशिकाशश्वासैः सम्भृते ज्वलनजाज्वल्यमानज्वरैः, विरहिते वर्णैः, आस्पदेमन्दभागधेयानाम्, प्रियपदे विपदाम्, परिशीन्तिनये मदायतनये मक्रमपाभिः प्रतिकृतिपरम्पराभिरभाजि भूभुजामिव प्रोद्भटभट वागभटानाम्, चरित

चरणस्यामृतंजकमेवसुधातत् । भुवनं लोकः । भञ्जने भङ्गकरणे स्थिराानाथः क्षितिपतिः । उपपत्तिभिः स्वस्मिन्नामयस्यानाशकत्वोपपादिकाभिर्युक्तिभिः । सुदृढदृढः सुदृढादपिदृढः । एतमेतम् आगतमिमम् । अभिनिवेशात् आग्रहात् । द्विरदपोगजराजः, यादवानां वनंसमूहस्तदेव वनंकाननं तस्यामोदी । सूत्राम्णः इन्द्रात् । भावकः पापकः ॥

प्रभो ! अपनयनयनिपुणनृपतनयस्योपतापमविलम्बितम्, प्रमाणयगणकवराकभाषितम्, पालय किङ्कर प्रतिष्ठाम्, इत्येवमभिस्तुत्यप्रार्थमानोनारायणचरणकरुणयामाभिमानो भूमीपते ! एषव्रजामिभवत्सूनुविपदपनोदनायेत्युदाहरत् । राजातुतदाकर्ण्य सुप्रीततमान्तः ससम्भ्रमं परिजनाय महारजत रजत वज्रवैदूर्यादि विनिर्मितं, किर्मीरमयान्तिकविधायिदीधितिं, वा नवावासमिव सुमनोमनोहरं, मखमण्डपमिव किसलयवलयलसितं, हरिचक्रमिव विच्छिन्नतमस्सुदर्शनम्, भागवतमिवकुवलयापीडान्वितं, मायिनमिवानेकरूपधारिणम्, अपार्थिवमणिचक्रवर्तिनं, गोविन्दमधिष्ठापयितु मानिनीपिनमपिदारुकविरहितं, पुष्परथमुपस्थापयेत्यादिशत् । ततोगोविन्दः नरनाथ ! नाहंवाहनमधिरोहयामि किमपीतिकृतं तदानयनं

नेतितत्प्रत्यशैत्सीत् । तथापि महीपतिर्महतासंरम्भेण तमनुव्रजन् अमन्दमाहतमुरजव्रजं, झटितिझणझणायमानझल्लीरकं, भूयोऽभिभूयमानभेरीभाङ्कारनिर्भरभरितभुवनं, वाद्यमानढक्कापटहपटलाद्यवाद्यं, धिक्कृतापरोद्घुरध्वानिकम्बुनिकुरम्बध्वानं, मदकलकोकिलकाकलीकोमलालापिजेगीयमानवारसुन्दरीदीयमान

साभिमानः अहमवश्यं हरिकृपातोराजतनुजरुजमपनेष्यामीत्यभिमानवान् । महारजतं कनकम् । वासवीवासः स्वर्गः, सुमनः पुष्पम्, सुमनाश्च देवः । तमस्तिमिरं राहुश्च, सुदर्शनं शोभनदर्शनं, सुदर्शनाभिधानं च । कुवलयापीडः कुवलयमाला, तन्नामधेयोगजश्च । रूपं वर्णः स्वरूपंच । चक्रवर्तिनं सार्वभौमं चक्रेणवर्तिनं च । दारुकः गोविन्दसारथिः काष्ठंच । पुष्परथं विहरणोपयोगिस्यन्दनम् । अधिरोक्ष्यामीति, तीर्थयात्राविधिभङ्गभीत्येतिभावः, झल्लीरकः झाँझइतिभाषयाप्रथितोवाद्यविशेषः । अभिभूयमानाताड्यमाना । कम्बुनिकुरम्बं शङ्खसमूहः ।

तालतरलमणिकङ्कणं, धीरविधूयमानचमरीचामरसहस्रं हर्षोत्कर्ष प्रसृतप्रसूनलाजानूनवर्षणं, पार्श्वद्वयोदञ्चितप्रासादस्थितकामिनी क्रियमाणनीराजनं, शतदलतयेन्दिरैक निलयेस्वमन्दिरेसमानयत् । उपवेश्योच्छ्रित विधुधवलमहाधनासने महीपतिर्महिष्यासमं समपूपुजत् । प्राणमच्च सुतेनापि तापितेन तेन

चरणस्यामृतंजलमेवसुधातत् । भुवनं लोकः । भञ्जने भङ्गकरणे स्युरानाथः क्षितिपतिः । उपपत्तिभिः स्वस्मिन्नामयस्यानाशकत्वोपपादिकाभिर्युक्तिभिः । सुदृढदृढः सुदृढादपिदृढः । एतमेतम् आगतमिमम् । अभिनिवेशात् आग्रहात् । द्विरदपोगजराजः, यादवानां वनमभूदस्तदेव वनंकाननं तस्यामोदी । सूत्राम्णः इन्द्रात् । भावकः पापकः ॥

प्रभो ! अपनयनयनिपुणनृपतनयस्योपतापमविलम्बितम्, प्रमाणयगणकवराकभाषितम्, पालय किङ्कर प्रतिष्ठाम्, इत्येवमभिस्तुत्यप्रार्थमानोनारायण चरणकरुणयामाभिमानो भूमीपते ! एषव्रजामिभवत्सूनुविपदपनोदनायेत्युदाहरत् । राजातुतदाकर्ण्य सुप्रीततमान्तः ससम्भ्रमं परिजनाय महारजत रजत वज्रवैदूर्यादि विनिर्मितं, किर्मीरमयान्तिकविधायिदीधितिं, वा नवावासमिव सुमनोमनोहरं, मखमण्डपमिव किसलयवलयलसितं, हरिचक्रमिव विच्छिन्नतमस्सुदर्शनम्, भागवतमिवकुवलयापीडान्वितं, मायिनमिवानेकरूपधारिणम्, अपार्थिवमपिचक्रवर्तिनं, गोविन्दमधिष्ठापयितु मानिनीपितमपिदारुकविरहितं, पुष्परथमुपस्थापयेत्यादिशत् । ततोगोविन्दः नरनाथ ! नाहंवाहनमधिगेस्यामि क्षिमपीतिकृतं तदानयनं-

नेतितत्प्रत्ययौत्सीत् । तथापि महीपति र्महतासंरम्भेण तमनुव्रजन् अमन्दमाहतमुरजव्रजं, झटितिझणझणाय मानझल्लीरकं, भूयोऽभिभूयमानभेरीभाङ्कारनिर्भर-भरितभुवनं, वाद्यमानढक्कापटहपटलाद्यवाद्यं, धिक्कृता परोद्घुरध्वानिकम्बुनिकुरम्बध्वानं, मदकलकोकिल काकलीकोमलालापिजेगीयमानवारसुन्दरीदीयमान

साभिमानः अहमवश्यं हरिकृपातोराजततनुजरुजमपनेष्यामीत्यभिमान वान् । महारजतं कनकम् । वासवीवासः स्वर्गः, सुमनः पुष्पम्, सुमनाश्च देवः । तमस्तिमिरं राहुश्च, सुदर्शनं शोभनदर्शनं, सुदर्शनाभिधानं च । कुव-लयापीडः कुवलयमाला, तन्नामधेयोगजश्च । रूपं वर्णः स्वरूपंच । चक्र-वर्तिनं सार्वभौमं चक्रेणवर्तिनं च । दारुकः गोविन्दसारथिः काष्ठंच । पुष्परथं विहरणोपयोगिस्यन्दनम् । अधिरोक्ष्यामीति, तीर्थयात्राविधि-भङ्गभीत्येतिभावः, झल्लीरकः झॉझइतिभाषयामथितोवाद्यविशेषः । अभि भूयमानाताड्यमाना । कम्बुनिकुरम्बं शङ्ख समूहः ।

तालतरलमणिकङ्कणं, धीरविधूयमानचमरीचामरसहस्रं हर्षोत्कर्षं प्रसृतप्रसूनलाजानूनवर्षणं, पार्श्वद्वयो दञ्चितप्रासादस्थितकामिनी क्रियमाणनीराजनं, शत-दलतयेन्दिरैक निलयेस्वमन्दिरेसमानयत् । तप वेश्योच्छ्रित विधुधवलमहाधनासने महीपतिर्महिष्या-समं समपूपुजत । प्राणमच्च सुतेनापि तापितेन तेन

साकमसकृत्तदीयपादपाथोजानि, अधाञ्चतदनुव-
न्धिनींपयस्सुधामादरेण, अनन्तरं द्रागेवपश्यतो
स्तयोस्सुकुमारोनृपकुमारो नीरोगतांगतोमारोपमित
कलेवरोऽभ्राजत नितराम्, ततस्त्रयएवते सुषुप्तिमयी
मिवस्तम्भमयीमिवावस्थामचिरमन्वभुवन् । अनुप-
मप्रमोदवाष्परयाकुलाः कियत्कालकलांलेशतोऽपि
किमपिनिवेदयितुं नाशकन्, अथ दयितयासनाथः
क्षितिनाथश्चन्द्रमसमिव राहुवक्त्रकुहरनिष्क्रान्तं, राज
श्रीसौन्दर्यमिवप्रत्यागतं, •जीवलोकमहनिवहमिव,
पुनरावृत्तिमुपयातं परिमुषितमर्वस्वमिव भयासात्पृथ-
गादानकर्मीकृतं, तादृशं भृशं दृशातनयं विलोकयन्
स्नापितः प्रीतिगिरिनदीनीरनिर्झरैः, मञ्चारितशिश-
शिरोच्छ्वसित समीरणैः, अनुलिप्तः प्रसादहिम
चन्दनैः, उल्लसितः सितसुमनोनवमालिकाप्रकारैः,

शतदलतया शतभाग (कपाट) तया कमलनयाच, इन्दिरैकनिलये त-
स्याः पद्मेवासादित्याशयः । सुतेनापीत्यपिनादयितापरिगृह्यते । अधा-
त्, अपिवत् । तयोरिाज्ञोः । अन्वभुवन्निति, तेन विस्मयरसोऽपज्यते ।
सनाथः सहितः । महउत्सवः । स्नापित इत्यादि सन्तापेन पर्यहारीत्यत्रहे-
तुः । तदत्रकाव्यलिंगपरिणामौ समुच्चयश्चालङ्कारः । प्रत्येकमपितापनिवारणे
पर्याप्तानामनेकेषां तत्रोपादानात् । सितसुमनोनवमालिका स्वच्छशोभन-
मनसां नवीनामालिका परम्परा सत्संकल्पसंहतिरितियावत्, सैवशुक्लकु-

सुमस्यनवा मौक्तिकामाल्यम् ।

आलिंगतस्तनुजवदनचन्द्रकिरणैः, दूरं पर्यहारि सन्तापेन । ततस्सर्वएवतंसुचिरमतन्वतस्तुतिभिः । समातङ्गतुरंगमस्यन्दनमगणितमणिव्याकोशकोशं च राज्यमेवतस्मै समार्पिपत्, न च मानसेऽनुष्यदेतेनापि लवतोऽपि, अचकथच्च पूज्यपाद ? नियुज्यता मनवस्कराश्रववर्ति क्रीतमिदं शरीरजातम्, अयमस्मि भवदादेशस्सरंशिरसावोढुं प्रतीक्षमाण इति । अथ तदशेषमेपक्षोणीभुजासमर्पितं तृणायमन्यमानः मानवेन्द्र ? कृतं ममैतेन, प्रत्युतनाशुरेनवैसारिणानां बन्धनायस्यात्. तथाहि सार्वजनीनैव लोभनीयता विषयवस्य, तरलताच चेतसः, आयुष्मन् ? प्रथममपि प्राकृतिक योगनिवन्धनवन्धनमशक्यमेव वाधितुं, किम्पुनर्नूतनम्, अभिवीक्षिता तुलापृपर्तामप्यस्पृशती भवति भक्तिः, आकलिताच दर्शित प्रसवा सुजनतानतानततिः, अधिगताच निरतिशयस्य विनयशाखिनो मूलभूतागतिः, आसादिताच परमाप्रीतिः, तथापि महानुभावो विषमेऽस्य नीवृतः प्रदेशे पद्धतिं समरामयाऽनुरुध्यनिदेशितं विशालां धर्मशालां निर्मापयतु, नृपेन येनजगदीशदर्शनायगच्छतामध्वनीनानां क्लान्तिशान्तिभिरित्युदाहरत्, राजा.वादमिति सगद्गद हार्दमवदत् ।

व्याकोशः दीपितः मुख्यार्थबाधात् । अननस्कगणश्चः निर्यन्त्राङ्गीकारः । सरं माल्यम् । मन्यमानइति, एतेन विरतिरुपेक्ष्यते, वागुरा आनायः, वैसारिणोमीनः, प्राकृतिकयोगः प्रधानपुरुषयोर्योगविशेषः, बन्धनं बन्धः, " ननित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते " इति कापिलसूत्रात् । तुलापूर्वतीं सादृश्यकणाम्, अस्पृशतीति निरुपमेतिभावः पद्धति समया मार्गसमीपे ।

एवमेव परिणताक्षणायमाना विभावरी, भूपतितनूद्भवशुभोदये प्रतीते चिरात्प्रतिरुद्धमपि प्रावर्तत गीतं विभासरागेणजनानाम्, अयाचन्त भोजनायजननीमर्भकाः, अदीप्यन्तप्रीत्येव मिहिकांशुकानावृतानि हरिदङ्गनानां मुखानि, वासन्तिकवासरइव प्रियनखानेकक्षता किंशुकाभिरामताऽजायतवधूवक्षोजेषु, मित्रोदयावसरेऽपि खललोकाइव म्लानिमासेदिरे कैरवकदम्बकानि, असेव्यत सौधान्तरालवर्तिनीचेतांसि तरलयन्तीहमन्तीस्वापतेयितरुणैः, बहुविधै विबुधप्रवोधनायताद्य मानवाद्य शब्दै रायतवाचालतांनगरम्. वैदेहकगेहधूपधूमपरिमलोऽघ्रायतनागरिकैः, मानसानीवसमाहितानां तमसानिद्रयानागृह्यन्तलोक लोचनानि, गोविन्दस्तुमनुजपतितनुजरुजमिव क्षीणामभिवीक्ष्य क्षणदां, राज्ञी मिव प्रसन्नवदनां विचिन्त्य प्राचीं सम्पादितकल्यकृत्यनिकरोमधुमधुरयागिरास्नेह

विस्फारितेन नयनेन नृपाय प्रत्यपादयत् । क-
ल्याणवल्ल्यालय ? अतिक्रामतिमेप्रयाणसमयः त-
दनुजानातुभवानिति । एवमुपरतवचसि तस्मिन् पद-
मेतदलङ्करणीयमितिप्रक्रमप्रतीपम्, इमेजनाभृत्य-
भूताआजीवनाच्चरणराजीवयुगलमासेवितुं यिया-
सन्तीति धूर्तस्येव भाषितम्, कृतार्थोभवितुमिच्छामी-
ति स्वार्थपरायणता प्रकाशनम्,

क्षणायमानेनेति, प्रमोदातिशयेन [illegible] इति भावः । प्रति-
रुद्धपर्यंति, रोगाक्रान्तत्वा[illegible] तात्पर्यम् । [illegible]
प्रकाशः [illegible] । [illegible]
[illegible], [illegible] आकर्षन्तौ, [illegible]
[illegible] । [illegible] । [illegible] । [illegible]
[illegible] । वदनं मुखं [illegible] । [illegible] ।

एतेऽपिनेतव्या इत्याज्ञा, भवानेवनरममेषां शरणमित्य-
भिनन्दनम्, परितापोभवन्तमन्तरेण भविष्यतीत्युपा-
लम्भनम्, भवद्भक्ता इमइत्यात्मसम्भावना, विष-
तिमारम्भायसंविधेयमितितात्पर्यम्, तदेवं भाविनि
अर्थेनात्मनोऽस्मि निवेदयितुमिति [illegible]
बभूव भूपतिः । ततोऽस्मादिद् [illegible]
[illegible]
[illegible]

नियमयतु कृपार्गलान्, गरुडोन्द्र गामिन, जागनन्दी भगवत्पदारविन्दम्, प्रभावगणनुगन्तीं भुवं, दीप यतु मर्यादा मन्वन्तरम्, नन्दयतेन स्वामीगोविन्दो मनो-दृशानामिति । अथ पार्थिवस्तथेत्यभिधायस्यन्दना य प्रतीहारिणं समादिशत् । अनन्तरं गोविन्दः न चास्तिमेप्रयोजनं तीर्थयात्रानुपयोगिनास्यन्दनेन, तत्पादाभ्यामेव यानायानुजानातुमाम्, नोहि सफल जन्मतां नेतुमभिलषामि, नहि कर्तुमिह भाग्यत्र मभि-निवेशस्साम्प्रतमित्यब्रवीत् । ततोऽङ्घ्रिप्रसेवाविग्रह भयविहस्तीकृतेनराज्ञा कथमप्यनुज्ञातः प्रस्थानमका-र्षीत् । कृच्छेणच स्वार्पितवाष्पाम्बुपूरपूरितलोचना-न् स्वमहातुकामान् महीभृत्प्रभृतीननुगच्छतोन्यवर्त यत्, अप्रहितैरपितदीयहृदयैस्सगं निरक्रमतनगरात् । तेचनयनायनमतियान्त माकलयन्तोऽपि गोविन्दं ता माशामाशाभिर्दरदर्शनस्याभिवीक्षमाणाः कथं कथ-मपि निलयमागत्याधियामिनि नलेभिरेनिद्रां लेश-तोऽपि, अनुचिन्तयदेवतस्यानुभावं विस्मयतेस्म मा नसमभीषाम्, कृत्स्नाँश्चतस्यकथाभिरेवमनोविनोद-

यतः पर्याकुलयांबभूव विलोकनं गोचरयन्तीनकुण्ठा उत्कण्ठा । राजातुयथोक्तां धर्मशालामकल्पयदल्पतमेनसमयेन याचगोविन्दसत्रनम्ना समाम्नातासुचिरमदभ्रतोपकारदक्षतां दक्षिणाध्वगानामिति ॥

इति मैथिलश्रोत्रिय श्रीबालकृष्णमिश्रविरचिते

श्री लक्ष्मीश्वरीचरिते द्वितीय उच्छ्वासः ॥

आस्थाय विज्ञाय । साम्प्रतं युक्तम्, सांप्रतं, सम्प्रति । अभिनिवेशआग्रहः । विह्वलीकृतः व्याकुलीकृतः । अपर्दितैः अमेर्पितः स्वपगैवर्गैतैरितियावत्, तेन गोविन्दविषयिणां रतिरतेषु व्यज्यते । नयनायनं नेत्रमार्गम् । तामाशाम् तां दिशम् । नकुण्ठा पूर्णा ॥ इति द्वितीयोच्छ्वासटिप्पणी ॥



तृतीय उच्छ्वासः ।

वहुकालादाकलितं सङ्कल्पितनियमवन्धनंयद्यत ।
सम्पादयति दयातो भगवान् तद्भक्तवत्सलो नित्यम्॥१॥

अथ पृथग्विधान् नगनगर संवसथान्, चित्राणि च काननानि, कलनेनापि कायकम्पनकारिणीश्च कल्लोलिनीः, नयनप्रसादनतामुपेयिवांसि परमपावन पयांसि च सरांसि समतिक्रामन्, नवीनहैयङ्गवीनेनाच्युतनियमेनाच्युतापचेतानियतिप्रहितचेताअसौ प्रणयाभिमानिन्यामिवांशुमतासमंनीयमानायां वासरसुषमायां, वासकसज्जिकास्विवस्मयमानवदनद्युतिषु कुमुद्वतीषु, लक्षितललनायामिवलक्ष्यमाणानेकावलोकनमुदितायां गगनपद्धतौ, प्रोषितपतियोषितीवदर्शितरागायां ककुभि प्रतीच्याम्, पावक परितापितायःपिण्डइव, आलक्तकच्छदइव, वन्धुजीवकप्रसूनइव, पश्चिमाचलशयित महाभुजगभोग रत्नइव, हाटकताटङ्कइव सन्ध्यायाः, सुन्दरसिन्दूर विन्दाविववरुणाङ्गनायाः, प्रतिभाति भानुमति, वारनारीमिव प्राचीमसाचीकृतवदनमाचुम्विताङ्करेणसमा ति मेदुरानुरागेचन्द्रमसि, दुरन्तप्रान्तराभ्यन्तरस्थ

श्रीः। वहुकालेति, आकलितम् आचरितम् । एतेन स्वल्पविशेषे दुरामदेनापि नवनीतेन भगवदर्चने नियमस्यपूर्तिस्संजाता गोविन्दस्येति सूचितम् । विशेषेवक्तव्ये सामान्यस्योक्त्याऽप्रस्तुतप्रशंसा, भक्तवत्सलत्व स्यवाक्यार्थनिष्पादकतयाकाव्यलिङ्गं चालङ्कारः, यद्वा सम्पादनयोग्यत्व रूपव्यङ्ग्यद्वारा तस्यतथात्वेपरिकरइति । नगः पर्वतः पादपश्च, संवसथोग्रामः, कलनेन दर्शनेन हैयङ्गवीनेन नवनीतेन, अच्युतनियमेन, न च्युतः नियमोयस्यतेन, अच्युतापचेताहरिपूजकः, नियतिः नियमः, प्रणयाभिमानिनी प्रेमगर्विता नायिका, अंशुमतासूर्येण, लक्षितलक्ष्मा, प्रकटपरपुरुषस्नेहापरकीयायोषित्, लक्ष्यमाण मनेकस्य सूर्यस्य चन्द्रस्य च, अन्यत्र नायकस्य, अवलोकनेन मुदितं प्रकाशोहर्षोवा यस्या स्तस्या मित्यर्थः । दर्शितः रागोरक्तिमा अनुरागो वा अभिलाषस्मृति चिन्तागुण कथनोद्वेगसंप्रलापादिनाययातस्याम् । ककुभिदिशायाम् । वरुणाङ्गनायाः पश्चिमदिशः । असाचीकृतवदनम्, असाचीकृतं नतिर्यक्कृतं वदनं मध्यो मुखंच यस्मिन्तदितिचुम्बनक्रियाविशेषणम् । करेणकिरणेनहस्तेनच

मप्रथितप्रथंकमप्यवसथंपथसवेशावस्थितं विलोक्य तत्रैव रात्रिमतिवाहयितुं चेतश्चकार । गत्वा च तत्रच्छायासच्छायानोकहतले परिसमापितसायन्त तकृत्यसंहतिस्सुखमुपाससाद निद्राम् । अथासोढ क्लेशखिद्यमानवियोगिगणवितीर्णशापपरिणति राजयक्ष्मा स्कन्दितायामिव क्रमेणक्षीणतामुपगच्छन्त्यां यामवत्याम्, अनन्तपुटभेदनराज्यशासनं निज

तृतीय उच्छ्वासः ।

वहुकालादाकलितं सङ्कल्पितनियमवन्धनंयद्यत ।
सम्पादयति दयातो भगवान् तद्भक्तवत्सलो नित्यम्॥१॥

अथ पृथग्विधान् नगनगर संवसथान्, चित्राणि च काननानि, कलनेनापि कायकम्पनकारिणीश्च कल्लोलिनीः, नयनप्रसादनतामुपेयिवांसि परमपावन पयांसि च सरांसि समतिक्रामन्, नवीनहैयङ्गवीनेनाच्युतनियमेनाच्युतापचेतानियतिप्रहितचेताअसौ प्रणयाभिमानिन्यामिवांशुमतासमंनीयमानायां वासरसुषमायां, वासकसज्जिकास्विवस्मयमानवदनद्युतिषु कुमुद्वतीषु, लक्षितललनायामिवलक्ष्यमाणानेकावलोकनमुदितायां गगनपद्धतौ, प्रोषितपतियोषि तीवदर्शितरागायां ककुभि प्रतीच्याम्, पावक परितापितायःपिण्डइव, आलक्तकच्छदइव, वन्धुजीवकप्रसूनइव, पश्चिमाचलशयित महाभुजगभोग रत्नइव, हाटकताटङ्कइव सन्ध्यायाः, सुन्दरसिन्दूर विन्दाविववरुणाङ्गनायाः, प्रतिभाति भानुमति, वारनारीमिव प्राचीमसाचीकृतवदनमाचुम्बितांकरेणसमालिंगति मेदुरानुरागेचन्द्रमसि, दुरन्तप्रान्तराभ्यन्तरस्थ

धीः। पह्‌कालेति, आकलितम् आचरितम् । एतेन स्थलविशेषे दुरासदेनापि नवनीतेन भगवदर्चन नियमस्यपूर्तिस्संजाता गोविन्दस्येति सूचितम् । विशेषेवक्तव्ये सामान्यस्योक्त्याऽप्रस्तुतप्रशंसा, भक्तवत्सलत्व स्यदासकार्यनिष्पादकतयाकाव्यलिङ्गं चालङ्कारः, यद्वा सम्पादनयोग्यत्व रूपव्यङ्ग्यद्वारा तस्यतयात्वेपरिकरइति । नगः पर्वतः पादपश्च, सं श्रमयोप्राप्तः, कलनेन दर्शनेन हैयङ्गवीनेन नवनीतेन, अच्युतनियमेन, न च्युतः नियमोयस्यतेन, अच्युतापचेताहरिपूजकः, नियतिः नियमः, प्रणयाभिमानिनी प्रेमगर्वितानायिका, अंशुमताऽसूर्येण, कक्षितकाना, प्रकटपरपुरुषस्नेहापरकीयायोषित्, लक्ष्यमाण मनेकस्य सूर्यस्य चन्द्रस्य च, अन्यत्र नायकस्य, अवलोकनेन मुदितं प्रकाशोहर्षोवा यस्या स्तस्या मित्यर्थः । दर्शितः रागोरक्तिमा अनुरागो वा अभिलाषस्मृति चिन्तागुण कथनोद्वेगसंप्रलापादिनाययातस्याम् । ककुभिदिशायाम् । वरुणाङ्गनायाः पश्चिमदिशः । असाचीकृतवदनम्, असाचीकृतं नतिर्यक्कृतं वदनं पध्यो मुखंच यस्मिन्तदितिचुम्बनक्रियाविशेषणम् । करेणकिरणेनहस्तेनच

मप्रथितप्रथंकमप्यवसथंपथसवेशावस्थितं विलोक्य तत्रैव रात्रिमतिवाहयितुं चेतश्चकार । गत्वा च तत्रच्छायासच्छायानोकहतले परिसमापितसायन्तनकृत्यसंहतिस्सुखमुपाससाद निद्राम् । अथासोढक्लेशखिद्यमानवियोगिगणवितीर्णशापपरिणति राजयक्ष्मा स्कन्दितायामिव क्रमेणक्षीणतामुपगच्छन्त्यां यामवत्याम्, अनन्तपुटभेदनराज्यशासनं निज

वाजिग्राहकोदय निराकृतारातितिमिरे चिकीर्षति विकर्तने प्रावर्ततकर्तव्येषु प्रात्यहिकेषु, उपास्थायत्र प्रथमसन्ध्यां भगवत्पादाम्बुजसवनीयनवनीतसम्पत्तये तदवनीवासिनस्समस्तान् कुत्रलभ्यतेक्षीरमित्यपृच्छत् । तैश्च नैतामध्यास्तेमहीमाहेयीमहिषी वा दूरे च तदित्यभिहितोनियमभङ्गभयानुबन्धिबाधनोदन्वति निमज्जन् नचिरादनुचरेणसमाहृतं तदवलोक्याश्चर्यचकितचेताः कथमिवैतदासादितन्त्वयेति दाम मन्वयुंक्त । ततस्तस्मात् "सौरभेयीग्रामं ग्रामं निकषा गोपायमानेन विमलतरनीरसरसीसनीडे, नूतनतरुणतारम्भ सम्भावितेन, कौङ्कुमविशेषक विशेषित विशालभालेन, अलिकुलानुकूलातिललामकाननकुसुममालाकलितोरु मौक्तिकसारहारभारप्रतिभासित वक्षस्थलेन, कोकनदानुकारिकरचरणकमनीयेन, भ्रमरकभ्राजित वक्त्राम्भोरुहेण, कमलरागकृत मकराकृतिकर्णकुण्डलकान्ति निराकृत कामकेतु कौतुकेन, चूर्णित वर्णमानचञ्चलाधिवासितवसनेन,

अप्रथितमप्रथम्, अविदितनामधेयकम् । अश्रमयंप्राणम्, मवेशोऽन्तिकः । छायामन्छायः छायया,मतीच्छायाकान्तिर्यस्यमः । यामवत्यां निशायाम्, भवन्ति च राजयक्ष्मामयं क्षयः क्रमेणाद्भयेति । अनन्तमाक्षां नदेवानन्तपुरमेदन मनिविरतृतं नगरं नत्र राज्यमयशासनम् । निज

वाजिवाहकः अरुणः, उपास्थाय उपास्य, सचनीयं पुजनसम्बन्धि, माहेयी गौः, तत् क्षीरम्, अनुबन्धिजन्यम्, बाधनोदन्वति पीडासमुद्रे, तत् क्षीरम्, अन्वयुंक्त पृष्टवान । तस्मात् दासात्, एतदग्रवक्ष्यमाणेन निशम्येत्यनेनान्वयः । सौरभेयी-ग्रामगोसमूहम्, ग्रामनिकषा ग्रामसमीपे, सनीडे अन्तिके, विशेषकं तिलकम्, अनुकूलेति, एतेन सौगन्ध्यातिशयोऽव्यज्यते । कोकनदं रक्तोत्पलम्, भ्रमरकोऽलकः सएव भ्रमरको मधुपः, कमलरागः पद्मरागमणिः कर्णेति, नचैतत्पदं व्यर्थ, कर्णालंकारार्थकत्वात्, "कर्णावतंसादिपदे" इत्यादिना काव्यप्रकाशेतथाप्रतिपादनात् । केतुः पताका साचमदनस्य मीनमयी, चूर्णितेति, चूर्णितः तिरस्कृतः, वर्णस्य रूपस्य मानोगर्वोयस्यास्तथाभूता विद्युत् येन तत् । अधिवासितं वसनं यस्यतेनेत्यर्थः ।

विलासि महीपतिकुतूहलगहनेनेव नवनीरदावली श्यामलता कान्तेन, जामदग्न्य प्रतिपाद्यमानमेदिनी तलेनेव नक्षत्रमालाच्छुरितेन, जीमूतवाहनेनेव अंगदस्थितिशोभनेन, वडिशानामिव कामिनीमनोमीनाकर्षकाणां तिमिरत्रयणुकसञ्चयानामिव कुटिलालकानां रोचिषालिम्पतेवान्तरीक्षम्, मणिबन्धबन्धुरवलयमणिमरीचिभिः रत्नकुट्टिममिव विदधताप्रदेशम्, आश्विनेयादि सममनोरमनिर्माणपरिशीलनप्रयोजनेनेवकमलजन्मनः, प्रकटितमृगमदेनापि मृगमदापहारिणा, चन्द्ररुचिचञ्चितेनापि विभाकरेण, वंशी-

वाजिवाहकोदय निराकृतारातितिमिरे चिकीर्षति विकर्तने प्रावर्तत कर्तव्येषु प्रात्यहिकेषु, उपास्थायत्त प्रथमसन्ध्यां भगवत्पादाम्बुजसवनीयनवनीतसम्पत्तये तदवनीवासिनस्समस्तान् कुत्रलभ्यतेक्षीरमित्यपृच्छत् । तैश्च नैतामध्यास्तेमहींमाहेयीमहिषी वा दूरे च तदित्यभिहितोनियमभङ्गभयानुवन्धिवाधनोदन्वति निमज्जन् नचिरादनुचरेणसमाहृतं तदवलोक्याश्चर्यचकितचेताः कथमिवैतदासादितन्त्वयेति दास मन्वयुंक्त । ततस्तस्मात् "सौरभेयीग्रामं ग्रामं निकषा गोपायमानेन विमलतरनीरसरसीसनीडे, नूतनतरुणतारम्भ सम्भावितेन, कौङ्कुमविशेषक विशेषित विशालभालेन, अलिकुलानुकूलातिललामकाननकुसुममालाकलितोरु मौक्तिकसारहारभारप्रतिभासित वक्षस्थलेन, कोकनदानुकारिकरचरणकमनीयेन, भ्रमरकभ्राजित वक्त्राम्भोरुहेण, कमलरागकृत मकराकृतिकर्णकुण्डलकान्ति निराकृत कामकेतु कौतुकेन, चूर्णित वर्णमानचञ्चलाधिवासितवसनेन,

अप्रथितप्रथम्, अविदितनामधेयकम् । अवसथंग्रामम्, सवेशोऽन्तिकः । छायासच्छायः छाययासतीच्छायाकान्तिर्यस्यसः । यामवत्यां निशायाम्, भवतिच राजयक्ष्मामये क्षयः क्रमेणाङ्गस्येति । अनन्तप्राकारं तदेवानन्तपुरमेदन प्रतिविस्तृतं नगरं तत्र राज्यस्यशासनम् । निम

भासेचनकेन " तदासेचनकं तृप्तेर्नास्त्यन्तोयस्यदर्शनात् " इत्येतत्प्रतिपादितेन । नैचिकी गवामुत्तमागौः, मनिर्बन्धं साग्रहम्, ईयिवान गतवान् गन्धर्वनगरं मायानिर्मितं नगरम्, प्रातीतिकविषयं नैयायिकानभ्युपगतानिर्वचनीयख्यातिविषयीभूतंरजतादि । अतथाभूतम् उत्तरकालिक बाधज्ञानविषयीभूतम् ।

मविद्ययानवच्छिन्न मानन्दमयमध्यासितभव मभवमपिशास्त्रप्रकाशितं. मायाधिष्ठानमपि सर्ववेदिनं मनोऽमेयमपि मनसैवदर्शनीयं, भक्तानुकम्पाकलित श्रीकृष्णकलेवरं समवधारयन्, तदीयगुणगणगरिमसमज्ञामगायन्निराम् । ततो विधेय ! अहोतव सकल लोकावधेयं भागधेयम्, आतृप्ति निपीत ममृतामृतं लोचनपुटेन, दृष्टाच परमारमासीमारामणीयकस्य, अद्यत्वे तवावसितप्रयोजनंजननं यत्र नयनयो रतिथिभावमभजतयोगाभ्यास गमितजन्मभिर्यमिभि रपिदुरा सदावलोकनोदेवकीनन्दनइत्यादिभृशंदासं प्राशंसत् । एवं तत्प्रदेशादागत्याकस्मान्नीतेननवनीतेन स्थेम्नासहितेनप्रेम्णा परेण भगवतः समातनुत पूजाम् । अथततः कतिपयेन वासरेण पुरी मूरीकृता वतारां जगदीश्वरेण, दूरीभूतविधिप्रवृत्तितया धुरीणां

वशीकृतकरसरसीरुहेण, आकरेणलावण्यसलिलानां, क्रीडैकनिकेतनेन सौन्दर्यसारसमुदयानां, सकलसुकृतपरिणाम मवसीयमानेन नयनानाम्, आसेचनकेन केनचिदाभीरकिशोरेण सिस्नासोरुपागतस्य तदीयरुचिरतांचकितमाचिन्तयानस्य चिरायतत्रस्थितवतो ममाभ्यर्थनात्पुरैव झटितिस्वकीयनैचिकी मुपदुह्य मूल्येनविना समीहितादपिसनिर्बन्धमाधिकंदुग्धमिदमदीयत,, इत्येतदानिशम्य सपदितमुद्देशमीयिवान् दासादासादितं स्वाप्नोदन्तमिव, गन्धर्वनगरमिव, ऐन्द्रजालमिव, प्रातीतिकविषयमिव, अतथाभूतमभिवीक्ष्य तं साक्षात्स्वप्रकाशापरोक्षमवच्छेदरहित

गहनेन विपिनेन, श्यामलता श्यामलस्य भावः । श्यामात्मता च । [illegible]

कन्दसुरभीकृत स्वादुसलिलैः, निःश्रेयस निश्रेणिका भिरिव सोपानश्रेणीभिरभिराजितैः, मानवमिषेण जगन्नाथदर्शनार्थ मायातै स्त्रिदशैरिवजनै रवगाह्य-मानैः सरोभिरुपशोभिताम्, विपिनपालपालिपीय माननारिकेलमधुररसैः, अध्वगशतदीयमानक्रमुक-खर्जूरादिस्फुरत्स्फीतफलैः, अलिकुलकोलाहलव्याकुलैः एलालताप्रसूनपरिमलविलुब्ध गन्धवाहनिषेवितै रारामनिकरैः प्रियदर्शनां, पिङ्गलसुभाषितैरिव सद्वं-शस्थैः क्षमान्वितैश्च, मैथिलैरिव विद्योपासकैः आगम रहस्यकुशलैश्च, सत्कविपद्यबन्धैरिव विशदचरणैर्मृदुल मधुरैश्च द्विजैराकीर्णामशिश्रियत्। तत्र च यथाविधि आम्नायस्येव षडङ्गसङ्गतस्य, रवेरिवकमलानन्दनस्य चैत्ररथस्येव सुमनसांसमवाये रासेव्यमानस्य देवस्य दर्शनादनैषीत्कृतकृत्यतामात्मानम्। तत एतदाय नात्पूर्वं "योऽसौ मैथिल द्विजन्मागोविन्दनामा कामाभिरामाकृतिः कृतिकुलललामाति धवलयशो-धामात्र त्रियामानन्तरं निरतिशयभक्तिभूम्ना मामा लोकयितुमागन्ता, स च सार्द्धमेवानल धौतमलकल धौतप्रतिमधौत युगलेनास्मदीयनैवेद्यं निवेद्य सद्यः प्रसाद्य सभाजयितव्यःव्यपदेष्टव्यश्चास्माकीनयागिरा

श्रेयसीषुनगरीषु, सद्व्याख्यामिव तालमालातिलसितां, मखमहमहीमिव कदलीवनमण्डितां, चक्रवाकचक्रवालोपेतैः, कादम्बरमणीरमणीयैः,

स्वप्रकाशेति, स्वप्रकाशप्रत्यक्षात्मकमित्यर्थः, अवच्छेदःपरिच्छेदोदेशादिना, एतेन नित्यत्वं व्यापकत्वंचदर्शितंभवति 'आनन्दमयमिति, तत्त्वं "आनन्द मयोऽभ्यासात्"इत्यादि सूत्रैः प्रत्यपादि बादरायणेन वेदान्तदर्शने । अध्यासितः सन्घट इत्यादि सद्विशेष्यकप्रतीत्याप्रकारीभूतः भवः संसारोयत्रतम्, अभवमपि अजन्यमपि शास्त्रेण उपनिषदा प्रकाशितम् उत्पन्नं ज्ञापितंवा, मायेति इहविरोधः स्फुटएव । मायिनोऽसर्वज्ञत्वात् जीववत्, परिहारस्तु आवरणशक्तिविशिष्टमायाधिकरणत्वं ब्रह्मणि नोपगम्यते विशिष्टाधिकरण ताया विलक्षणत्वात् तथाच सर्ववेदित्वोपपत्तिः मनोऽमेयमपि "अवाङ्मनस गोचर" मितिश्रुतेः, इहापिस्पष्टएवविरोधः परीहारस्तु उक्तश्रुतौ मनः पदम् ंस्कृत मनः परम्, " मनसैवानुद्रष्टव्यम् " इति श्रुतिविरोधात्, मनसैव श्रवणमननादिना संस्कृतेन मनसैवेति आकलितः गृहीतः, समज्ञां कीर्तिम् । अवधेयं शुश्रूषितव्यम्, अमृतामृतम् अमृतादप्यमृतं सुधाधिक मितियावत् । अवसितं प्राप्तम, विधिप्रवृत्तिरदृष्टोत्पत्तिः जगन्नाथपुरीगमनेन जीवन्मुक्तता भवतीतिभावः । तालमालिका तालवृक्षस्य करध्वनेर्वा परम्परा, सद्व्याख्यायां करध्वनिरिति नव्यसभ्यानामाचारः । कदलीवनं रम्भावनं पताकानिवहश्च चक्रवालं मण्डलम्, कादम्बः कलहंसः ।

रोलम्बकदम्बकावलम्बिताम्बुजनिकुरम्बस्यन्दमानम-

करन्दसुरभीकृत स्वादुसलिलैः, निःश्रेयस निश्रेणिका मिरिव सोपानश्रेणीभिरभिराजितैः, मानवमिषेण जगन्नाथदर्शनार्थ मायातै स्त्रिदशैरिवजनै रवगाह्य-मानैः, सरोभिरुपशोभिताम्, विपिनपालपालिपीय माननारिकेलमधुररसैः, अध्वगशतदीयमानक्रमुक-खर्जूरादिस्फुरत्स्फीतफलैः, अलिकुलकोलाहलव्याकुलैः एलालताप्रसूनपरिमलविलुब्ध गन्धवाहनिषेवितै रारामैनिकरैः प्रियदर्शनां, पिङ्गलसुभाषितैरिव सद्वं-शस्थैः क्षमान्वितैश्च, मैथिलैरिव विद्योपासकैः आगम रहस्यकुशलैश्च, सत्कविपद्यवन्धैरिव विशदचरणैर्मृदुल मधुरैश्च द्विजैराकीर्णामशिश्रियत्। तत्र च यथाविधि आम्नायस्येव षडङ्गसङ्गतस्य, रवेरिवकमलानन्दनस्य चैत्ररथस्येव सुमनसांसमवाये रासेव्यमानस्य देवस्य दर्शनादनैषीत्कृतकृत्यतामात्मानम्। तत एतदाय नात्पुरैव "योऽसौ मैथिल द्विजन्मागोविन्दनामा कामाभिरामाकृतिः कृतिकुलललामाति धवलयशो-धामात्र त्रियामानन्तरं निरतिशयभक्तिभूम्ना मामा लोकयितुमागन्ता, स च सार्द्धमेवानल धौतमलक्ष्म-धौतप्रतिमधौत युगलेनास्मदीयनैवेद्यं निवेद्य सद्यः प्रसाद्य सभाजयितव्यः व्यपदेष्टव्यश्चास्माकीनयागिरा

निश्रेणिका सोपानम्, इयमुत्प्रेक्षा, एवमग्रेऽपि, त्रिदशैरिवेति इय-मुत्प्रेक्षा सापह्नवेति विच्छित्तिविशेषः । अध्वगशतर्दीयमानं पथिकशताय वितीर्यमाणं तस्यशतेनखण्डयमानं वा । पिङ्गलप्रभाषितैः पिङ्गलनागप्रणीत च्छन्दो निबन्धैः, सद्वंशस्थैः समीचीनकुलवर्तिभिः वंशस्थेन च्छन्दसाऽन्वितैश्च, क्षमाशान्तिः तदभिधानं छन्दश्च । विद्याशास्त्रं कालिकादिभगवती च, आगमोवेदश्शास्त्रं तन्त्रंच, विशदचरणैः पवित्राचरणैः निर्दोषपादैश्च, षडङ्गानि सर्वज्ञता तृप्त्यनादिबोधादीनि शिक्षाकल्पव्याकरणादीनिच । कमलानन्दनस्य कमलायालक्ष्म्या कमलस्य पद्मस्यवाऽऽनन्दनस्य सुखदस्य विकाशकस्यच । चैत्ररथः कुबेरोद्यानम्, सुमनसां साधूनां पुष्पाणां देवानां च । आयनात् आगमनात । कलधौतं सुवर्णम्, सभाजयितव्यः पूजनीयः ।

तेन तत्सन्ततिसन्तानैश्च नागमनक्लेशो विधेयः, अविहितास्मदी यवदनदर्शनैरपितै र्नानवाप्तं स्यात्तदुद्भवं तदेकस्य समागमेनसुकृतम्" इति स्वप्नमाप्नुवानोऽस्वप्नदेशीयतां दधानो देवसेवनैक परायण स्सकलागमगहन गाहन मृगनायको विप्रगणनीयो विप्रः क्षिप्रं निरीक्ष्य गवेषणेन पौरस्त्यक्षणदावलोकित स्वप्न निरूपित स्वरूपाय तस्मै सम मुद्गमनीययुग्मेन भगवते निवेदितं नैवेद्यं सादर मुपाहरत् । अथावयव स्वप्नानादित मुदन्तजातम्, सच केनाप्यलब्ध मसाधारण मतिप्रमदेन देवस्यान्वितं प्रसादेन निर्दिष्टं मूर्ध्ना प्रणम्याग्रहीत्, अमन्यतच धन्यतमम-

न्यमेवात्मानम्, अवसञ्च जगदीशं सेवमानश्चिरा-य, अकरोञ्च नवसंस्तवसमेधित मुदितान् सकला-नेवोत्कलीयान्, अनैषीञ्च व्याकोशकोशतामदसीय हृदय सरसीरुहाणि, ततोऽतीतेषु गणरात्रेषु कृतनिर्ण-यः प्रयाणाय विधायच यथारुचि तदुचितानि कर्तव्यानि, समानन्दितदेवसेवकोऽसकृन्नमस्कृत्य-नारायणं, संयान्य चाचला मनुरति मयनातिथीच-कारचरणौ । अथ यदृच्छयाऽऽगच्छन् अभिवीक्ष्य श्रीसाक्षिगोपालपादपाथोज माहततरस्तत्रत्यै र्जन-समुदयैः, हृषितहृदयः, तत्तत्प्रदेशजनिजुषो विषय-विशेषान् प्रतिलोचने प्रेषयन्, नगरइव सदिन्दु चन्दन विन्दुसरसाऽभिनन्दिते, अपत्यप्रदपानपयो-मरीचिकुण्डमण्डिते शमनाशावस्थितेऽपि उदयाच-लान्तिकतरे, लक्षितलक्षाधिकमन्दिरे पदे प्रतिष्ठितं स्मरजित्वरं श्रीभुवनेश्वरं व्यलोकयत् ।

अस्वप्रदेशीयतां देवसादृश्यमितियावत् । विप्रगणनीयः विशेषेणप्र-कृष्टतयागणनीयः विप्रेषुगणनीयोवा उद्गमनीयं धौतवस्त्रम्, असाधारणत्वे केनाप्यलब्धत्वंहेतुः, अन्यमेवलोकोत्तरमेव, लोकेषुकेनापिताहृशप्रसादस्या प्राप्तत्वात् । संस्तवः परिचयः । गणरात्रेषुबह्वीषुनिशासु । समानन्दितेति, द्रविण दानादिनेतिभावः । अयनं मार्गः, सदिन्दुचन्दनेति, शोभनचन्द्र चन्दनयोश्श्वेततया सदृशेन विन्दुसरसा विन्दुसरोवरेण, शोभनेन्दुसदृशः

चन्दनस्यविन्दुर्यत्र तादृसेन सरसेन ... ...
अपत्येति, अपत्यमदं पानंयस्य तथाभूतंपयोयत्र तेन ... चि ...
इत्यर्थः समनाशा यमस्यतृणा दक्षिणदिशाच, उदयाचलः ...
वृद्धिः। सूर्योदय पर्वतः उदयाचलनामधेयस्तत्प्रान्तेस्थितोगिरिश्च

तत्रच कियन्ति वासराणि शङ्करसमाराधनेनातिवा-ह्य वाह्याति कीर्तितकीर्तिः सुप्रीतचेता अलङ्कका-जनेश्वराशायायिनींसरणिम् । एवमासन्नानित्रिदश-सदनानि पावनवनवाहिनीश्च तटिनी स्सम्भावयन् चिररात्रायाक्रान्तकलेवरश्शान्तस्वान्तो निमीलद्दल-नलिन निलयान्विहाय तन्मधुनि पानप्रमत्तभ्रमद्भ-मर प्रकर विरुतनान्दी समारभ्यमाणे चित्रे मदनना-टके, उपपते रिव कलाकरस्यकरसम्पर्कलवेनापिसङ्को-च मञ्चन्तीषु रविकामिनीषु कमलिनीषु, चिरवि-युक्तकुमुदिनीप्रेमाणमिवकौङ्कुमरागकैतवेन धारयति कुमुदिनीनायके, नितान्तमलिनच्छायतां शनैरुपग-च्छति नववधूवदनपङ्कजे, निशादौ निशान्त माज-गाम । दूरादेवदृष्टमात्रेतस्मिन् सुचिर विलोकनाद-भिनवीभूतेनेव प्रणयपुञ्जेनातीवविकुर्वाणान् सर्वा-नेव वाष्प सलिलासार शोभितास्यसारसान् सम्भ्रया-वस्थितान् निसर्गानुराग शालिनो वन्धुवर्गान्यथाक्रमं प्राणाधिकान् प्राणमत् प्राणम्यतच कतिपयेन तेषाम्,

प्रमालिङ्ग्यतचाङ्केषु सकलै रुत्कलिकाऽतिविकलैः, अथससम्भ्रम प्रधावितविधेयजनाधीयमान मासन-मुपाविशदासीनेषु गुरुजनेषु, अपृच्छयतच कुशलं-तैः, अजिज्ञासतच प्रत्येक मनामयं कनीयसाम्, ततोऽति दुरासद तीर्थागत निजजनो

नेश्वराशा उत्तरदिशा । वनं जलम्, तटिनीः नदीः; 'निमीळ दिति, ीयमानकवाटे शौण्डिकालयेसति मद्यपास्ततोनिः क्राम्यन्तीति वस्तु-ृतिः, नलिनमेव निलयः, चित्रइति, मधुपान प्रमत्तस्य नान्दीपाठक-दितिभावः । उपपतेः जारस्य । पङ्कजइति, युक्तमेवैतत् पङ्कजस्य छायायां क्रमेणमलिनच्छायतेति । निशान्त मिति सदनार्थकम्, एवंच ोधा भासालङ्कारो व्यज्यते, निशादौ निशाया अन्तस्य प्राप्त्यसम्भवेन ोधस्यापाततः प्रतीतेः । विकुर्वाणान् हृष्टमानसान् । उत्कलिकेति, लिङ्गनस्येत्याशयः । आधीयमानं दीयमानम् । तैः गुरुजनैः ।

चिताचादिसत्कारं विन्दन्नतितरामनन्दत । विज्ञातभा-वुकै स्तैरनुयुक्तो विषमतमसृति प्रवृत्ति मादितः क्रमेण कृत्स्नामेव न्यवेदयत् । तदुदन्तसन्ततिश्रवणाहित-विस्मयास्तेमुदं परमामुपागमन्, अभ्युदैरयँश्च तन्म-हानुभावताया निवेदकानिवचनानि, कर्णाकर्णिकयाच तावार्ता विश्रुतता मयासिषु जगतीतलेषु, अवर्धत-चवह्नुविधोतस्य कार्तिकराकाकला करकरा कीर्तिल-तिका, प्रतिव्यधत्तच गिरिगणगुरोर्गरि माणं तदीय

माहात्म्यम्, येचतस्यतनया विद्यापति दामोदर राम· नाथ देवनाथ गोपीनाथ मधुसूदन जनार्दना भिधा· नो, दवीयसीमपि महामहोपाध्याय पदवीं दधाना, अपाकृत भूमण्डलपण्डिताभिमाना, असमानसम्मा· ना, विकाशित भुवनाननलिनकानना, दीपिता भिजनाः, प्रसन्ना, गुणसौरभलोभनिपतदस्तोक लोक· मनोमधुपगणा, धीधनचणा, धिक्कृतधिषण धीर· धिषणाः, सरसपेशलसत्यभाषणा, नवनवोद्यद्विशद· मानसद्यशसः, विदितसर्वदिव्यविद्याः, संसद्यनन्य· तुलितहृद्यानवद्य गद्यपद्यवैशद्यविद्योतितभारतीकाः, द्युमणिद्युतयः, सदाश्रवाः, श्रितश्रौतकृत्याः, परपरीवा दपराचीनचेतसः वाग्मिनः, हरिचरिताकलनकौतु· किनः, नयोपनिषद्दूरदर्शिनः, रमणीय परस्परप्रेमशा लिनः, न्यायवादिनः, सोमपीथिनस्समासन्,तेऽपि पितुः प्रभावं प्रतिपद्य परां प्रसन्नतां प्रापन्

सत्कारमिति, दूर्वाक्षतादिग्रहणमित्यर्थः । भावुकैः कुशलैः, प्रतिप्य· क्षनिराकरोत् । असमानम् अनुपमम्, धिषणः सुरगुरुः, उद्यद्विशद· मानेत्यत्र कार्यकारण पौर्वापर्यविपर्ययलक्षणाऽतिशयोक्तिः । सदाश्रवाः सत्यप्रतिज्ञाः सतां वचनेस्थिताश्च । उपनिषत् रहस्यम्, सोमपीथिनः सोमयाजिनः ।

तेषा मादिमाश्चत्वारः प्रोच्चातिचारूच्चावचन्यायवचो·

गोचरोचित प्रचुरचिरविचारातुल चातुरी चमत्कारच-यचकितचेतसा ऽव्वसायरसामृताशाब्दानुशासनेऽर्क-स्येव कल्याणोदर्कतर्क सम्पर्क भागिविषये कर्कशम-तिशालिता मर्पितेन तर्ककानन पञ्चाननेति पदेन सनाथो गोपीनाथो निखिलप्रतिभाषिमनीषि मानमर्द नेन जनार्दनेन सार्धं मध्यापयन्तो मेधाविनोऽन्ते वा सिनोऽव्यराजन्त ॥ तत्रा प्रतिहत प्रतिभा प्रतिभासितो देवनाथस्तु प्रत्येकंतन्त्र मन्तरायापरतन्त्रो निरन्तर मादरेण चिरेण यथेष्ट मध्यगीष्ट. समस्तशास्त्र मपार पारावार ममश्रान्मतिवैभवेन मन्दरेण, यस्मादधीत्य-दवीयसोऽपि दूरदर्शिदलादर माददाना निजदेशगौ-रवोदवसितता मासेदिरे, यदालयः प्रस्थितस्यापि कोविदकथायाः पन्थान मदर्शयदिव मण्डनमिश्रम-न्दिरस्य सुषमाम्, यस्सङ्ख्यातिगात् सङ्ख्यावद्भिरपि दुरवबोधाभिधेयान् कौमुदीनामधेय प्रधानान्निबन्धा-न्निरमात्, यश्च विदुरोऽपि धृतराष्ट्रपक्षपाती, गोत्रा-मोदनावस्थोऽपि देवनाथः, कलियुगजातजन्माऽपि त्रेताश्रितः प्रश्रितः, दयातिगोऽसाधारणः, स्वाहृत माश्रममनुचितेन सुकृतेन पालयन्,

तेषाम्, उक्तानामष्टानां,मध्ये चत्वारः, विद्यापतिमारभ्य रामनाथान्ताः, उच्चावचं नैकभेदम्, रक्षाभूता, राज्ञा, शालिग्रामित्यस्य व्यवसायेत्यनेन

माहात्म्यम्, येचतस्यतनया विद्यापति दामोदर राम-
नाथ देवनाथ गोपीनाथ मधुसूदन जनार्दना मिश्रा-
नो, दवीयसीमपि महामहोपाध्याय पदवीं दधाना,
अपाकृत भूमण्डलपण्डिताभिमाना, असमानसम्मा-
ना, विकाशित भुवनाननलिनकानना, दीपिता-
भिजनाः, प्रसन्ना, गुणसौरभलोभनिपतदस्तोक लोक-
मनोमधुपगणा, धीधनचणा, धिक्कृतधिषण धीर-
धिषणाः, सरसपेशलसत्यभाषणा, नवनवोद्यद्विशद-
मानसद्यशसः, विदितसर्वदिव्यविद्याः, संसद्यनन्य-
तुलितहृद्यानवद्य गद्यपद्यवैशद्यविद्योतितभारतीकाः,
द्युमणिद्युतयः, सदाश्रवाः, श्रितश्रौतकृत्याः, परपरीवा-
दपराचीनचेतसः वाग्मिनः, हरिचरिताकलनकौतु-
किनः, नयोपनिषद्दूरदर्शिनः, रमणीय परस्परप्रेमशा-
लिनः, न्यायवादिनः, सोमपीथिनस्समासन्,तेऽपि
पितुः प्रभावं प्रतिपद्य परां प्रसन्नतां प्रापन्

सत्कारमिति, दूर्वाक्षतादिग्रहणमित्यर्थः । भावुकैः कुशलैः, मतिः
घस्त्रनिराकरोत् । असमानम् अनुपमम्, धिषणः सुरगुरुः, उद्यद्विश-
मानेत्यत्र कार्यकारण पौर्वापर्यविपर्ययलक्षणाऽतिशयोक्तिः । सदाश्रवाः
सत्यप्रतिज्ञाः सतां वचनेस्थिताश्च । उपनिषत् रहस्यम्, सोमपीथिनः
सोमपाजिनः ।

तेषा मादिमाश्चत्वारः प्रोच्चातिचारूच्चावचन्यायवचो-

गोचरोचित प्रचुरचिरविचारातुल चातुरी चमत्कारच-यचकितचेतसा ऽवसायरसाभृताशाब्दानुशासनेऽर्क-स्येव कल्याणोदर्कतर्क सम्पर्क भागिविषये कर्कशम-तिशालिता मर्पितेन तर्ककानन पञ्चाननेति पदेन सनाथो गोपीनाथो निखिलप्रतिभाषिमनीषि मानमर्द नेन जनार्दनेन सार्धं मध्यापयन्तो मेधाविनोऽन्ते वा सिनोव्यराजन्त ॥ तत्रा प्रतिहत प्रतिभा प्रतिभासितो देवनाथस्तु प्रत्येकंतन्त्र मन्तरायापरतन्त्रो निरन्तर मादरेण चिरेण यथेष्ट मध्यगीष्ट, समस्तशास्त्र मपार पारावार ममथान्मतिवैभवेन मन्दरेण, यस्मादधीत्य-दवीयसोऽपि दूरदर्शिदलादर माददाना निजदेशगौ-रवोदवसितता मासेदिरे, यदालयः प्रस्थितस्यापि कोविदकथायाः पन्थान मदर्शयदिव मण्डनमिश्रम-न्दिरस्य सुषमाम्, यस्सङ्ख्यातिगान् सङ्ख्यावद्भिरपि दुरवबोधाभिधेयान् कौमुदीनामधेय प्रधानान्निबन्धा-न्निरमात्, यश्च विदुरोऽपि धृतराष्ट्रपक्षपाती, गोत्रा-मोदनावस्थोऽपि देवनाथः, कलियुगजातजन्माऽपि त्रेताश्रितः, प्रश्रितः, द्वयातिगोऽसाधारणः, स्वाहृत माश्रममुचितेन सुकृतेन पालयत्,

तेषाम्, उक्तानामष्टानां,मध्ये चत्वारः, विद्यापतिमारभ्य रामनाथान्ताः, उच्चावचं नैकभेदम्, रसाभृता, राज्ञा, शाब्दिकामित्यस्य अवसायेत्यनेन

प्राक्तनेनान्वयः । प्रतिभाषिमानः, प्रतिवादिनामभिमानः, सङ्ख्या वद्भिः बुधैः, कौमुदीति, अधिकरणकौमुदी, स्मृतिकौमुदी, साहित्य कौमुदी, मन्त्रकौमुदी प्रभृतीनित्यर्थः । विदुरः तन्नामधेयोऽर्जुनस्य सुहृत्, ज्ञाता च, धृतराष्ट्रः दुर्योधनजनकः धृतं राष्ट्रं राज्यं येनासौ धृतराष्ट्रो राजा च । गोत्रामोदनम् पर्वतानां पृथिव्याश्च प्रहर्षणम्, देवनाथः सुरेश स्तन्नामा च । त्रेता एतदभिधानं युगम्, दक्षिण गार्हपत्याहवनीयाग्नयश्च । प्रश्रितः विनीतः, द्वयातिगः, निवृत्तरजस्तमोगुणः, असाधारणः अतुलितः

आम्नायस्मृति निदेशित मनुचरन्, विजितोन्मद मदनमालव वियोगिवनितावदनरोचिषा यशसा वसुमतीं विभासयन्, अजीजनज्जनाना माह्लादम् ॥ एवमेव भूमिदेवतापनिषूदनो मधुसूदनोऽपि मनोरमतयाऽवधुतमधुसखः, शैशवाकलित सकलविद्यावदातहृदयः, सद्विचाराभिनिवेश पेशलातिमांसल मीमांसोदयः, सोदयः, जल्पनीयानल्पकल्पपर्यन्तस्थाय्यनन्यदीयकल्पकल्पनाशक्ति—सीमन्तिनीतल्पभृतः, अलक्षितप्रति पक्षरक्षणदक्षविचक्षणः, सूक्ष्मतम (शेमुषी) चेतनासूचिकाभि र्मोचनो ग्रन्थग्रन्थि निवहस्य, समाराधको गणाधिपस्य, पारदृश्वा विश्वाश्रितशास्त्रसरस्वदोघस्य, अवतारो वाग्देवतायाः, निरवधि प्रवृद्धानन्द विभावसु विकचवदनारविन्दतां जनतां प्रापयन्, उपदेशादानपात्रच्छात्रसन्दोहानुपदि-

शन्, न्यक्कृत केरलकमनीयकामिनीकपोलकान्त्या कीर्त्या विशदयन् मेदिनीवलयमदीप्यततराम्। येन विरचिता अदभ्रसद्युक्तिगर्भास्सन्दर्भा नचिरस्यकस्य नामापश्चिमचेतनाञ्चितस्य विपश्चितश्चेतश्चमत्कुर्वन्ति ॥ अथ स्वसजातीयवियुक्तश्वसितसम्वर्धनक्षमे वहतिमनोभवाशुशुक्षणि सन्धुक्षणदक्षे दक्षिणसमीरणे, मञ्जुलं गुञ्जति नवमञ्जुमञ्जरी रस सम्पलम्पटे मिलिन्दपुञ्जे. मधुरकुहूरुतं मुहु रसमालपति ललनादशनांशुकानुकारि प्रवालमालशाल रसालशालशाखावलम्बिनि तत्प्रसुतप्रसूनरसामवास्वादनो

भृमीति, एतेन मधुसूदनठक्कुरे हरे रसाद्दश्यमभिधामूलयाव्यञ्जनयावोध्य, भूमिदेवस्य भूमिदेवयोश्चतापनिपुदनत्वस्य साधारण धर्मत्वात् । मधुसखः कामः, अभिनिवेशः आग्रहः अभितः प्रवेशश्च, मांसलः स्फीतः, मीमांसा विचारः, सोदयः उन्नतः, अनन्यदीयकल्पा अनुपमा, अदभ्रावहुला, अञ्चितस्यपुजितस्य । स्वसजातीयेति, श्वसितदक्षिणानिलयोर्वायुत्वेनसाजात्यम्, सजातीयमुन्नमयन्तिलोका इतिवस्तुस्थितिः । आशुशुक्षणिः अग्निः, सन्धुक्षणं दीपनम्, लम्पट इति, नायकविशेषण्व्यवहारसमारोपान्मिलिन्दे समासोक्तिः, दशनांशुकोऽधरः, शालेति, शोभमानेत्यर्थः । तदितिशाखार्थकम् ।

दितमुदिते समुदये पिकानाम्, ऋतुनूतन सेमागमजातलज्जयेव विनतायां श्रितनवपलाशवाससिन्नततौ,

निर्गच्छद्देहदाननाग [illegible] मार्गि केलिकलौः
न्मयाशिशिरनिः, पलाश कुसुमरेणुनिकर[illegible]
जुष्टवनिपल्लवशकुन्तकोकिलना [illegible]
नागरेन, विकच कमलोत्पलकाण्डखण्डकदम्ब
कुल कोलाहलकलाकुले प्रतिभाति पुष्पितपल्लवे मार्गे,
कान्तेन सार्धं कुसुमावचयकुतूहले कल्पयति कदम्बके
कामिनीनाम्, पञ्चशरेण प्रमुदितमुद्दीप्यमानवस-
न्तरागापहृतहृदयेषु लोकेषु, वात्स्यायनविवोधितबन्ध
बहुविधां निधुवनक्रीडामनिशं विदधानेषु स्मरशर-
कृतकम्पदम्पतिजनेषु, कामसागरन्तवसन्तपारयवेत्र
मल्लिकावकुलमालती मालया प्रतिबध्यमानेषु भृङ्गा-
टनासङ्गिनिशृङ्गाटके तरुण मानसेषु, पटवासवासितवस
नवदनै र्युवजनै र्मुरजरवमनोहरमुच्चै गीयमानाश्ली-
लगीतिगाथादोहा निशमनेन विहसन्तीषु समन्ततो
नागरिक सीमन्तिनीषु, प्रसूनाशुगदैवतदरिद्रता
दूरीकरणदर्शितदातृभावे, वनितावयव इव कनकरुचि-
कम्पक चम्पकद्युति मनोरमे, पूर्वानुरागइव उत्कलि-
का निकरमेदुरागमे, भूपति भवनइव विकशितका-
ञ्चने, वेशसन्निवेशइव गणिकाशतद्रवपरायणमधुप-
गणे, वैद्यक

ऋतुः वसन्तः स्त्रीणांपुष्पसमयश्च, वाससीति, ऋतौ चतुर्थदिवसे नवंवासोगृह्णन्ति स्त्रिय इत्याचारः । क्रकचेकरपत्रे, पलकशकलैः मांसखण्डैः, आगमिकेन, तान्त्रिकेण, वात्स्यायनः कामशास्त्रप्रणेता, पाशपया पाशसमूहेन, शृङ्गाटके चतुष्पथे, पटवासः आवीरकः दूरीकरणेति, पुष्पाणांमाचुर्येणाधिकशरलाभादितिभावः, चम्पकद्युतिः चम्पकस्य तत्सदृशी वा कान्तिः, उत्कलिकेति, उत्कलिकाया उद्गतकोरकस्य उत्कण्ठाया वा निकरेणमेदुरस्सान्द्रः अगमोवृक्षोयत्र आगमोयस्येतिवा सताहृशः । काञ्चनपदं कचनारेतिभाषयाप्रथितस्य पुष्पस्य, सुवर्णस्यचबोधकम् । वेशः वेश्याजनाश्रयः, गणिका यूथिका वाराङ्गनाच, द्रवः केलिः द्रवणंच, मधुपो भ्रमरः मद्यपोव्यभिचारीच ।

इव शतप्राशामोदितजने, सुन्दरीस्तनइवनवमालिका समुद्दीपिते, द्वारवतीनगर इव माधवीस्मितधवलिते, वैभातिक विलासिनीवक्षोजइव प्रियनखक्षतकिंशुकाभिरामे, केशवइव सुरोल्लासप्रकाशके, संजातरजसापि उपभोग्यया प्रसूनसंहत्या चित्रीकृते, पुष्पन्धयनिचयपरिपीयमान माधवीमधूनां दूरदर्शनादपि मद्यःप्रमाद्यतामहंयूनामपियूनामङ्गनाहेमबाहुयुग्म निगडगाढबन्धनेनाभिनन्दनीये विलसति सुरभिसमये, कदाचिदसौ देवनाथः प्रकृत्याद्यशक्तिभक्तियुक्तोगृहीत तदीयदीक्षो मन्त्रसिद्धिकामः कामाख्यागमनाय पितुः पादपद्मेषु प्रार्थयांबभूव । सचजगतीसङ्गीत

कीर्तिस्स्वसङ्गिनमङ्गीचकारतङ्गमयितुम्, ततो देव- नाथस्तदधिगम्य सुप्रीतमानसः प्रयाण समयं प्र- तीक्षमाणस्तस्थौ ।

इति मैथिल श्रोत्रिय श्रीबालकृष्णमिश्र विरचिते
लक्ष्मीश्वरी चरिते तृतीयउच्छवासः ॥

शतमाशः करवीरो भैषज्यंच, आमोदितः सुगन्धिविशेषंप्रापितः आमयनिराकरणेन हर्षितश्च । नवमालिका सप्तला नवीनामालाच, माधवी स्मितं वासन्तिका विकाशः माधवस्त्रीहसितंच । नखक्षतेति, इहविशे- विशेषणम।वैपरीत्यात्स।धारणधर्मत्वं बोध्यम् । सुरोल्लासः उल्लसितं प्र देवोल्लासश्च, प्रकाशके जनके, रजः स्त्रीणा मार्तवं परागश्च, चित्रांक किर्मीरिते विस्मयविषयीकृतेच । पुष्पन्धयोभ्रमरः, धीयमानं पीयमानम् अहंयूनाम् अहङ्कारवताम्, अभिनन्दनीयइति, प्रमचहृयशृंखलयाबन्धन दितिभावः, सुरभिः वसन्तः, आद्यशक्तिर्भगवती, स्वसङ्गिनमिति, नते काकिनमितिवात्सल्यं व्यञ्जयन इति ॥

इति तृतीयोच्छ्वास टिप्पणी ॥

❀ अथ चतुर्थोच्छ्वासः ❀

अनवगत नरेन्द्रभावं किमिमंजन महिसेपराभवितुम् ।
सोऽयमनन्यसदृक्षोऽवहितो जागर्तिजिह्मगद्वान ॥१॥

अथामरतरङ्गिणीप्रवाहइव हरिपदपरिच्युते, निपीतासवइव गलितांशुके, अधोनिपतितिच, निशानायके, पुष्कराकारकारोदरेषु संयमितानुदयादेवचञ्चरीक निचयानचिरेण मोचयितरि, मयूखमालामयेऽपि कौशिककुलान्धकारकारके, मित्रेऽपि कोकशोकपरिपन्थितामुपगते पुरुहूतवधू पारिजातप्रसूनइव, लोकालोकलोचनइव, गगनाङ्गणरत्नप्रदीपकइव, दृक्पथमवतीर्णे विभाकरे, कृतापचितिकृत्यः शुभेऽहनि प्रदक्षिणं ज्वलतिभव्ये हव्यवाहने, शिशिरसौमनसामोदनोदने वहत्यनुकूलेपवमाने, प्रसन्नाननासु आशासु, पुरस्ताच्चरति घृतधवलपीवरपयोधरे धेनुमण्डले, परिलसति श्रुतिपारयायिनि विश्रुते श्रोत्रियगणे कनककलसप्रतीकाशकुचयुगलविनतायामग्रतः स्थितायां दिव्यवनितायामसौ गोविन्दः प्रकामंकामाख्यां कामप्रतिमानेन सानन्द ममन्देहेन समंदेवनाथेन प्रतस्थे । गत्वाच कियतिदूरे सविशेषभीपणस्रोतोभिरतुलां, प्रोषितभर्तृकामिवोर्मि

श्रीः । नरेन्द्रः विषवैद्यो राजा च, सदृक्षः सदृशः अवहितः सावधानः,

❀ अथ चतुर्थोच्छ्वासः ❀

अनवगत नरेन्द्रभावं किमिमंजन मीहसेपराभवितुम् ।
सोऽयमनन्यसहक्षोऽवहितो जागर्तिजिह्मगन्नात ॥१॥

अथामरतरङ्गिणीप्रवाहइव हरिपदपरिच्युते, निपीतासवइव गलितांशुके, अधोनिपतितेच, निशानायके, पुष्कराकारकारोदरेषु संयमितानुदयादेवचञ्चरीक निचयानचिरेण मोचयितरि, मयूखमालामयेऽपि कौशिककुलान्धकारकारके, मित्रेऽपि कोकशोकपरि[illegible]न्थितामुपगते पुरुहूतवधू पारिजातप्रसूनइव, [illegible] लोकलोचनइव, गगनाङ्गणरत्नप्रदीपकइव, [illegible] पथमवतीर्णे विभाकरे, कृतापचितिकृत्यः [illegible] प्रदक्षिणं ज्वलतिभव्ये हव्यवाहने, शिशिर[illegible] मोदनोदने वहत्यनुकूलेपवमाने, प्रसन्ना[illegible] शासु, पुरस्ताच्चरति धृतधवलपीवरपयो[illegible] ले, परिलसति श्रुतिपारयायिनि वि[illegible] कनककलसप्रतीकाशकुचयुगलवि[illegible] तायां दिव्यवनितायामसौ गोविन्दः [illegible] कामप्रतिमानेन मानन्द मम[illegible] प्रतस्थे । गत्वाच कियति[illegible] भिरतुलां, प्रोषितभर्तृकामि[illegible]

श्रीः । नरेन्द्रः विषवैद्यो राजा[illegible]

[illegible]

मात्स्याकुलां, वदन्येतृप्रकृतिमिवदर्शितावतीं, वाग्दे वतामिव पाठीन शालाश्रितां, यमिमनोवृत्तिमिव असकृदाकलितनक्रां, भोज्यभवनभूमिमिवविविधाविहारगम्भृतां, क्वचित् सरसीरुहवनीमिव तरणि विलसितां क्वचित दण्डकामिवागाधकबन्धां, क्वचित् द्रुमशाखामिवोत्तानपुष्करां, राजन्यस्यापि केवलेन तपोबलेन ब्रह्मर्षितां गतवतो नूतनविधे स्त्रिशंकुशोकवागिधिव-हित्रस्य विश्वामित्रस्य भगिनीं भगवतीं कौशिकीं ददर्श । तत्रच विहितस्नानादिकृत्यः कतिपयेनवा-सरेणसरणिक्रमेण प्रवणीकरणोच्चाटनादिपटलपरिपाटी पाटवित चाडुतररटितजनसंकटं, वाटनिकटवर्तिवाटि-काघटित मनोरमकमलाकरकणकुसुमपरिमलमयामो-

दि मलयमारुतान्दोलित मिलितमिलिन्दवृन्दमालती व्रततिनिकेतनान्तिकसञ्चरमाणचाम्पेयरुचिरुचिरतनु लताभिर्मृगलोचनाभिः चीनमेचकसिचयाञ्चित प्रकटितप्रायस्तनगिरीशावलम्बि वन्धनातिविभ्यत्कुन्तल भुजङ्गमसंयमनच्छद्मदूरीकृतदुकूल त्रिवलिवाहुमूल दर्शनेन वशीकृतैः, कटाक्षविशिखनि क्षेपणेनवेधित हृदयैरध्वगसमुदयैस्सङ्कटं, तपनीयकान्त्याऽपिश्यामया प्रमदया, विभक्तेनाप्यपृथग्जनेन

माला परम्परा। आवर्तः अम्भस्संभ्रमः, शास्त्राधावृत्तिश्च। पाठीन शालाश्रितां पाठीनशालाभ्यां मत्स्यविशेषाभ्यामाश्रितां पाठकजनागारमाश्रितांच आकालकतः दृष्टोविपर्याकुलश्च। नक्रस्तदभिधानो जलचरविशेषः नासागूंचनक्रम् "नासाग्रेचित्तनम्वित" इतिहि पातञ्जलसूत्रम्। अवहारो ग्राहः शर्करादिस्वादूकृतं भक्षणीयञ्च। तरणिः नौकादिवाकरश्च। दण्डकादण्डकारण्यम्, अगाधकवन्धां गम्भीरजलां श्वभ्रस्थितकवन्धाभिधदानवांश्च। उत्तानपुष्कराम् अगभीरसलिलाम् ऊर्द्ध्वास्य शयितविहगांश्च। पटलंसमूहः, पाटवितः पटुः, चाटु प्रियम्, सङ्कटं व्याप्तम्, वाटः पथः, वाटिका उपवनम्, घटितः निर्मितः, गिरीशः हिमाचलः शिवश्च, विभ्यदिति, इतरोऽपिदन्धनाद्बिभ्यत् शिवमवलम्बत इति, सङ्कटं दुस्तरम्, तपनीयं सुवर्णम्,श्यामया श्यामरूपया मुग्धयौवनयाच,विभक्तेन पृथग्भूतेन विशिष्टभक्तेनच, अपृथग्जनेन पृथग्भूतजनभिन्नेन. अपामरेणनीचेनच

जनेनचालितं, दिपमाशुगशासनैकपरवशं. प्रति निधिमिव विद्याधरपुरस्य, तौर्यत्रिक निर्माणसीमान

मिव विश्वकर्मणः अध्यापनालयं कलाकलापस्य, प्रयोगधाम काम कामाख्याद्यागमाभिधेयस्य, तिलकातिललितालिकानां, यौवनमददेशितविदग्धतानां विमुग्धनैगमानां, कामकुलदेवतानां,मुक्तावलीभिरपि निषेवितोग्रकुचशालिनीनाम् अंशुकोचितकृत्यकारि चिकुरस्थितीनां, वहुविधासपत्नरत्नमालिकाच्छलेन ग्रहगणमपिवशमानयन्तीनां, वलित्रयवलिततया वैरोचनिपुरीतोप्यधिकश्रियमावहन्तीनां, स्मरणगोचरीकृतशरीरमपिस्मरं सपदिनरुणयन्तीनाम्, उज्ज्वलमतिमतीनाम्, इतस्ततोभ्रमन्तीनां, रमणीमणीनां मणिमयमञ्जुमञ्जीर शिञ्जितमनोहरं. वङ्गभूमिभूपाकरं नगरं समामसाद । यत्र यमः केशपाशेषु, नियमोनखक्षतेषु, आसनवन्धो निधुवनेषु, प्राणायामस्तदवसानेषु, प्रत्याहारश्चेलाञ्चलेषु, धारणा वक्षोरुहेषु, ध्यानं विटपाग्रगामिषु वलीमुखेषु, समाधिस्सुरतान्तरालेषु, वन्धनविमुक्ति

यलितं मुषितम्,यावनैकेनिपतेन गजगागनपारवश्यविशेष्यजगानलितं गतिमयं व्यञ्जयति । यौवनिके नृत्यगीतवाद्यम् । प्रयोगोऽनुष्ठानम्, अ[illegible] कामन्दः, यौवनमददेशितेत्यनेन परां दशा[illegible] गम्यते, नैगमानां[illegible] [illegible] । मुक्तावलीभिः मौक्तिकमालाभिः मुक्ता[illegible] [illegible], [illegible] [illegible] । अंशुकोचिते, [illegible]

[illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] संवरम् । [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]दि- [illegible] [illegible] [illegible] [illegible] ।

ईदृशान्यपि [illegible]जोऽपि [illegible]कामिनीनां [illegible] [illegible] प्रतिकृतिके- [illegible] [illegible] [illegible] [illegible] । [illegible]जशक- [illegible] [illegible] वियोगिनीनाम् । तत्राथ [illegible] [illegible] नाकना[illegible] [illegible] मार्गमाणो मार्गाभिलषित[illegible] [illegible]- [illegible] [illegible] चन्द्रिकाद- [illegible] [illegible]मलकमलमा लावलनजनितचन्द्रिकयापरयाच [illegible], मवपुटभेद- [illegible] [illegible], भारत व्याहतमिव [illegible] प्रकटितेहामृगंच,

[१] [illegible] पाठः ।

मिव विश्वकर्मणः अध्यापनालयं कलाकलापस्य प्रयोगधाम काम कामाख्याद्यागमाभिधेयस्य, तिल कातिललितालिकानां, यौवनमददेशितविदग्धतानां नितिमुग्धनैगमानां, ग्रामकुलदेवतानां,मुक्तावलीभिर्नि निषेवितोग्रकुचशालिनीनाम् अंशुकोचितकुचकाशि चिकुरस्थलीनां, बहुविधामपत्नरत्नमालिकाकलित [illegible] ग्रहगणमपि [illegible] शमानयन्तीनां, ललितयनलितनया [illegible] गेचनिपुणीनामधिकश्रिगणान [illegible] न्तीनां, स्मरणगोचरी कृतशरीरमपि [illegible] मर्पादिनकृणयन्तीनाम्, उन्नत [illegible] [illegible] निमर्तानाम्, [illegible] नाम्, [illegible] [illegible] [illegible] [illegible]

[illegible]

अथ निशीथे कौतूहलिकेषु नागरिकेषु केनचि-न्मानिन्त्रकेणादर्सीव शोल्लित शिखिशालितापरिनिवी-पाकृतोज्ञायन प्रणालिकया कियदुदानीयमानो देव-नाथः पाथश्रमनादयाऽपि निद्रया भयादिव सपदि निराकृतं नयन नलिनं निशायामपि समुन्मीलयन्, ऊर्ध्वमध्वानमध्यासमानमात्मानं कलयन्नेव केतनीकृ-तो नितान्तमातङ्केन, किङ्करीकृतोहृदयकम्पनेन, क्षेत्रीकृतो वैवर्ण्येन, विषयीकृतस्सकलांगसंगिना स्वे-दोदयेन आत्मसात्कृतश्चिन्ता सन्तानेन, आलि-ङ्गितो बाष्पोत्पीडेन, समञ्चितो रोमाञ्चेन, किंकर्तव्यताविमूढउद्गूढशास्त्रीयगूढविषयोऽपि क्षणमु-पारिपार्श्वेऽधो दिक्षुविदिक्षु च प्राक्षिपद्विस्मृतनिमेषं चक्षुः। ततो हा तात! हा तात! नोदीक्षसे मन्दभाग धेयं तनयम्, किमेतदकस्मादुपनतं, महीतलं विहा य विहायसभायापितोऽपि अहह नासादयामि स्थि-रताम्. किन्तु केनाप्याकृष्यमाण इव कुत्रचिद्व्रजा-मि, नजानेकस्यवा कुतोवा विषममिदं विजृम्भित-म्, तदेतदपायतोऽह्नाय परित्रायतां परित्रायता मिति-तारतारे स्स्वरे रचेतनेष्वपि निजवेदनाववोध माद-धानः प्रतिध्वानरूपेणोपाधिना भवनभित्तिकाऽभिलि-खित गीर्वाणगणेनाऽपि तरुणकरुणया कृतानुभाषणः

नारायणमिव शङ्खचक्राञ्चितं, हरमिवविधृतत्रिशूलं काश्मीरप्रदेशमिवकामनैकसम्पादकं देवीमुपासितु मागतैरिव चित्रस्थितै स्त्रिदशनिकरैर्विराजितं, पद्मरु धिररक्ताजिरं श्रीतारामन्दिरं विलोक्यमुदमाप्नुवन्नु पागमत् , भानुमानप्यध्वश्रमक्लान्तइवसानुमन्तमा श्रयत् । ततोऽसौ विधिमनुरुध्यमानोऽव्यधत्त संध्यास म्बन्धिकरणीयम् , पूजकेनद्विजेननीराजनायापावृते द्वारे समपूजयदात्मजोदवाचितैरर्चनसमुचितैर्भगवती मकीटलूनैः प्रसूनैः ।

प्रतिकृतिः प्रतिबिम्बः, एतेनकपोलेवैमल्यातिशयोध्वन्यते । चन्द्रं वियोगिनीतापदायकत्वाद्विधुं कर्पूरंच, स्वाभिप्रायं स्वाभिप्रायविषयम् । नाकनायकनिकायं देवमन्दिरम् , चन्द्रिकाद्वेषविषयभूतया चन्द्रिकाधिक स्वच्छयेति यावत् , वलनंवेष्टनम् , भवेति, तन्मन्दिरकवाटं दृष्टवन्तोनपुन स्संसारमायान्तीतिभावः । भारतव्याहृतं भरतप्रणीतं नाट्यशास्त्रम् , प ताका, वैजयन्तीरूपके प्रसिद्धं पताकास्थानंच, शैलूषो विल्ववृक्षोनटश्च, ईहामृगः ईहाप्रधानोमृगः कोकः रूपकप्रभेदश्च, चक्रं यन्त्रविशेषआगम शास्त्रप्रसिद्धः, अस्त्रविशेषश्च, ताभ्यां मध्येकरेचस्थितत्वादञ्चितम् , विधृ तेति, अभ्यन्तरे त्रिशूलधारणं वोध्यम् । कामनैकसम्पादकं कामनाया अभीष्टस्य एकं कामसदृशस्यानेकस्य पूरकं जनकंच । अजिरम् प्राङ्गणम् सानुमन्तं पर्वतम् , अपावृते उद्घाटिते, अकीटलूनैरिति कीटेनच्छिद्रित स्यपुष्पस्य देवार्चने प्रतिषेधस्मरणात् ।

अथ निशीथे कौतूहलिकेषु नागरिकेषु केनचिन्मान्त्रिकेणादसीय शीलितसिद्धिशालितापरिचित्री-षाकृतोच्चायन प्रणालिकया कियदुदानीयमानो देव-नाथः पाथश्रमगादयाऽपि निद्रया भयादिव सपदि निराकृतं नयन नलिनं निशायामपि मसुन्मीलयन्, ऊर्ध्वमध्वानमध्यासमानमात्मानं कलयन्नेव केतनीकृतो नितान्तमातङ्केन, किङ्करीकृतोहृदयकम्पनेन, क्षेत्रीकृतो वैवर्ण्येन, विषयीकृतस्सकलांगसंगिना स्वेदोदयेन आत्मसात्कृतश्चिन्ता सन्तानेन, आलिङ्गितो वाष्पोत्पीडेन, समञ्चितो रोमाञ्चेन, किंकर्तव्यताविमूढउद्गूढशास्त्रीयगूढविषयोऽपि क्षणमुपरिपार्श्वेऽधो दिक्षुविदिक्षु च प्राक्षिपद्विस्मृतनिमेषं चक्षुः। ततो हा तात! हा तात! नोदीक्षसे मन्दभागधेयं तनयम्, किमेतदकस्मादुपनतं, महीतलं विहाय विहायसमायापितोऽपि अहह नासादयामि स्थिरताम्. किन्तु केनाप्याकृष्यमाण इव कुत्रचिद्व्रजामि, नजानेकस्यवा कुतोवा विषममिदं विजृम्भितम्, तदेतदपायतोऽह्नाय परित्रायतां परित्रायतां मिति-तारतारे स्स्वरे स्चेतनेष्वपि निजवेदनावबोध मादधानः प्रतिध्वानरूपेणोपाधिना भवनभित्तिकाऽभिलिखित गीर्वाणगणेनाऽपि तरुणकरुणया कृतानुभाषणः

पितरं प्राबोधयत । तत पुनर्दायादावेदनादक्षीणतां सर्वानवद्यविबुधपतिः प्रबुद्धस्तद्वस्थयाऽस्तुतं सुतं मध्ये क्ष्यविपर्यनिचयान् गोचरयितुमाचलन्तया चिन्तया विनिश्चितयवृत्तान्तमनाकुलितमना विपत्कदम्बापहारि श्रीजगदम्बायाः अविलम्बित मवलम्ब्यतां पदाम्बुज मित्युदाजहार । अनन्तर मनुष्ठितेऽपिजनयितुर्निदेशिते स्वमिवदेव्याअप्यंघ्रिकमलमुत्क्रामित मवलोक्य हन्त हन्त तारिणीचरणोऽपि चारणगणसरणि माक्रुष्यते, हा कष्टम्, किंकरोमि, किमाश्रयामि, कस्मैनिवेदयामि,

परिचिचीषा परिचयेच्छा, उच्चायनम् उच्चाटनम्, विहायसम् आकाशम्, अपायतोऽन्तरायतः, अह्नायशीघ्रम्, उपाधिना छद्मना, चारणगणसरणिम आकाशम्,

कागतिः, कउपायः, किंशरणम्, अहो विसदृशपरिणामिता प्रयाणशकुनानाम्, हातात? हातात? द्रुतमवतादित्यार्तनादं विललाप । ततो गृह्यतामेतर्हि तर्हि गोविन्दस्यैव पदाङ्गुष्ठ मित्यनुज्ञया पितुस्तथैव प्रयतमानो मन्दतममपिनास्पन्दत । अथाधिगत्य प्रयोजनजननचणे निजाचरणे विफलता मक्षीण मन्दाक्षक्षितावसक्तपरीक्षितं सम्भूयसखिभिस्समाने स्तमुज्ञयितुमुग्रप्रयोग मातन्वानेऽपि तस्मिन् नचमनागपि

चचालाङ्गुष्ठं गोविन्दचरणस्य, एवं नवकामिनी कल्पा यितापवासागत प्रियनङ्कत प्रमदाक्षणकल्पाक्षणदाप्रतिक्रियेवतस्यक्षयमगच्छत्, उदन्तमेत मादीपयितुमिवोदियाय मेदुरेरागेण प्राच्याचलचूडामणिस्तरणिः, अमीषामभिमानइव तमोविननाश, गोविन्दगोचरेण नगरमिवारज्यतेन्द्रीवदन मारुणेन रागेण, उद्व्रजनं प्रयुञ्जानानां जनानां समवायइव कैरवरनं संकोच माञ्चत्, गोविन्दतनयाननमिव कमलकाननं विकाशमासादयत, विभाकरंत्रिशाङ्कवैपापवृत्तिः पुरमभिव्यापत्, व्यर्थीभूतप्रयोगसमुदयास्ते साक्षात्कृता नुभावतयाऽवधार्य सिद्धतां प्रवृद्धाभिदर्शनोत्कलिकाभिराकृष्टा स्वह सहमूण नगरवासिनां समागाय निटिलतटनिहिताञ्जलिपुटाः प्रणिपत्याभिनव म्भोधरधीरध्वनिगम्भीरस्निग्धया गिरा गोविन्द मेवमवद्, स्तुतिभिरेवपरितोषितश्चतैर्निश्चलतारकेण लोचनेन निपीयमानो नूनमय मनूनः प्रभावो भगवत्या भक्तक्लेशवारिनिर्मितारिण्या श्रीतारिण्या स्मरणमात्रदर्पे चेत्यभिधाय प्रशंसाभिस्तानभ्यनन्दयत् ।

अथ संजातविस्मयास्तस्मान्नगरान्निर्गत्य नाधिकेन दिवसेन नीलाचलानिपातनदन [illegible]

[१] दर्पेति वा पाठ । [२] [illegible] पाठ ।

पजनं च, अवनं वनरहितं पालनं च। कुमुदं कैरवं पृथिव्या हर्षश्च कु-मुद्, वसु कान्तिः धनं च। तमसाराहुणा अज्ञानेनच सकलाशा समस्ता दिशो, सकलजनानां तृष्णा च। करः किरणः हस्तश्च, अमितेति, रवे-रसख्याश्वत्वाद्विरोधः, दोषया दोषैश्चानभिभूतः। लोकेशोविधिः लोका-नामीशश्च, अनाभिजातः नाभेर्नजातः सुन्दरश्च। मनोजवशः कामा-धीनः, पितृसन्निभश्च। भोगवान् फणी सुखीच, मन्त्रोमनुर्विचारश्च। अद्वितीयः एकमात्रं सजातीयद्वितीयरहितश्च, द्वितीयानुरक्तः द्वितीयस्मिन् द्वितीयायां श्रीतारिण्यांचानुरक्तः। दर्शनं नयनम्, कविः शुक्रः, कवयिता च। आत्तदण्डकः गृहीतदण्डकाभिधानविपिनः गृहीतदण्डश्च, राम-मादाय विरोधः। मृगयेत्यादि मृगयाऽऽखेटः भीमः भीमसेनः भयं-करश्च, एताभ्यां युधिष्ठिरापेक्षयाव्यतिरेकः। गृहीततारः गृहीता तारा हरिश्चन्द्रस्यजाया भगवती च येन सः, एतेन तदपेक्षयाव्यतिरेकः। सत्यव्रत इति एतेन भीष्मापेक्षयाव्यतिरेकः।

प्रवीरो मङ्गलकरः, परसमाधिसहिष्णुः जिष्णुः। अक्रूरः गोकुलानन्दनः। चन्द्रकान्तः सुकुमारः। सूरतः शूरतरः उपायप्रयोगकुशलः, द्विपददलितदलः, कृतलक्षणः, नवपेशलक्षणप्रदर्शनः, विचक्षणप्रतीक्ष्यः, रक्षणमखदी-क्षितः स्वच्छयाशयावलक्षः उदारदयेक्षितप्रजः कुल-पर्यायप्राज्ञः, रसाभिज्ञः विहितबहुयज्ञः। सप्रतीकश्रुति स्मृतितन्त्रसन्ततिस्वतन्त्रेण, यजनजपनहवनध्यान प्रधानधर्मानुष्ठानपरम्परापरायणेन, अनुदिनं वदन

समुद्रवेनहितानि कथयता पृथिवीनाथंप्रथयमानेन, राजानुरागरोहितेन, पुरोहितेन, धर्मागमगहनसञ्चारपञ्चाननेन, सदभिजनजननयातेन, शीतलतरशील शालिना, सुकृतसचिवेन, सदगारधारकैः स्तम्भैरिः सारसङ्कृतैः, अवृजिनवृत्तिभिः प्रवृद्धैः, असद्व्यसनमहापवनेनाप्यनवधीरितधीरभावैश्च, परार्थानुमानैरिव न्यायानुयायिभिः, शक्तिसाधकैरिव संवृतयन्त्रैः, साधुसाधनैरिव विपक्षाननुबन्धिभिः, कविप्रवरैरिव रहसि पदानि चिन्तयानैः, महामुनिवरैरिवालुब्धैः, गणितनिपुणैरिव देशकालकोविदैः, नीतिविशारदैः, प्रतिभातिविशदैः, प्रगल्भैः, समज्यारञ्जनैः, मन्त्रिजनैः, दाशैरिव भुवनाशयशयितग्राहकैः, योगिपटलैरिवास्पृष्टव्यसनैः, रतिस्थायिभावैरिव शुचिताञ्चितैः, क्षोणीश्वरैरिव क्षमारक्षकैः त्रिदशास्थानकैरिव स्फुरितधिषणैः, यथाभिहितभाषणैः, तृष्णयाऽकृष्णैः क्रोधानवधूतैः, दूतैः,,

प्रवीरेति, एतेन यमापेक्षयाव्यतिरेकः। जिष्णुः जयनशील इन्द्रश्च, एतेनेन्द्रापेक्षयाव्यतिरेकः। अक्रूरेति, एतेनाक्रूरापेक्षया व्यतिरेकः। चन्द्रकान्तः इन्दुसुन्दरः चन्द्रकान्तशिलाच, एतेनोक्तशिलापेक्षयाव्यतिरेकः। सूरतः दयालुः शूराद्या उपायेति, सामदानादीत्यर्थः। कृतलक्षणः गुणैः प्रतीतः। पेशलः चारुः। पर्यायः क्रमः। प्रतीकः अङ्गम्। सारं न्याय्यं

पजनं च, अवनं वनरहितं पाकनं च । कुमुदं कैरवं पृथिव्या हर्षश्च कुमुत्, वसु कान्तिः धनं च । तमसाराहुणा अज्ञानेनच सकलाशा समस्ता दिशो, सकलजनानां तृष्णा च । करः किरणः हस्तश्च, अमितेति, रवेस्सप्ताश्वत्वाद्विरोधः, दोषया दोषैश्चानभिभूतः । लोकेशोविधिः लोकानामीशश्च, अनाभिजातः नाभेर्नजातः सुन्दरश्च । मनोजवशः कामाधीनः, पितृसन्निभश्च । भोगवान् फणी सुखीच, मन्त्रोमनुर्विचारश्च । अद्वितीयः एकमात्रं सजातीयद्वितीयरहितश्च, द्वितीयानुरक्तः द्वितीयस्मिन् द्वितीयायां श्रीतारिण्यांचानुरक्तः । दर्शनं नयनम् , कविः शुक्रः, कवयिता च । आत्तदण्डकः गृहीतदण्डकाभिधानविपिनः गृहीतदण्डश्च, रामभादाय विरोधः । मृगयेत्यादि मृगयाआखेटः भीमः भीमसेनः भयंकरश्च, एताभ्यां युधिष्ठिरापेक्षयाव्यतिरेकः । गृहीततारः गृहीता तारा हरिश्चन्द्रस्यजाया भगवती च येन सः, एतेन तदपेक्षयाव्यतिरेकः । सत्यव्रत इवि एतेन भीष्मापेक्षयाव्यतिरेकः ।

प्रवीरो मङ्गलकरः, परसमाधिसहिष्णुः जिष्णुः । अक्रूरः गोकुलानन्दनः । चन्द्रकान्तः सुकुमारः । सूरतः शूरतरः उपायप्रयोगकुशलः, द्विपददलितदलः, कृतलक्षणः, नवपेशलक्षणप्रदर्शनः, विचक्षणप्रतीक्ष्यः, रक्षणमखदीक्षितः स्वच्छयाशयावलक्षः उदारदयेक्षितप्रजः कुलपर्यायप्राज्ञः, रसाभिज्ञः विहितबहुयज्ञः । सप्रतीकश्रुति स्मृतितन्त्रसन्ततिस्वतन्त्रेण, यजनजपनहवनध्यान प्रधानधर्मानुष्ठानपरम्परापरायणेन, अनुदिनं वदन

समुद्रयेनहितानि कथयता पृथिवीनाथंप्रथयमानेन, राजानुरागरोहितेन, पुरोहितेन,, धर्मागमगहनसञ्चार-पञ्चाननेन, सदभिजनजननयातेन, शीतलतरशील-शालिना, सुकृतसचिवेन,, सदगारधारकैः स्तम्भैरिव सारसङ्कृतैः, अवृजिनवृत्तिभिः प्रवृद्धैः, असद्व्यसन-महापवनेनाप्यनवधीरितधीरभावैश्च; परार्थानुमानैरिव न्यायानुयायिभिः, शक्तिसाधकैरिव संवृतमन्त्रैः, साधु-साधनैरिव विपक्षाननुबन्धिभिः, कविप्रवरैरिव रहसि पदानि चिन्तयानैः, महामुनिवनैरिवालुब्धैः, गणितनिपुणैरिव देशकालकोविदैः, नीतिविशारदैः, प्रतिभातिविशदैः, प्रगल्भैः, समज्यारञ्जनैः, मन्त्रिजनैः,, दाशैरिव भुवनाशयशयितग्राहकैः, योगिपटलैरिवास्पृष्टव्यसनैः, रतिस्थायिभावैरिव शुचिताञ्चितैः, क्षोणीश्वरैरिव क्षमारक्षकैः त्रिदशा-स्थानकैरिव स्फुरितधिषणैः, यथाभिहितभाषणैः, तृष्ण याऽक्रुष्णैः क्रोधानवधूतैः, दूतैः,,

प्रवीरेति, एतेन यमापेक्षयाव्यतिरेकः। जिष्णुः जयनशीलः इन्द्रश्च, एतेनेन्द्रापेक्षयाव्यतिरेकः । अक्रूरेति, एतेनाक्रूरापेक्षया व्यतिरेकः । चन्द्रकान्तः इन्दुसुन्दरः चन्द्रकान्तशिलाच, एतेनोक्तशिलापेक्षयाव्यति-रेकः। सूरतः दयालुः शूराद्या उपायेति, सामदानादीत्यर्थः । कृतलक्षणः गुणैः प्रतीतः। पेशलः चारुः। पर्यायः क्रमः। प्रतीकः अङ्गम्। सारं न्याय्यं

वेषैः, प्रखरनखखुरोत्खातखर्वीकृतोर्वीधरशेषानिश्शेष समुत्फुल्लफणैः, विस्मापितानिमेषलेखगणैः, समर-प्रकरचतुरै स्तुरङ्गैः, अवितथाचटुलचाटुसंलापपटुता मुपगतैः, प्रभावमेऽव्यभाव भाजनैः, लोभानभिभूत-हृदयैः, गहनगरुगणितविज्ञानगेहैः भाण्डागारिकैः, प्रभोर्भालनिभालकै स्थलालाटिकैः, भक्ति-वारिभरितैः, भृत्यैः, रभिराजितः । गिरिराजनन्दिनी पदारविन्दमकरन्दमिलिन्दमानसः, विस्रम्भभूमिः सार्वभौमस्य, घनसमयो जनवनसमवनस्य, पुरो-गतः कारुणिकानाम्, अवलम्बश्शूरतालतानाम् आधारदण्डः सुकृतवैजयन्तिकानाम्, प्रालेयशिलो-च्चयोऽनेकविवेकमहाभेषजानाम्, कुलक्षपनदोदीनता-द्रुमाणाम्, सन्तानपादपोऽर्थिसन्तानानाम्, तपस्सि-द्धिर्भारतीयानाम्, लक्ष्मीश्वरसिंहोबभूव ॥ योगुरुरिति कथकैः, उदयनइतिनास्तिकैः, प्रभाकरइतिदोषोत्करैः, दवइतिवृजिनिवंशैः, नासत्यमूर्तिरितियोषितैः कलशा-न्तइतिसपाज्ञैः, रामइति प्रजापुञ्जैः, चिन्तामणिरिति मार्गणैः, स्मृतः ।

कार्यकारैः, हणिभिः, [illegible] । [illegible] । वैवस्वतो यमः । [illegible] । [illegible]

वरिगतं धाराभिधानो गतिविशेषः । अर्वः कुत्सितः, अर्वन् अश्वः, अव-स्यायशार्वरैः अभिमानतमोभिः । हेषा शब्दभेदः । विस्मापितेत्यनिमेष-त्वोपपादकम् । भावोभक्तिः, गहनं कठिनम् । निभालकैः द्रष्टृभिः, अका-लटिकैः प्रभोर्भालादर्शिभिः अकार्याक्षमैश्च । जनवनं जनानां समूहएववनं विपिनम् । सन्तानतरुः कल्पवृक्षः । गुरुः वाचस्पतिः, उदयनः उदय-नाचार्यः, दोषोत्करैः दोषाणा मुत्करस्समुदायएव दोषाणां रात्रीणामुत्क-रस्तैः । दवोवनाग्निः, वृजिनिवंशैः वृजिनिनां पापिनांवंशः कुलमेव वंशो वेणुस्तैः । कल्पान्तः प्रलयः, उल्लेखालङ्कारः ॥

यो गौरवेणावर्णनचकाञ्चनाचलमप्यधश्चकार । यश्शा-त्रवायशोऽन्धमसप्रबन्धविध्वंसितधर्मानुसन्धानजगति जगतीमातन्यमानोऽप्यस्तुयतएव धार्मिकैः । यः सकलकाश्यपीश कमनीय कीर्ति कन्यकयासाकं क्रिय-माणेपरिणयेऽपिप्रायनिजस्थापितप्रोज्ज्वलत्प्रतापपावकं परिपान्थिना यशोलाजैः । विनाशितवैरिजीवनो ऽपियः पृषतमपि निरागितुं नापारयदेतदीयनारीनयन नलिननिस्सरन्नीगनिर्झरान् । यंच नगरमयमानमीप दपि निशमयन्त्येव काचिद्विलोकयितुकामा निष्का-म्यन्ती निकेतनात्कनकलं विकलितमपि कनक-काञ्चीगुणं नाकलयत् । इतराच मज्जनजवत्रुटितामपि मौक्तिकावलीं नालोचयत् । अपगत्य केशपाशानिपतित प्रसूनपटलैः पृथिवीमप्रजयत् । अन्या च विनिवृत्ता-

चरणवसनवक्षोजगिरीशसाक्षात्कारेणतरुणाननतिशय-मनायासमानन्दमविन्दयत । पराचाधिप्रसाधनविधि-विधीयमानार्धविशेषकेव पथिपश्यतां प्रतिपादयन्ती प्रत्यक्षकौतूहलानि तिलकानवसितिंनाचिन्तयत् । किंबहुना, कदाचिद्गाढमालिङ्ग्यपरिचुम्ब्यमानाधर-किसलया सहेसा निरस्यैव स्वामिदृढबाहुयुगनिगड-निविडबन्धनं केलिकेतनान्निरगात् । यमोजसाऽ-धिकमवधायातिगाढग्लानिग्लपनगोचरीकृतोवाडवा-ग्निरन्तकामनाश्रितोदन्वदन्तस्सुधावाधितचेताअपि-नितान्तत्रपाभिर्निष्क्रमितुमनीहमानो जीवनकाल-जालं यापयत्यद्यापि । निमीलितेऽपिनयनकमलेक-मलोल्लासकारकं यमालोकयन् लोकाः । येनरुषा विषयीकृतानांद्विषतां नावनीवनीचमप्रत्यपादयतां लेशमपि विश्रमस्य । येनसकृदपि सम्भाषिता सुकृ-तसारसन्दोहशालिनंरत्नमसंशयंभाषयन्तिसकलाः ।

क्षात्रवेत्यादि, व्याजस्तुतिः, गतिम्अग्निहोत्रादिक्रियाम् । पिप्राय प्रीणातिस्म । जीवनोपीति, विनाश्रितं–वैरिणो, जीवनमेवजीवनंजलंयेन-सइत्यर्थः । गिरीशः गिरिराज शिवश्च, अनायास मित्यनेन मोक्षानन्दापे-क्षया व्यतिरेकोबोध्यते । अनवसितिम् असमाप्तिम्, अन्तकामना मरणेच्छा, बाधितचेताइति मरणाभावादित्याशयः । आलोकयन्निति, कमले निमी-लिते कमलोल्लासकारकस्यरवेरदर्शनाद्विरोधाभासेन सकललोकहृदयव-

तित्वं व्यज्यते । मत्यपादयतामिति, तथाच विरुद्धावपितदनुवर्तनार्थमेक-कार्यं कुरुत इतिध्वन्यते । साधयन्ति, अनुमिन्वन्ति नचासंशयपदंनि-ष्फलं, रत्नकोशकारेणानुमितेरपिसंशयत्वस्याभ्युपेतत्वादिति सत्प्रतिपक्ष-दीधितौ स्पष्टम् ॥

यस्मै सकलान्तरीपवर्तिनाममानसम्मानभारभागिने-स्पृहयन्त्यशेषभूमीभुजः । यस्मादधिकद्वयकलसप्त-तिकलाकुशलताकलितकीर्तेः कृत्वा निकारं कलप-ञ्छुचोलाञ्छनच्छलेन श्यामलिमानंदधानश्शशधरः प्रसाधयत्यद्युनापि षोडशकलोहरिपदंकरामृतैः । लक्ष्मीश्वरं वीक्षितुमिवविच्छातेन कासारकैतवात्प्रका-शतेसरस्वतासोरसालयेवहृदयस्थितपुरुषोत्तमा, दृश्य-रत्नभूता, मदोत्कटकटघटितकरटिघटाभिघटिता,कनक कान्तिकनिता, दर्शितदुर्गतोदारदरभंगा, दरभंगा-भिधाना यस्य प्रधानराजधानी । यस्य न वासवस्येव दुस्सहपरतपस्यानि शीलानि, नवा गाण्डीविमण्डल-स्येवच्छललांछितानि चरितानि । यस्य कीर्तिरेव सकल कालमालोककारिका, आचाररक्षणं क्षणदासु प्रदीप-न्यासः, विद्याव्रततिकुसुमामोद एव घ्राणसन्तर्पणः, सुधर्मैकफलानि वकुलकमलकेसरकुलानि, एक विक्रम एव परमस्सहायः, राजश्रीविचेष्टितमनुचरप्रपञ्चः, तारिणीगुणगानग्रहणमेवश्रवणालङ्कारः, भारभूते

विविधमणिकिर्मीरिते कुण्डले, निपतिताः कामिनीनां मेचकच्छटाः कटाक्षाएव विकचकुवलयवलयविरचिता मालिका गुणवदनुरागितांनुमापनं मरकतमणिमाल्य-परिधानम् । सदुपभोगेलिमापरिमितरत्नरमणीयता-मवसाययस्मिन्नसोढशोकस्यदक्षोभतस्सापस्मारइवे-दानीमपि विजृम्भतेऽम्भोनिधिः । यत्रच धरित्रीशा-सनाधायके राजविरोधिताध्वान्तेषु, सद्वृत्तमुक्तता हारेषु, भोगिविद्वेषः शिखावलेषु, न लोकेषु । उत्तर-लतावादेषु, कुटिलता तरुणीविलोकनेषु, भक्तिभङ्गो विलासिनीकपोलेषु, नस्वान्तेषु । सीमाविवादःशास्त्री यकल्पनेषु नक्षेत्रेषु । शब्दानुशासनेऽपवादः, माध्य मिकदर्शनेशून्यवादः,न्याये प्रतिज्ञाहानिः,समासेविग्रह विचारः, किञ्चावसरिकवृष्टिसृष्टिकारितावारिधरेषु, सामायिकाविपुलशालिशालिता केदारेषु, सम्भृतप्रसव ता पादपेषु पूर्णकामता प्रजास्वासन् ॥ क्षितिभृत्पक्ष विच्छेदनाय पावेयपरमाणुभिरिवोदपादयद्यदीयदृढ-विग्रहं वेधाः । यदवलोकनकालविगलितवीटिकानीवि बन्धना युवतयोऽभुवन् । चिराय माधवंसाधयन्नपि ना प्यत्वेऽपि दधातिसहस्रदीधितिर्यदीयप्रतापतुलनाम् ॥ ॥

अन्तरीपं द्वीपः । निकारं परिभवम् । हरिपदमाकाशं विष्णोश्चरण-ञ्च । करामृतैः करजलैः किरणरूपैरमृतैश्च । विच्छातेनायातेन हृदयं

तित्वं व्यज्यते । मत्यपादयतामिति, तथाच विरुद्धावपितदनुवर्तनार्थमेक-कार्यं कुरुत इतिध्वन्यते । साधयन्ति, अनुमिन्वन्ति नचासंशयपदंनि-ष्फलं, रत्नकोशकारेणानुमितेरपिसंशयत्वस्याभ्युपेतत्वादिति मत्मतिप्र-दीधितौ स्पष्टम् ॥

यस्मै सकलान्तरीपवर्तिनाममानसम्मानभारभागिने-स्पृहयन्त्यशेषभूमीभुजः । यस्मादधिकद्वयक्लृप्तसप्त-तिकलाकुशलताकलितकीर्तेः कुत्सा निकारं कलय-ञ्छुचोलाञ्छनच्छलेन श्यामलिमानंदधानश्शशधरः प्रसाधयत्यद्युनापि षोडशकलोहरिपदंकरामृतैः । लक्ष्मीश्वरं वीक्षितुमिवविच्छातेन कासारकैतवात्प्रका-शतेसरस्वतासोरसालयेवहृदयस्थितपुरुषोत्तमा, दृश्य-रतभुता, मदोत्कटकटघटितकरटिघटाभिहटिता,कनक कान्तिकनिता, दर्शितदुर्गतोदारदरभंगा, दरभंगा-भिधाना यस्य प्रधानराजधानी । यस्य न वासवस्येव दुस्सहपरतपस्यानि शीलानि, नवा गाण्डीविमण्डल-स्येवच्छललांछितानि चरितानि । यस्य कीर्तिरेव सकल कालमालोककारिका, आचाररक्षणं क्षणदासु प्रदीप-न्यासः, विद्याव्रततिकुसुमामोद एव प्राणसन्तर्पणः, सुषमैकफलानि वकुलकमलकेसरकुलानि, एक विक्रम एव परमस्सहायः, राजश्रीविचेष्टितमनुचरप्रपञ्चः, तारिणीगुणगानग्रहणमेवश्रवणालङ्कारः, भारभूते

विविधमणिकिर्मीरिते कुण्डले, निपतिताः कामिनीनां मेचकच्छटाः कटाक्षाएव विकचकुवलयवलयविरचिता मालिका गुणवदनुरागितांनुमापनं मरकतमणिमाल्यपरिधानम्। सदुपभोगेलिप्सापरिमितरत्नरमणीयता-मवसाययस्मिन्नसोढशोकस्यदक्षोभतस्सापस्मारइवे-दानीमपि विजृम्भतेऽम्भोनिधिः। यत्रत्र धरित्रीशासनाधायके राजविरोधिताध्वान्तेषु, सद्वृत्तमुक्ताहारेषु, भोगिविद्वेषः शिखावलेषु, न लोकेषु। उत्तरलतावादेषु, कुटिलता तरुणीविलोकनेषु, भक्तिभङ्गो विलासिनीकपोलेषु, नस्वान्तेषु। सीमाविवादःशास्त्रीयकल्पनेषु नक्षेत्रेषु। शब्दानुशासनेऽपवादः, माध्यमिकदर्शनेशून्यवादः,न्याये प्रतिज्ञाहानिः,समासेविग्रह विचारः, किञ्चावसरिकवृष्टिसृष्टिकारितावारिधरेषु, सामायिकविपुलशालिशालिता केदारेषु, सम्भृतप्रसवता पादपेषु पूर्णकामता प्रजास्वासन्॥ क्षितिभृत्पक्षविच्छेदनाय पावेयपरमाणुभिरिवोदपादयद्यदीयदृढविग्रहं वेधाः। यदवलोकनकालविगलितवीटिकानीविबन्धना युवतयोऽभूवन्। चिराय माधवंसाधयन्नपि नाद्यत्वेऽपि दधातिसहस्रदीधितिर्यदीयप्रतापतुलनाम्॥॥

अन्तरीपं द्वीपः। निकारं परिभवम्। हरिपदमाकाशं विष्णोश्चरणञ्च। करामृतैः करजलैः किरणरूपैरमृतैश्च। विच्छातेनायातेन हृदयं

मध्यदेशोपनश्च । पुरुषोत्तमः पुरुषेषु उत्तमः हरिश्च । कविता ... दम्भङ्गोपीतिनाशः । गुणवत् माल्यं गुणीच । स्यदोवेगः । राजा च भूपश्च । सद्वृत्तमुक्ता समीचीनवर्तुलमौक्तिकता समीचीना ... ताच । भोगी सर्पः भोक्ताच । शिखावलो मयूरः । उत्तरलता ... परम्परा चाञ्चल्यञ्च । भक्तिः रचनाविशेषो देवादिविषयिणी रतिश्च शून्यवादः विषयविषयिणोरसत्त्ववादः अर्थशून्यमभिधानं च । प्रति हानिः प्रथमं निग्रहस्थानं, प्रतिश्रुतेर्हानिश्च । विग्रहः समा... प्रति ... वाक्यविशेषः रणश्च' क्षितिभृत् राजा पर्वतश्च, पक्षः सुहृत् ... पार्थिवपरमाणुभिः वज्रारम्भकपरमाणुभिः, वीटिका कञ्चुकी, नारायणं वैशाखमासंच ॥ * ॥

यस्यानुजो हरइव परमदनाशनः, केशव इव क्रमोपचितकीर्त्तिकायः, भार्गवइव सदाराधितशङ्करचरणाङ्कजः, दासरथिरिव विदेहजानन्दनः, धर्मइवकृष्णालङ्कृतालयः, सरस्वानिव शिशुमारमनोरमः, सरोजन्मस्तोमइव भ्रमरहितः, उपवनप्रदेशइव तिलकालितप्रियालपनसप्रमोदः प्रलयप्रभञ्जनइव धरणिधर प्रकरकम्पकारकः, कासारसारइव सप्रसादानिमिष विसरः, ब्रह्मविवदिषइव विजितविषयोपायचतुष्टयोपेतः, ज्योतिषनिबन्धइव विवस्वन्मङ्गलविकाशकः, जैमिनिमुनिरिव शक्तित्रयसाधकः, गोविन्दविग्रहइव गुणाक्रान्तकुवलयः, संयमितचेताइव संजातानेकसिद्धिः, गगनाभोगइव षड्गुणागारतामुपगतः, हिम-

नगयइव दशधान्योपकारकः, मखमण्डपइव सर्वतोभद्रभासितः, चन्दनाचलइव चक्रिचित्तचोरः, वैदेहप्रदेशइव सफलसदनः, अन्तर्मातृकान्यासइव सन्मूलमणिपूराधिष्ठानानाहतविशुद्धाज्ञा चक्रचञ्चितः, हरिहृदयस्थलइव वहलसस्मेरकाश्मीरजन्गासेवितः, नन्दननन्दितोऽप्यपारिजातः, विवर्धितवाणविग्रहोऽपि विश्वकेतुः धनदोऽपि सुन्दरकलेवरः, स्थिरास्थितोऽपि सुधर्माधिपः, गुणाकृष्टभुवनोऽपि पद्माकरः, मन्दारातिरप्यविरोचनः, अस्तमितसमस्तेतिहासोऽपि सम्मानितसकलेतिहासः, निस्सपत्नोऽप्यधिकारितामवाप्तोऽभ्युदयकृत्येषु, चरणानाहतद्विजमण्डलोऽविप्रथमकीर्तनीयसुकृतिनां कलापेषु, काञ्चीपरिवीक्षणाक्षिप्तदामाक्षीकोऽप्यक्षाणिरेवाक्षिणाम्, घनधूमधाराध्वस्तातपोऽपि सुरभिः, कृष्णपक्षप्रियोऽपि कलाकरः, शूरोऽपि शुचिरुचिः अचलोदितोऽपिवुधः, गुरुरपिकविः, कालीदासोऽविगुणाढ्यः, शातवाहनोऽपिगोवर्धनः, वर्धमानोऽपि पार्थसारथिः, सिंहसंहननः, सहनः, धन्यः, राजन्य मान्यः, वर्णि वर्ण्यः, धरणिपाग्रगण्यः, सत्क्रियाकुलीनः, विश्वजनीनः, सुकलः शुक्लकलः, कूकुदः, कलितककुदः, सफल प्रस्तावकः, अनन्तसंस्तावकः, परिगोपितान्धमूकः, दशाध्वरदहन-

दग्धादप्रदेशितध्रुदाकदलदोर्घशूकः, स्थूलस्कधः सुक्ष्मेक्षणः, चोभिनविपक्षः, विक्रमविलसाक्रनाश्रिनिपलक्षः स्वशाश्रितः वलक्षाशयः, अममसमज्ञः व्यक्त्य विशेपज्ञः, कृतज्ञः, प्रथमपोतलदिनप्रवृत्तिपोतसंज्ञः,

परोऽन्यो रिपुश्च, मदोगर्वोदर्पश्च, अन्यत्रमदनेतिच्छेदः । विदेहजो मैथिलः, विदेहजा सीता च । कृष्णः वासुदेवः कृष्णा द्रौपदी च । शिशुमारः स्मरोपमोवालः, जलजन्तुविशेषश्च । भ्रमोऽन्यत्रभ्रमर इति । हितस्तत्कारकः अतएवपुंस्त्वम् । मियाळपनं परत्र मियाळपनमौ योज्यौ । अनिमिषोदेवो मीनश्च । विपयोदेशः रूपादिश्च, उपाधस्तेना शमादिसम्पत्तिश्च । विवस्वान् पण्डितः सूर्यश्च । शक्तित्रयं कालयादि आधेयशक्त्यादि च । कुवलयेति पृथ्वी मण्डलंनीलकमलंच । सिद्धिः प्रभुमन्त्रोत्साहाख्या मनोजवित्वादिश्च । गगनाभोगोविस्तृतं गगनम् । पड्गुणाः सन्ध्यादि संख्यादि च । चक्रीहरिस्सर्पस्सार्वभौमश्च । नवनं यागः परत्रफलसानां द्रुमविशेषाणांवनमिति । आधिष्ठानेतिच्छेदः चक्रं समूहः, मूलेत्यादि आज्ञान्तानि कमलदलानि शरीरान्तःस्थितानि तत्तन्नामधेयानि चक्राणि । काश्मीरजन्मेति काश्मीर जातः कुङ्कुमं च । नन्दनेति इन्द्रोद्यानं हर्षकारितनयश्च । अपेति परिहारे च्छेदः । विश्वकेतुः प्रद्युम्नः, जगत्पताकः जगत्पताका च । स्थिरापृथ्वी स्थिरोमुक्तिः जीवन्मुक्तिरितियावत् । भुवनं जलं जगच्च । मन्दश्शनिर्भाग्य रहितश्च विरोचनः सूर्यः कान्तिशून्यश्च । ईतेर्हासः इतिहासश्च क्रमेण वोध्यः । अधिकेतिभङ्गः । द्विजोविप्रश्चन्द्रश्च । काञ्ची रसना तदभिधा नगरीच । आक्षिप्ता गृहीता दृष्टाच, वामाक्षी वामलोचना देवीच । अक्षि पापम् , सुरभिः वसन्तः मनोज्ञश्च । कृष्णपक्षःश्यामकदलं वासुदेवभक्तश्च

शूरस्सूर्यो वीरश्च शुचिरुचिरिन्दुः, शुचीतिशुक्ल पवित्रयो, रुचीति कान्तिलिप्सयोर्बोधकं च। अचलोदितः कुजःस्थिरबुद्धिमांश्च । शातेति भङ्गः सुखार्थकः, वर्धमानः तदभिधानः दार्शनिक पण्डितः वृद्धिमाप्नुवानश्च, पार्थ सारथिः तन्नामा मीमांसकेशः मकने समर्थसारथिकः । सुकलोदाता भोक्ता च, ककुदं प्राधान्यं राजलाञ्छनं च, अनन्तोहरिरपरिमितश्च ।

नगनायकतनयाचरणमरालमिलितमानसः, देशकदम्बकप्रविदितोदारतोद्रिक्त दानोदकनदी दूरीकृतदृढदीर्घ दैन्यद्रुमः, द्रविणप्रादेशनामोदित द्विजन्मदम्पति समुदय हृदयदिश्यमानसमुदयः, सत्तमाशनासनकौशेयांशुक मुकुरमसृणमांसलमरकतकमलरागमणिमौक्तिकप्रवालहारकार्त्तस्वरश्वेतालङ्कारप्रकार परिपूजितकुमारिकानिकरः, अवलम्बो ब्रह्मवर्चसानाम्, निधानं सुजनतासुधानाम्, वीजं सुकृतशाखिनाम्, निदाघवासरो वैरिजीवनानाम्, उच्छ्वसितं भारतोत्साहानाम्, कुलरिपुः पाषण्डानाम्, अग्रणीरन्तर्वाणिकानाम्, पुण्यपरिणतिः, प्राणिपटलानाम्, खण्डवलाकुलाकूपारकौस्तुभमणिः, अभिघातिगहनाशुशुक्षणिः क्षोणीपतिः श्रीमान् रमेश्वर सिंहः ।

मानसं मनस्सरोविशेषश्च । जीवनंप्राणनंजलंच । अन्तर्वाणिकाःशास्त्रवित्

यो नवयौवनावतारे पुण्यपदावलोकनकुतूहला-
कुलितहृदयो भूयो भुविभ्रमणेन सैकतक्षोदरुचिरदक्षो-
दधिरोधः प्रसाधिकामारभ्य कुमारिकामामालेयालय
शिलोच्चयमाननीलाचलाम्बचण्डिकाचरणचंचितायावद्
द्वारकां विद्यमानेन पवित्रयांचकार कलेवरं तीर्थ
जातेन । गगनगोचरीकृतार्णवाभ्यर्णगोकर्ण स्तीर्ण-
सागरो गोत्राण्यपि जगतीसागरादुदतारयत् । यो
दिवसनिशेविभज्यकृत्यजाय सायामयामास्वपि त्रि-
यामासु घटिका त्रितयमेवानुकम्पते स्वापेन । यः
परिपन्थिपराभूति भीत्येवचोरगीनकार राजलक्ष्मीम् ।
यः स्नोकृतोऽपि पुण्यप्रतीपपतितान् श्रेयसोऽपि
नियमयति । यो वसुधासुशासन विशारदताप्रसा-
दिता दरभङ्गप्रान्तीयराजमहाराजमहाशानमहाराजा-
धिराजपदवीं प्रथमापन्नपरम्पराप्राप्तिकामुपार्जितवान् ।
यो द्वैपायनदेशनादर्शितसन्निधानैर्गोपालनागकुल-
यादवाभिरक्षण मान्त्रिकमन्त्रणां पुण्यनागकाणां कालिना-
[illegible] सुप्रभापरिजनवासैः पुष्यन् सनिर्झरमाणसप-
[illegible] कृतमुक्त [illegible] । [illegible]
[illegible] [illegible]
[illegible] [illegible]
[illegible] [illegible]

वाचकतोचितमभिमानं विपश्चितां निचयस्य । यो होमस्तोमकोटिपटितकोटिप्रमित स्वतन्त्र मन्त्रणा नियन्त्रणाहितसावित्रीमन्त्रहोमापरिमितश्यामामनुज पनविगलितकलिमलामतिमेध्यतयाऽऽमोदिनीं मिथिलामेदिनी मतनोत् ।

विबुधधुनीस्रोतः प्रतिरोधकमधरीकृतधराधरं नीहारमहीध्रसविधवर्तिनं ह्रादिनीहृदैर्हषद्भिराबद्धं जगदनुद्धारहेतुं सेतुमेदंविच्छेदयत्नापादितप्रसन्नतालताप्रतानविततातिविनताशेषजनताकृतार्पणा कर्मधर्मरत्ना-करोपाधिमधिदधानोविस्मृतिपथपथिकं यः प्रथित कथभगीरथमकरोत् । यस्सहपूर्वाविर्भवान्ववायैः प्रोदञ्चत्प्राच्याचलपदे प्रतिष्ठापयांबभूव शोभनं भवनं भुवनेशीपदाम्भोरुहाणाम् । योऽगचितपुण्यपादपेषु पदेषु पीडां साधारणतरेणाऽपि नरेणसोढुमशक्यामीष दप्यविगणय्य सत्स्वप्यनवार्यैराजकीयकार्यवर्येषु माध्वीकाधिक माधुरिका दधूतवाग्मिधौरय व्यलीक विख्यातव्याख्यानतः किल्बिषाभिनद्धबुद्धिसामान्यसमुद्धारबद्धप्रतिज्ञोविशुद्धतमामाधाय श्रद्धालुनांमद्ध-र्मवर्धनेन समस्ताराद्धचरणसरोरुहो विजयते जनपदेषु सकलेषु । मिथिलामगधाङ्गकामरूपपाञ्चालादिदेश संहतौ निष्पादिते सकललोकलोचनालाने निलयनि-

करे प्रतिष्ठापितदेवतोऽपि यस्ततो लेशतोऽपि तोषं मनागप्यलभमानस्सावयतिसाधुसौधं सुधाशिनां शिल्पिसारैः। जीर्णोद्धरणकामनया च मृगयते पुरातनं केतनं तेषाम् ।

नियमयतिदण्डयति । द्वैपायनदेशना मीनपुराणम्, दलेनेत्यत्रोपलक्षणेतृतीया । कोटिरग्रम्, कोटिः संख्या । प्राच्याचेलपदं नीलाचलः पुरातनाव्ययपदं मोक्षइतियावत् । सावयति निर्मापयति, सुधाशिनां देवानाम्, सारैः श्रेष्ठैः ।

विलुप्यमानातिसनातनसुकृतवनावनाय प्रयतमाना भारतधर्ममहामण्डलाभिधाना महासमिति र्यमेव पतितयाऽवृणोत्सत्यपि सुवेशविशदवसुराशिराजितेऽपि राजके । यमतिशयेन शाम्भवनगरस्थस्य विश्वविद्यालयारम्भमूलस्तम्भभूतं सम्भावयन्ति विश्ववासिनः। मन्त्रन्यासभीता नोपसर्पितुं प्रभवन्ति यं परभुजङ्गमाः । यमेवचोपजीवति परिणये शास्त्रविषये च भवन्ती जातिमीमांसा । यमालोक्यास्तोकसतोकस्थविरलोकोदीरितैः जयजय महाराजाधिराजेत्यालोकारावकोलाहलैरनवकाशतामासादयत्याकाशम् । वासरावसाने विहरणायवहिरारहितमाकर्णयन्तएवपरिहृतस्वकृत्या श्शृङ्गाटके यमभिवीक्षितुमितस्ततोनिक्षिप्तचक्षुषो मिलन्तिजनास्तत्र तत्र नगरेषु । चातकवदा

चरितानिच प्रासादवलभी विभूषयन्तीनां भवन्ति वदनानिकामिनीनाम्, कुवलयमयानिचायनान्तिक-निलयवातायनानि लसन्तिसुन्दरीनयनैः । येन प्रकृतिभावं प्रापिताअपि नैवसन्निवविधुराः । येन समुदायशातितशरीराअपि शात्रवसमुदायाश्शूरमण्डल भेदिनो वभूवुः । येन सप्तधाऽधुनावधि श्राद्धमधि गयमाविधाय पितॄननीयतातुलातृप्तिः, येन भूयसा निशासु साक्षात्क्रियन्ते परमप्रीतिपद्धतौ सपासीना-आशीराशिविश्राणनपरायणाअङ्गणागताः पितृ-गणास्स्वप्नेपु । येनानेकत्रकल्पिताश्चिकित्सालयोविद्यालयोब्रह्मचर्याश्रमश्च मानवानुपकरोति नितराम् । यस्मैगुणश्रवणसाक्षात्करण प्रवणान्तः करणेन वितीर्णा सार्वभौमेन जी. सी. आइ. ई. के. सी. ई. इतीयमूर्वीपति दुरासदार्थगुर्वी वहुमानं प्रमापयन्ती पदवी प्रमोदतेऽतितराम् । प्रणीनश्रोत्रियपरिणयसिद्धा-न्तरीति सन्निवन्धाय यस्मै व्याहृतानि श्रोत्रियसन्ततीनां वितरन्ति शंततं सततम् । यतः कथा प्रसङ्ग-सङ्गतममङ्गलाभिषङ्गकरं पुराणकदम्बकोदन्तमाकर्ण्य कौतुकादेव पौराणिक धुरीणतामुपगतास्तत्रसवे शासिनः । क्रतुशतविहापितस्वापते यस्य यस्यद्रविण-हीनतां व्रजन्ति प्रत्यर्थिनः । यस्य शासनेनसमन्ततः

त कुम्भानिकुरम्बावृत नभागतलजाम्बर कुण्डप्रकाण्ड-मण्डलीप्लुष्यमाणेन्धनोद्गच्छदश्यामलच्छविधारिधूम-धाराध्वान्तसंजातधवलधामयशस्सुधानिधि रनारतं समुल्लासयति भुवनोदराणि । यत्समरसमज्ञां सपत्ना अपिनापह्नुवते किं पुनस्सुहृदः ॥

मन्त्रो विचारो मतश्च । आलोक्कारावो जयशब्दः । आरहित मागतम् । प्रकृतिभावः सविवत्वं व्याकरणे प्रसिद्धः सन्धिविरोधी । समुदायो युद्धम्, शूरमण्डलं वीरसमूहः सूर्यमण्डलं च युद्धे मृतस्य सूर्यमण्डलपथेन गमनं भवतीत्याशयः । अभिषङ्गः पराभवः । द्रविणेति धनपराक्रमयोर्बोधकम् महत्त्वादन्तु प्रभेदकल्याणयोः । क्षमापृथ्वी तितिक्षा च । जडता कृतजातालस्यजाता च । व्यभिचारिभावोऽपराङ्गनागमित्वं निर्वेदादयश्च । द्रवेति रात्रौरक्तयोर्वाचकम् । पारसवतःशूद्रायां विप्रवरपत्नाऽत्व-ताद । नीवीमूलधनमपि । नागपदेति गजचरणः सुरतासनविशेषश्च । संक्रन्दनेति रोदनकरोवासवश्च । काष्ठेति दारुदिशाच आम्नायमिति, अग्नेराणइति श्रुतिरित्यर्थः । स्वपःस्युतः स्वपन् अच्युतोपवतः स्वपदा-च्च्युतश्च । जलनिधिः अब्धिः नतिशयेनाद्य । कुम्भा गहनमावरणम् ॥

सचासौतयालक्ष्म्यापरमोदारगुणपरम्पराभिगलितो-लक्ष्मीश्वरसिंहः क्षोणीपरिवृढस्तातानुमतांतामुपयेमेऽनु-सरन् स्वकीयकुलक्रमादागतां व्यवस्थाम् । ततोऽति-मेदुरेण प्रणयेन पेव्यमानस्य प्रेयतः प्रेष्ठतां शर्मिष्ठेव ययातिभूपतेः प्रयातिस्म । अथ सास्मितसुधालपित-

मूर्तिरधरकिसलयाश्रिताकृशानुशिखामिव व्याहृतिभिश्श्रुतिमुददीदिपल्लक्ष्मीश्वरस्य । अभिनवप्रभासलिलप्रवाहमञ्जुला त्रिवलितरङ्गसङ्गता नाभिसमावर्तिता लोमावलिशैवला प्रतिभासिताङ्गुष्ठनखवदनानेकचन्द्रचक्रवाला लोचनवैसारिणविचेष्टिता व्याकोशशयकुशेशया तरङ्गिणीव रराज । क्षितिपलक्ष्मीश्वरवक्षसिस्थिता सरससुमनोरमणीया प्रौढगुणगुम्फिताप्रबोधितमन्मथा तरुणिमतरणि मोदिताशेषप्रतीका सुललितसन्निवेशा अभिसुरभितप्रदेशा आनन्दितालिमण्डला मालिकेव विललास । शुचिरसभरसम्भृता त्रिवलिसोपानशोभिता विलसदास्य सारसा प्रियलोचनशोलम्बावलम्बिता हंसक्वणितनीतरामणीयका सरसीव ममास । गुणग्रामगुम्फनाऽपि लक्ष्मीश्वरैकफलपादपालम्बिनी प्रियप्रणयवल्लरावलिप्लुविनाऽपि अपर्णाश्रिता, नववल्लरीव चकाश । दोषाकरेणादृश्याऽपि द्विजराजलोचनप्रमादिनी, श्रुतेरगोचराऽपि श्रुतिहृदयप्राप्तानन्दत्वा, मिथुनविपर्यीकृताचराऽपि 'पतिव्रता', सदेहत्वाऽपि देवानुरूपिता दिदेव । यशसा जगतीषु, ज्ञानमाधिपनिर्दर्शिनीषु, सकल्याणमनोनीपदाम्भोजेषु

१. [illegible]

दानेन द्विजातिहृदयेषु, अनुज्ञया परिचारिकासु एकाप्यनेकधाधृतविभागेव बभ्राज । तस्यास्सुरभिमासयुगं तदा पलमिव पलायतेस्म, प्रणतसतीचिकुरचञ्चरीकसञ्चयरुचिरंचिरं चरणाम्बुजं रुरुषे इति ॥

इति मैथिलश्रोत्रियश्रीबालकृष्णमिश्ररचिते
लक्ष्मीश्वरीचरिते पञ्चमोच्छ्वासः ॥

पेव्यमानस्य सेव्यमानस्य, व्याहृतिभिः वचनैः भूःस्वाहेत्यादिभिश्च । श्रयोदस्तः. सुमनः पुष्पं शोभनं मनश्च । गुणः सौन्दर्यादि दामच, आलयाः सख्याः अलेश्च मण्डलम् । शुचिरसः शृङ्गाररसः प्रीतिरिति यावत्, शुक्लजलं च । हंसकः पाद कटकः मरालश्च. समास रराज । अपर्णाश्रिता न पर्णाश्रिता पार्वतीमाश्रिताच दोषाकरेण चन्द्रेण द्विजराजश्चन्द्रः लक्ष्मीश्वरसिंहश्च, शुचिः सूर्योऽनलश्च, अधरोनीचः अधरौष्ठश्च, समेखला समेषाधो खला रसनान्विताच । युगं द्वयं कृतयुगादिच ।

इति पञ्चमोच्छ्वासटिप्पणी ।

अथ षष्ठोच्छ्वासः ।

साचैषाऽनश्वर शोचिषा यशसा शारदशशिजित्वरी श्रीलक्ष्मीश्वरी सौवर्णकलसोल्लसित सौरसरितसलिलैरनुमासं वसुमतीसुरेण समानायितैः कर्पूरपूरपेषितपाटीरपंकपृक्तैः प्रतिवासरं लेशतोऽपि स्नेहसामान्यमस्पृशन्ती स्नाति विधिदेशितैः प्रकारैः । तृणकतुलितां तनुमनुमन्यमाना पुजनजपध्यानदानाद्वैतवेदान्तविद्यानिपुणपुण्याचरणवणजरत्पूर्णपौराणिक श्राव्यमाणपुराणाकर्णनैः, क्वचनदिवसे पायसेन पानेन क्वचनचफलमूलाशनेन, कुहच नरजन्या क्षदभ्रदर्भगर्भायां, कुहचनच कुरंगचर्मनिर्मितायां शयनेन शय्यायामतितिवाहयति दिवानिशम् । नह्विवर्ततेव्रतमुपोषणोचितं किमपि, यदनया नसम्भावितं तेन, मध्यमाङ्गुलिचरमलेखा मेषा नाममात्रशेषतामापिपतजपनीय कुशमूलादिमालिकाऽवर्तनैः ।–यस्यानयने कान्तिविलोकने, श्रवणे कथाश्रवणे, वदनं गुणकीर्तने, रसनं पदसारसरसस्वादने, मानसमनुचिन्तने, करौ परिचरणे, चरणौ प्रदक्षिणे, धनमुद्धवसं विधाने, नारायणस्य परायणान्यासते । या शिविप्रकृतिरिव सदासदया, सन्ध्येव वन्दनीया, कादम्बिनीव समावि-

स्फुरत शतह्रदा, स्वर्णदीव स्वर्णदायिनी, प्रावृडिव दानोदकार्द्रा, परशुरामसंसिद्धिरिव परस्वधवल प्रमुदिता, अदितिरिव (नागनगरीव) अनन्तास्तिकाञ्चिता, अशीष्टकम्बलावस्थितिश्च, विष्टपसृष्टिरिव सत्यकाधिष्ठिता, सौदामिनीवकन्दाश्रया, आयुर्वेदविद्येव विज्ञातगिरिजागतगुणा, मधुसूदनशेमुषीव जीर्णोद्धारविधायिका । काननइव शालग्रामश्याम लेमन्दिरे चिरेणावासमातन्वाना, मुनिभूमिरिव सरलब्राह्मणीसेविता, विश्वोपासिताच, समीरसखशिखेवोदर्चिष्मती, कुलशैलसंहतिरिव सुस्थिरस्थितिः, आन्विक्षिकीवरक्षितानेकजातिः किन्त्वदृष्टदृष्टान्ता, वैशेषिक (काणाद) शिक्षेव सविशेषगुणा किन्तुद्वेषकलुषाभ्या मदूषिता, समीक्ष्येव सत्प्रकृतिमहत्तत्वविमर्शिनी सत्कार्यसाधनीच, किन्त्वनभिमाना तमसानासादिताच, योगानुशिष्टिरिव निर्विकल्पनियमविशिष्टा, किन्तु क्लिष्टवृत्तिपटलास्पृष्टा, मीमांसेव स्वतः प्रामाण्य माश्रिता महामनाश्च, किन्तु श्रुतिसबल वाक्या आर्थभावनाशून्या स्वप्नेऽपि शबरेणागृहीताच, वेदान्तवागिव विवर्तमानविश्वा, किन्तु श्रुति मायावादरहिता । व्याकृतिरिव वर्णसाधुताव्यापृतप्रक्रिया, प्रत्याहारसहिताच, किन्तु गुणवृद्धिवाधाविधुरा,

साहित्यविद्येव सद्रीत्यनुकूल समासोक्तिसारदीपको-
दात्त समविशेषगुणसमुच्चया, किन्तु प्रतीपव्याजोक्ति-
पतत्प्रकर्षतामतपरार्थताभिरघटिता । दण्डकानास्थि-
ताप्यनसूया, स्पृहणीयविवेकपूर्णाऽपि समीकृतनैकव-
र्णा, वामाऽपिदक्षिणा, विलक्षाऽपि शालीना, कुलीना
ऽप्यकौलीना, अवसुधाऽपि मङ्गलस्यजननी, कर्णा-
नन्दकरेणाऽप्यर्जुनचेष्टितेन विश्रुता, गृहीतविग्रहाऽपि
कलिविगलिता, सुप्रसादितपरिजनाप्य प्रसन्नाश्रिता,
सर्वमङ्गलाऽपि विभवस्थिता, क्षमोपरिस्थिताप्युद्धृता-
नन्ता, अगुरुपूजनपराऽपि गुरुपूजनरता, शीतल-
शीलाप्यशीतका, द्वितीयास्थितिमत्यपि दशमीस्था,
मरुमेदिनीकामकीलालस्य, ह्रदः क्रोधवैश्वानरस्य,
अधिमासोलोभाध्वरस्य, मध्यवासरो मोहतिमिरस्य वि-
भावरी दम्भप्रचण्डमार्तण्डोदयस्य, शैलेयशकलमह-
ङ्कारानोकहाङ्कुरस्य, गगनमालवालं स्पृहालतायाः,
विष्टिसमयो मायाप्रयाणस्य, केरलकाश्यपी ईर्ष्याधि-
सूचिकायाः, कृतनिर्यातना, नव्यसना, वृसीसमासी-
ना, अकुहना, अशौण्कला, नत्यक्तनक्तव्रता, नन्दि-
तबन्धुता, वाचं यमा, निर्जितेन्द्रियग्रामा, अरुशती,
सती, अनुपमितमतिमती, विनयबीजक्षोणी पारि-
काङ्क्षिणी ।

स्वर्णं कनकं शोभनजलं च । दानेति, दीयमानोदकार्द्रानक्षत्रयुक्तेत्यर्थोऽन्यत्रबोध्यः । परस्वमन्यधनंपरश्वधोऽस्त्रविशेषः । कन्दः सस्यमूलंमेघश्च । गिरिजा उमा अभ्रकंतुगिरिजम् । जीर्णोद्धारो मणेस्टीकाऽपि । सरलेत्यादयस्तरुभेदाः । रक्षितास्थापिताऽपि, जातिरसद्वृत्तम्, मामाण्यं ममाऽऽवृताऽपि, महत् विभु, श्रुतिर्निरपेक्षोरवः श्रुतिलिङ्गादीनांपूर्वपूर्वस्यप्राबल्यं मीमांसासिद्धान्तः, आर्थभावनाप्रवृत्तिः घनभावनाच, विवर्तमानं विशेषेणवर्तमानं विवर्तरूपंच, । मत्याहारोयोगाङ्गम्, सदिति प्रकृतेविशेषणानां बहुव्रीहिघटितः कर्मधारयः, पात्रानुकूलादयोऽलङ्काराः । विकक्षा निर्लज्ज वितीर्ण कक्षाच, कौलीनोऽपवादः । अवसुधा अवनेऽमृतस्वरूपा, प्रसन्नाऽऽसुरा, अगुरुराजार्हम् शीतकाऽऽत्मा, दक्षमीरस्या क्षीणरागा, निर्यातनंदानम्, वृसीब्रह्मचर्यासनविशेषः । कुहना दम्भचर्या शौष्कला आमिषाशिनी, रुशती अकल्याणीवाक् पारिकाङ्क्षिणी तपस्विनी ।

यस्या विशेषेणलिखितं स्यादतिपतेदाम्नायचतुष्टयं महाभारतं च पवित्रचारित्रम् । यदीयसमज्ञाशुभ्रांशुसमुदये विकसन्ति सतां स्वान्तसारसानि, उन्मिषन्ति च पुरातनीनामपि सतीनसन्ततीना मयशस्तमांसि समन्ततसान्द्राणि । यस्या यशसासदृशतामप्यनासादय दालोकयन्ती दिगङ्गना निचुलयति कुतुकिनी पुराऽतिशयेनविशदयितुं सिन्दूरमेदुरितमपि स्वादर्शमिन्दुमण्डलम् । यामाम्बिकापदाम्बुजन्मनोः पूजनेमनुमनुजपन्तीं, निपवनप्रदीपमप्यतितरां

त्रपातोयनिधौ निपातयन्ती मपघनैर्घनध्यानास्पन्द-मानप्रमोदबाष्पासारवर्षिनयनकमलां, कलकलकला-पेनाप्यनपनेयसमाधिमधिगच्छतां योगिनामपि मन्दाक्षमाछेन्ति चक्षूंषि । यस्या स्सौमनसस्रवन्ती-वीचिविसरशुचौ यशसि शरीरशेमुषी, न विनाशिनि मांससन्निवेशे । या पयांसीव पश्यति स्वापतेयानि प्रादेशनेषु, यदा पन्नकाञ्चनोऽकिञ्चनोऽपिकाञ्चन-शोभां विवृण्वन् यदीययशोभरं विमर्शांबभुव । या प्रति वासरमाशयति सहस्राणिभूसुराणाम् । या मङ्गनया समं समुद्गायन्ति गृहेगृहे सानुरागमग्रजन्मानः । यया स्वकीयकीर्तिकदम्बकेन साकमजर्याणि प्रतिष्ठा-मनायिषत सद्मानि देवतानाम् । या पदारविन्ददा-नादनुकम्पितयादोलिकया देवदर्शनायगच्छन्तीदिक्षु भिक्षुकानदापयतद्रव्याणि दयाभिः । सेय मवगाहते स्म त्रिजगतीवन्दितेनाऽपि त्रिपुरारातिना शिरसा-विधृतां, प्रतीततीव्रतरतपःप्रीततया भगीरथरथानु-यातां, तर्पणवितीर्णासिततिलततिलसितशीततोयां, सुकृतिकलापकल्पितकुटीरकूलां, मज्जनंकलयन्तीनां (कुर्वतीनां) कामिनीनां कुचकलसकुङ्कुमेन, लो-चनकमलकज्जलेन हृदयहारिहरिचन्दनद्रवेण वदन-विधुविशेषकेणच शवलीकृतविमलवारिकां, दुर्गति-

गिरिदारिकां, कलुषायकुप्यन्तीमिव कम्पमानकमल-कलेवरां, यमभटान् हसन्तीमिव हिण्डीर कपटेन, शिशिरादिव कृशतामुपाश्रितां, प्रियसागरेणसङ्गतिं शीलयितुमिवानुरागेण गृहीतवेगां, क्षितिपतिकरद्वयी-मिव प्रदर्शितपृथुरोमरूपां, साधुसात्वतीमिव विश-दाशयां, बृहदारण्यक श्रुतिमिव उपनिषद्धरां, नरनाथ-नारीमिवनदीनां, त्रिपथगामपि अनन्तपदप्रापिकां निम्नगामपि समुन्नयित्रीं, भ्रमाकुलामपि भ्रमभञ्जिनीं, भुवनोद्धारिकामप्यङ्गीकृतभुवनविग्रहाम्, अनङ्गा-रातिसङ्गतामप्यनङ्गतां नयन्तीं, पद्धतिमिव निर्वा-णवितरणस्य, सरणिमिवसुरपुरप्रयाणस्य, मौक्तिक-स्रजमिव भारतक्षितेः, प्रोत्तुङ्गरिङ्गत्तरङ्गभङ्गा-हितचन्द्रचन्द्रोच्चयमरीचिसहस्रचपलवीचिनिचयचन्द नार्चितचारुनीलाचलां, हरिद्वारे हरिपदप्रसूततया क्रियमाणकौतुकासङ्गां गङ्गाम् । अहिमकरेऽधिनिष्ठति मकरनत्यमनल्पवारं चकारकल्पवासं प्रयागे । यस्मि न् वयस्ययेव मिलतिकलिन्दकन्यकया कवीनां संह तिरिवान्तः सारस्वतरसान् वहन्ती भगवती मन्दा-किनी, वालवीजवपनेनच प्रसवोभवतिकैवल्यस्य । हरिचरणसंचरणपवित्रितरजोव्रजेव्रजे च तपनतनूजा पुण्यपयः पावितपरिसरे कृतयुगारम्भइव राधाराधिते

सत्याश्रितेव, मेदिनीशसीमन्तिनीविग्रहइव ललितोल्लसितचित्राभरणशोभने, भरतानुशासनइव समुल्लासितरासके, क्वचिदद्भुततनूजन्मजननिजन्यप्रमोदजाताश्रुसम्पातिनयनजलजाभ्यां वसुदेवदेवकीभ्यामुपश्लोक्यमानस्य, क्वचिदासगंसं कंसं विध्वंसितुमवतंसकृतवीरवेषस्य, क्वचित् वृषभानुतनुजया सरोषं सकटाक्षं वीक्षितस्य, क्वचित् सान्द्रमालिंगितस्य, क्वचित् परिदमितकालियपृदाकुपतिप्रेयसीभिः स्तुतिविषयीकृतस्य, क्वचिदवाप्तसंस्तवेनवल्लवकदम्बकेनाऽपि विहितस्तवस्य, केशवस्य, सवनेन, क्वचित् राधिके २ इति सप्रेमोदीरितगिरां निशमनेन, क्वचित् कृष्ण २ कृष्णेत्याकर्णनेनाकलयां चकार परां प्रीतिम् ।

कमलं जलम् । उपनिषत् धर्मः वेदान्तश्च, निषद्वरो जम्बालः । नदीनां सरिच्छ्रेष्ठा, अदीनाच । भ्रमः आवर्तः भ्रान्तिज्ञानंच । भुवनं जगत् जलंच, चन्द्रोच्चयः कर्पूरपुञ्जश्च । मकरो राशिविशेषः, राधागोपी वैशाखश्चराधः । सत्या, सत्यभामा सत्यम् अवितथम् । ललिता ललितंच चित्रा चित्रंचेतिच्छेदः । रासकइति रासक्रीडोपरूपकविशेषयोर्बोधकम् । आसगंसम्, संस्तवः परिचयः ।

अनयाऽसकृत् सौरोपरागे सहृदयइव सारस्वतरसा

[illegible]

श्रिते, प्राचीभागइव हरिपादपुताचले, कलेः कालेऽपि धर्मचरणयुगलोद्भासिते, नकुलकृतपराक्रमेऽपि बहुवीरनागवलिते, कर्णकृत कायान्तः कवचवितरणप्रमुदितकेशवे निर्वाणक्षणक्षेत्रभुते, कुरुक्षेत्रे, वितनितविधिविहितकृत्यया ऽतितमां सममानिषत द्विजन्मानो दानैः । गिरिशप्रेयसीमित्युत्तरगामिभिस्तरङ्गैस्सङ्गतयागङ्गयाऽऽलिङ्गितां, मुक्तिक्षितिरिति मुमुक्षुलक्षेण लक्षितां, कैलासनगरीमिव भैरवरक्षितां, श्यामामिव तारकाविकाशिकां, काशिकामाश्रित्य दृशोर्विषयीकृतो विश्वेश्वरः । परितोऽवचाय परिपदिपरितोपितश्च सञ्चयोविपश्चिताम् । अनयेव विन्ध्याभिधाने धरणिधरे भगवतीसमाराधिता, साकेतेसरयूस्रोतसि स्नातयासीतासहकृतोरामोऽवलोकितः । चित्रकूटगिरौ गोदावरी अवगाहिता, वैद्यनाथस्सपर्ययाप्रसादितः जगन्नाथोऽपिनयनपथातिथीकृतः । प्रातिदैनिकानेकजनभोजनसमुचितकुसीद फलान्यदीयन्तदेवद्विजाय द्रविणानि तीर्थेषुतेषु । यवानां तिलानाञ्च भूयसीराशीर्निराशीकृतविभासिशिखरप्रांशुताः, शारदाशनीयान् सपरिमलैः सर्पिरादिपरिकर प्रकरैर्मण्डितान् तण्डुलानपीयमर्पयति विप्राय । गाङ्गे-

१ गोहिनीमिति वा पाठः । २ दानेनेव इति वा पाठः ।

यशृङ्गालङ्कृतशृङ्गसङ्गतं, शृङ्गीकनकबन्धुर-
स्कन्धबन्धं, रजतराजिराजितस्फुरितशफं परमपीव-
रान् धरणितलामर्शिनोधवलिमाधिकान्, पयोधरान्,
दधानं, घेनूनामजस्रं सहस्रमुत्सृजति। क्षमामृतमिव
प्रोच्छ्रितं, शममिवश्रितसज्जनं, दक्षिणनायकमिव
वशीकृतवशं, सगोवरमिवोल्लसितपद्मकाननं, साव-
ग्रहमपि शीकरासारकारकम्, अदूष्यमपिवरत्रानुब-
न्धिनं, तैमिरीमहङ्कृतिमपहरतेव हटितसंहननं सत्वर-
विमृत्वरेण कालकान्तिजालकेन, अजगरभुजगगात्रे-
णेव गृहीतगौरवेण शुण्डादण्डेन पश्चिमसन्ध्यामिव
सन्धारयन्तं, परिणतिललितलवलीफलकनितकोदण्ड-
बद्रालतारकार्तस्वरसारशृङ्खलित प्रतीकत्रिकरदद्वयं
कदलीदलवदाचरितपृष्ठदेशं, विहितबृंहितोत्थापित-
पृथुवेपथुपृथिवीमण्डलं, पार्श्वतस्युगललम्बमानवि-
शङ्कट घण्टाट ङ्कारटङ्कपात्यमानश्रुतिपुटीपटलं, हाट-
कादिलुठितस्रगावगुण्ठित कठिनकण्ठदेशं, परिमेलि-
ताधिकस्नेहदीप्तिगेहदेहमन्यमिव श्यामलिमानमाश्र-
यन्तं, गौरादिरागरञ्जितातिविशालभालस्थलं, चरण च
तुष्टयीचञ्चित चामीकरकृतकलकिङ्किणिकाकलापक्वणि
तकान्तम्, अहंयुतान्धतयेवमन्दमन्दगमनेन मानसम
पहरन्तमवलोकमानानां, द्विगुणीकृतकमलरागगुटिका

वलीकिरणाकलितकर्णवर्णं, हैमहीरकमहामौक्तिकप्रवालजालजडितलम्बमानास्तरणदर्पणप्राप्तप्रतिबिम्बकैतवेनजननिवहं वहन्तमिवपार्श्वभागयुगलेन, सिताभ्रशृणिश्रित पताथासनं, जगतीगतगन्धग्रहणलुब्धतरमुखरमधुकरनिकरलोलश्यामलतनकपोलपालिसन्ततस्यन्दमान दानोदकामोदमेदुरितमेदिनीमण्डलं, दन्तावलं प्रत्यपादयदवदान्यावदान्यतान्यकृतोपमानस्थानप्रतीतानवरतबहुमानदान समुद्रसन्दर्शितातन्द्रयशश्चन्द्रसान्द्रधरणिपतिशताऽधिभागीरथीप्रतारम् ।
नर्मदामिव वेणीरमणीयां, ज्योत्स्नीमिवचन्द्रभूषणां, गणितविद्यामिव नक्षत्रमालाच्छुरितां, नूतनानुरागप्रक्रियामिव रचितविचित्रपत्रलेखां, स्रोतस्वतीमिव लावण्यसलिलस्य, प्रधानराजधानीमिव मन्मथपार्थिवस्य, प्राङ्गणप्रान्तसुरभीकरणदक्षयक्षकर्दमसम्मिश्रवर्तिवामिरुत्सादितां, सुगन्धशुचिसलिलस्नापितां, महाधनाधिवासितकौशेयान्तरीयचञ्चत्काञ्चनकञ्चुकाञ्चिताम्, आस्थास्थापितस्थासकां, कङ्कतसशङ्कविन्यस्त मधुरतरवासरानुसारि परिमलललितमालतीप्रभृतिप्रसूनप्रसृतस्नेहसान्द्रीकृत शिखावलश्यामलविमलकेशपाशां, मृगमदामोदनिष्यन्दिनाबिन्दुनाकाश्मीरादिनिर्मितेन तमालपलासेनच विलसिता-

लीकां, कज्जलकलाशलाकाकलितलोचनोत्पलां, हाटकघटिततारङ्कतटमिलितमेचकमुक्तमणिमतल्लिका मरीचिमालया शातक्रतवकार्मुकेणेव किर्मीरितवक्त्रकान्तिम्, उज्ज्वलरसाकारं सम्पादयितुमिवाभिनव नवग्रहाध्यासितां, कनककृतकेयूरकटककङ्कणकलाप किङ्किणिकातुलाकोटिहंसकपरिस्फुरत्कलेवरां, प्रालम्बिकोरःसूत्रिकाहारलतानतां, परिस्पन्दमानचम्पकप्रालम्बाम्, आपादितपरिणयप्रणयिरूपां, समुचिताधिक शुक्लशुल्कक्रीतां, भ्रातृमतीं, कन्यकां, सत्कृत्य वरायानुरूपाय प्रदाय कृतकृत्येतिपदवीमवापत्।

सारस्वतरसः सरस्वतीकुण्डजलं, वाणीरसश्च। हरिः कृष्णः सूर्यश्च, पादः पदं किरणश्च। अचलेतिभङ्गेन पृथ्वीपर्वतयोर्बोधकम्। धर्मः सुकृतं युधिष्ठिरश्च! नकुलः पशौपाण्डवेच विशेषः। वीरनागः बलवानसर्पः वीरवरश्च। तारकेति, रामेतिमनोर्नक्षत्रस्यच बोधकम्। गाङ्गेयशृङ्गं प्रकृष्टकनकम्, शृङ्गीकनकम् मण्डनसुवर्णम्। सज्जना कल्पना, सौवुश्च सज्जनः। वशाकरिणी कामिनीच। पद्मकाननं बिन्दुजालकयुक्तमुखं कमलवनंच। अवगूहो वृष्टिप्रतिबन्धोऽलकाटं च। अदूष्यं कक्ष्यारहितमनिन्दितं च। वरत्राकक्ष्या। हटिवं राजितम्। शृणिरङ्कुशः। आसनं स्कन्धदेशः। वदान्यावाग्मिनी दानशौण्डा चारुवादिनी च। वेणीकेशबन्धः प्रवाहश्च। चन्द्रोभूषाविशेषइन्दुश्च। नक्षत्रमाला हारभेदः तारापरम्परा। पत्रलेखातिलकविशेषः पत्रलिपिश्च। यक्षकर्दमेति, कुङ्कुमागरु-

कस्तुरी कर्पूरंचन्दनं तथा। महासुगन्धमित्युक्तं नामतोयक्षकर्दमइति धन्व-न्तरिः। वर्तिकागात्रानुलेपनीउत्पादनमुद्वर्तनम्, अन्तरीयमधोंऽशुकम्। स्पासकः चार्चिक्यम्। कङ्कतंकेशमार्जनी। तमालपत्रासं तिलकविशेषः। अलीकोभालदेशः। उज्ज्वलरसोविमलजलं शृङ्गारश्च, नवगृहोभूषाविशेषः नवमितोगृहश्च अभिनवत्वं तत्र प्रसिद्धनवग्रहविपरीतफलकत्वाद्विशेषण-म्। तुलाकोटिर्नूपुरः। प्रालम्बिका स्वर्णैः उरस्सूत्रिका मौक्तिकैः कृता माला। प्रालम्बं कण्ठाहजुलम्बिमाल्यम्। शुल्कशुल्कम् न्यायोपात्तमूल्यम्।

दरभङ्गेत्यभिधानं दधानेपुटभेदने शर्वरीशमरीचिरुचि-जालंचतुश्शालं प्रासादमयंसामवेदकोविदाधद्भविड-जनपदायविप्रायप्रायच्छत। अनुगृह्णाच वाराणस्यां विश्वविद्याप्रदनसम्पादनायसङ्कुचितसुर-तरुस्तरुणकरुणयास्वर्णसहस्राणां वितरणेन पूर्णामेव-जगतीम्। नैदाघप्रौढतमतपनातपसन्तानसन्तापितान् सन्तोषयति पीयूषरसातिशायिना शुचिश्येतशिशिरेण पानीयशालिकासु कीलालेन किङ्करैः। विपुलोपलो-पक्लृप्तसोपानावलीशोभिगभीरसुरभिक्षीरनीरसनीर-दीर्घिकाणां तेषुस्थलेषुखाननेन व्यपानयदपामनवा-पादापादितांतृषंजनिजुषाम् सत्वरं संस्कारयतिस्मया-स्साङ्गनिगमसागरपारगैरनुष्ठीयमानाभिश्चरणचतुष्ट-येन घटिताभिरिष्टिभिः। प्रावृषेण्यपुलिनिनीपरमोच्च-यचाचल्यमानप्रविसारिपयः (वारि) प्रवाहैः, प्रलय-

पयोदपटलमयः पूर्णेन्दि. प्रत्यायद्भिः पायसामेव सपिद्रूप्यरूपतां, स्मृतिपदोपनीतपस्त्यपादपप्रमुखैः प्रयाणकर्मीकृतेषुस्थलेषु गविमपिहृदनया, पर्वतानपि पांशुभावेन परिहसन्तीस्थे तुसंहती रसहस्रेणापिस्रोतःस्वतीनाममभिदेलिमाअवन्धयत् । प्रत्यतिष्ठिपदनन्यनिष्ठनिष्ठया निजधिष्ठानोपकण्ठं सौष्ठवपुषावपुषा मनोहरे मन्दिरे मिलितविस्मयानामपि मर्मसुरचनकर्मणां विश्वकर्मसधर्मतामुपगतै धार्मिकैश्चारुचरितैः कारुभिर्यथा शर्मनिर्मायं निर्मापितेऽधिकुट्टिमं श्वेतमसृणैः, परत्रच मानसनिकेतनानन्तिक माकारयद्भिः, दम्भोलिदम्भं स्तम्भयद्भिः प्रशस्ततरैः सविस्तरैः प्रस्तरशकलैः कलधौतकलसिकाविलसितोदवयवे, रमणीयद्युमणिमैत्रीमुदमंशुकैतवेन वेदयाने, मन्दस्पन्दमानमारुतान्दोलिताना, मन्यदीयमञ्जुलता विजयमनुमापयन्तीनामिव, सौवर्णकिङ्किणीगणझणत्कार मधुरमृदुनिनादमोदित श्रुतिसन्ततीनाम्, अरुणिमरागरञ्जितनवीनचीनचेलवैजयन्तीना मन्विते शतेन, कालागुरुगुग्गुलसरलप्रभृतिबहलसौरभद्रव्यदहनधूमसुरभिते, हरेणापि हृदयगृहीताङ्घ्रिसरोरुहां, प्रावृषमिव

व विततशोणरसनां,

प्रत्यक्षरूपिणीमिव पितृनिलयवासप्रियाम्, उदीर्णां दिशामिव मदप्रदोदयां, विमानदेवतामिव पादपराग-रागिमिलितनरमस्तां, हरिदंशुकामपि विगलिताम्बरा-म्, शोणपयोधरामपि मदनाशिनीं, भोगवल्लभामपि भोगिभूषितां, पुष्पार्धचन्द्रचूडां विनाननीलुमिव शय-कल्पं श्रयन्तीं, गजकृत्तिधारातिलम्बमानमुण्ड-मालकपालदर्शनां, दिव्यरत्नानिधानपूर्णमानलोहित-लोचनां, मुक्तमेघरत्नाम्बरोज्ज्वलाति पादविक्षाचयाश्चि-तचरणां, विश्वविरचनचुञ्चुना विरिणानन्यचेतसा शिरश्चिन्तनात्पुदञ्चितां, चेतनाचेतनरक्षणचणेनाऽपि पुण्यचरितेन हरिश्चन्द्रशासितेनाच्युतेनापि चिन्तयागो-चरीकृतां, शुचिनैरन्तर्यचिनिचिते राजश्रीयोगचार-निचयैरनिशमर्चितां, चक्षुश्चर्गी[illegible]चिन्तयन्तीं श्यामाम् ।

रुधिरार्द्रं पृथिव्यादिप्रयम् । हृदयं वक्षोमनश्च । पयोधरस्तनोपनश्च । मदनाशिनी शाम्भवी च । रक्तः शोणितमनुरक्तश्च । पितृनिलयः श्मशानं मातृगृहं च । पुष्पोनिधिन श्रीतानपादिश्च हृदयोवृद्धिः प्रकाशश्च । पादेति पक्षः अन्यत्रपादपेति, हृषनाति देवपुत्रयोर्बोधकम् । हरित्वर्णविशेष आशाश्च । अम्बरं वसनमाकाशं च । भवदिशवत्संसारश्च । भोगीभोगवान् सर्पश्च । शर्योदरः शयनपर्यम् । मुक्तः गलितबन्धनः कैवल्यवांश्च

१. [illegible]मिति वा पाठः ।

चुञ्चुनाख्यातेन ॥

यदीयप्रात्यहिकचन्द्रेतरारातिककालिकोऽवधीरितवारिधरघनध्वनिरन्तरितरवान्तरस्सन्ताड्यमानभेरीमृदङ्गाद्यनेकवाद्यनिनदसमाक्रामतितमांदिक्चक्रवालम् । यामनुसमाअपचिन्वत्यमायां मनीषिशेमुषी[2]सीमानप्रतिपतितैः, भुजगपतिगिरामप्यगोचरैः, पुरुहूतलोचनैरपि परिच्छेत्तुमशक्यैः प्रकारैरधिगाहुलवहुलदलम् । सत्कुलेचयत्र निकुरम्बं कुटुम्बकानां कदम्बकं च कोविदाना मम्बाम्बसुविद्यापनैः । ययान्वर्थनामधेयं प्रसाध्यते निजसन्निधानमूर्त्यामनोरमेण मन्दिरेण प्रावृट् विटपिपटलमिवाविपल्लवं, रोहिणीचरणसरसीरुहमिवलाङ्गलिप्रगतं, मुरजादिवन्धविशेषलेखमिव असङ्कीर्णवर्णाकीर्णं, विलासिनीवपुरिव विभ्रमोद्दीपितं, चम्पककुसुममिव मधुपगतिवियोगितं, द्वारकापुरमिव उद्धवाच्युतं, सुरनगरमिव सर्वतश्श्रूयमाणगैर्वाणवाणीकमैरावतविलसितंच, आम्नायमिवसत्पदक्रमं, गगनभागैरिव विक्रमान्वितैः, सत्काव्यैरिव सरससरस्वतीप्रवणीकृतरसिकमानसैः, इक्षुकाण्डैरिवच्छेदक्षोभक्षीणैरपि सुरसमेवसन्ददानैः, दण्डैरिव भ्रमणेनापि परकीयकार्यकारकैः, पाटीरखण्डैरिव स्वा-

१ मति इति वा पाठः ।

आस्वादितकादम्बरीप्रभृतिजातशातेन ।
अपिकृतिरेषा नवतया दृश्याकविजातेन ॥ ३ ॥
रसराहितमिलेन मिते (१८२९) विक्रमवत्सरे ।
श्रीबालकृष्णमिश्रेण काव्यमेतत्समापितम् ॥ ४ ॥

इति राजकीयसंस्कृतमहाविद्यालयाध्यापकमैथिल श्रोत्रिय श्रीबालकृष्णमिश्ररचिते लक्ष्मीश्वरीचरिते

॥ षष्ठोच्छ्वासः समाप्तः ॥

उपयमन कुशो वेणीरूपः कर्मकाण्डे प्रसिद्धः । शमीकिंशुकवृक्षः, एनांसि पापानि 'कल्पोऽपः कल्पकता, श्लोकोयशः । स्पंदनम्, शंतवं विस्तृतं कल्याणम् ॥ ० ॥ न्यायस्तर्कशास्त्रम् । आचितंव्याप्तम् । सम्भाव्यम् । आदरणीयम् अनवधानताया इति कारके हेतौ पञ्चमी । कादम्बर्या प्राचीनत्वंतु प्रसिद्ध मेवेतिनतदनुपादानेदोषः । समासोक्त्यलङ्कारः ॥ रः रामः तस्यत्रित्वसङ्ख्यापोषकत्वम् । इनः पतिरिति शिवम् ॥ ॥

इति राजकीयसंस्कृतमहाविद्यालयाध्यापकमैथिल–श्रोत्रिय–
श्री बालकृष्णमिश्रनिर्मिता निजनिर्मिते लक्ष्मीश्वरी
चरिते षष्ठोच्छ्वासटिप्पणी समाप्ता ॥ ॥

---

१ रसरामाहितभाट, महृतामाहितभाग, इति वा पाठः ॥

धरीकृतवधूजनाधरसुधामधुरतानां व्याहृतीनां योग्ये-समुन्मेषाद् प्रयासेनैतया कृतार्थीकृताः कवयतां कलापाः। श्यामापदपयोजपूजनाय चिरायास्मिन्नेव पुरेनयन्तीसमयमियमियाय पुण्यश्लोकतया जनतया स्वेष्टदेवतेव स्मरणीयतामुषसि। स्वस्वसमीहितं स्व-माप्नुवन्तोऽति सन्तोषेणसन्तो विहितसेवाद्देवा देत-दीयाभ्युदयं याचमानास्सकलककुभः कान्ताश्च श्राक्र लिताङ्गाःवरणैतदीयकीर्तिनिचयाः(कर्णालङ्कृतीकृत-राजतताटङ्ककीर्तयः) सुकृतसन्ततीस्सन्ततं विदधती-सतीशंततं सन्ततमनुभवन्ती पालयन्तीच निजान्व-वायोचितकरणीयमारजनीशतरणी राजतां धरणीतल इत्याशिषां राशिभिरिमामभितोवर्द्धयन्तीतिशम् ॥

न्यायानुचिन्तनचयाञ्चितचेतसो मे
सम्भाव्यकाव्यकरणाभ्यसने श्रमस्य।
प्राथम्यमेतदधिगम्य विलोकमानः
सन्तोषमेष्यति मनीषिजनो विशेषम् ॥ १ ॥
स्थूलान्यपि स्वरचिते रचकस्यनैव
प्रायेणदृक्पथिकता मुपयन्ति यानि।
मानुष्यजन्मसुलभानवधानतायाः
संशोधयन्तु सुधियः स्खलितानि तानि ॥ २ ॥

१ विमाने २ कनद. इति वापाठः।

आस्वादितकादम्बरीप्रभृतिजातशातेन ।
अपिकृतिरेषा नवतया दृश्याकविजातेन ॥ ३ ॥
रसशाहितमिह्नेन मिते (१८३९) विक्रमवत्सरे ।
श्रीबालकृष्णमिश्रेण काव्यमेतत्समापितम् ॥ ४ ॥

इति राजकीयसंस्कृतमहाविद्यालयाध्यापकमैथिल श्रोत्रिय श्रीबालकृष्णमिश्ररचिते लक्ष्मीश्वरीचरिते

※ ॥ षष्ठोच्छ्वासः समाप्तः ॥ ※

उपयमन कुशो पेणीरूपः कर्मकाण्डे प्रसिद्धः । शमीकिंशुकवृक्षः, एनांसि पापानि 'कल्पोऌपः कल्पलता, श्लोकोपशः । स्पंघनम्, पांतवं विस्तृतं कल्याणम् ॥ ० ॥ न्यायस्तर्कशास्त्रम् । आचितंव्याप्तम् । सम्भाव्यम्। आदरणीयम् अनवधानताया इति कारके हेतौ पञ्चमी । कादम्बर्या प्राचीनत्वंतु प्रसिद्ध मेवेतिनतदनुपादानेदोषः । समासोक्तश्चलङ्कारः ॥ रः रामः तस्यपवित्रत्वसङ्ख्याबोधकत्वम् । इनः पतिरिति शिवम् ॥ ※ ॥

इति राजकीयसंस्कृतमहाविद्यालयाध्यापकमैथिल–श्रोत्रिय–
श्री बालकृष्णमिश्रनिर्मिता निजनिर्मिते लक्ष्मीश्वरी
चरिते षष्ठोच्छ्वासटिप्पणी समाप्ता ॥ ※ ॥

---

१ रसरामाद्रिकुआह, महरामाद्रिकुआह, [illegible] वा पाठः ॥

धरीकृतवधूजनाधरसुधामधुरतानां व्याहृतीनां योग्ये-समुन्मेषाद् प्रयासेनैतया कृतार्थीकृताः कवयतां कलापाः । श्यामापदपयोजपूजनाय चिरायास्मिन्नेव पुरेनयन्तीसमयमियमियाय पुण्यश्लोकतया जनतया स्वेष्टदेवतेव स्मरणीयतामुषसि । स्वस्वसमीहितं स्व-माप्नुवन्तोऽति सन्तोषेणसन्तो विहितसेवादेवादेत-दीयाभ्युदयं याचमानास्सकलककुभः कान्ताश्च श्राक-लिताङ्गाभरणैतदीयकीर्तिसिचयाः(कर्णालङ्कृतीकृत-राजतताटङ्ककीर्तयः) सुकृतसन्ततीस्सन्ततं विदधती-सतीशंततं सन्ततमनुभवन्ती पालयन्तीच निजान्व-वायोचितकरणीयमारजनीशतरणी राजतां धरणीतल इत्याशिषां राशिभिरिमामभितोवर्द्धयन्तीतिशम् ॥❀

न्यायानुचिन्तनचयाञ्चितचेतसो मे
सम्भाव्यकाव्यकरणाभ्यसने श्रमस्य ।
प्राथम्यमेतदधिगम्य विलोकमानः
सन्तोषमेष्यति मनीषिजनो विशेषम् ॥ १ ॥

स्थूलान्यपि स्वरचिते रचकस्यनैव
प्रायेणदृक्पथिकता मुपयन्ति यानि ।
मानुष्यजन्मसुलभानवधानतायाः
संशोधयन्तु सुधियैः स्खलितानि तानि ॥ २ ॥

---

१ विभ्राट् २ भ्रमः इति पाठान्तरः ।

आस्वादितकादम्बरीप्रभृतिज्ञानशातेन ।
अविकृतरेघा नवतया दृश्याकविजातेन ॥ ३ ॥
रसरविहितमिस्रेन मिते (१८२९) विक्रमवत्सरे ।
श्रीबालकृष्णमिश्रेण काव्यमलमथापितम् ॥ ४ ॥

इति राजकीयसंस्कृतमहाविद्यालयाध्यापकमैथिल
श्रोत्रिय श्रीबालकृष्णमिश्ररचिते लक्ष्मीश्वरीचरिते
॥ षष्ठोल्लासः समाप्तः ॥

उपगमन कृतां देवीस्तवः [illegible] । शार्ङ्गविक्रमः, एतानि पापानि [illegible] । [illegible], [illegible] कल्याणम् ॥ ७ ॥ [illegible] शारदम् । [illegible] । [illegible] आ-दर्णीयम् [illegible] इति [illegible] पञ्चमी । [illegible] अर्दान-रंतु [illegible] । [illegible] ॥ २ः [illegible] । [illegible] ॥ ८ ॥

इति राजकीयसंस्कृतमहाविद्यालयाध्यापकमैथिल—श्रोत्रिय—
श्रीबालकृष्णमिश्रनिर्मिता निजनिर्मिते लक्ष्मीश्वरी
चरिते षष्ठोल्लासटिप्पणी समाप्ता ॥ ६ ॥

[illegible]

